No. २४२ / घ

Title रसगङ्गाधर टीका गुरुमर्मप्रकाशः

Author नागेशः

Extent १३४ पत्र Age

Subject अलङ्कार शास्त्र

१६८
२५
१३४

रसगंगाधरटीकामर्मप्रकाशाख्या

~~३५५~~

२४२

१३४ पत्राणि

देवंचस्वभावोक्त्यलंकारएवायमत आहेदंवापुनरिति· हियतोमधुरसान्मधुरंतवस्वस्य· सएव·माद
कद्रव्यसेवनरूपः प्रागुक्त एवेत्यर्थः अधिकेतिपपहभमेत्यर्थः पणचेत्यस्येत्युभेदइतिशेषः अध्वेति
त्रयाणां द्वंद्वगर्भोबहुव्रीहिः अनुभावकैरित्यस्याग्रेतनेनान्वयः संवाहनंसेवनं· मोटनंमोउनंइतिभा
षाप्रसिद्धं· मदेरित्युत्तरान्वयि· अतोस्मानेरितिउक्तहेतुद्वयात्तस्मानैः ग्राकाण्यादित्यर्थः दृष्टांतेनसुषु
प्तेरवलाभेनस्वप्नस्यत्याज्यत्वायेनाहसुषुप्तोहीति· नैवेतियत्वंप्रतितस्यकारणत्वादितिभावः ननुस्वप्नार्थ
मेवतदस्तु अत आह ग्लाउ इतिप्रकारतयेतिभावः तस्यानिद्रायाः रत्नसानुसुमेरुः मृद्वीकाद्राक्षा· नि
सा२ र्यतनिस्सरतु· स्वरीप्रवाहः तस्मात्तवीरध्वनेः मदन्यइतीतिगर्वाकारः सोल्लुंठंसाभिप्रायं· वचनेनआ
म्लोदित्यादिमदन्यइत्यंतेन· दोषारात्रिः येत्वरादयइतिलोकेइतिशेषः इहशास्त्रेतत्प्रभवः जन
रादिप्रभवः तदुदंतेति· नायकोदंतेत्यर्थः मुखेइत्येकवचनेनएकवाक्यैवसर्वाभिरुच्यतइतिध्वनितं:

३६ 36 तदलाभादित्यंदृष्टो· भीरोः भयशीलस्य· सत्वं प्राणी· स्फूर्जथुः वज्रनिर्घोषः औत्पातिकैः उत्पातस
चकैर्धैरसत्वदर्शनादितिः मनः क्षेपः चित्तवृत्तिविशेषः केलीरभसेन क्रीडाभसेननायकोक्ति
रियं· आरात्‌ दूरं· ततोऽचिरस्थापित्वेनविद्युच्छोभालाभः पश्चात्‌ स्फूर्त्तेकं· शब्दानुशासनमाचार्येणेति
ले॰ वस्मयोगः शैशवे नैवेतिवालापदवोध्येनेत्यर्थः तस्याः लज्जायाः एवं च मूलेकुठारान्नतदाशंकेतिभा
वः ननुवालापदंनशैशवबोधकंकिंतुविशेषबोधकमतआहदैवेतिकशाताडनरज्जुं· वस्तुतस्तत्लाभा
वादाहलीलेति· अनिदंजन्यत्वादिति· एतज्जन्यत्वाभावादित्यर्थः स्वप्नजन्यत्वाभावादितियावत्‌·
ति अन्यथेतिनिरूपेत्यर्थः एतदिंस्वप्नेत्यर्थः मृषेति· मिथ्याभाषिन्‌· इह प्रवासे· प्रियतमेतिनायिकेस्य
र्थः अत्रोदाहृतमिति· अस्यापिवाच्यातिशायित्वादेतद्‌ध्वनिव्यवहारोपितथाचसांकर्यमितिभावः ३६
तस्मात्रिर्निद्रापूर्त्तिः वारिवाहोमेघः अयंविवोधं· सिंहावलोकनन्यायेनास्यापध्वनित्वं निराचष्टेनत्विति·

हिपतः·तस्मिन्विबोधेः·तस्या अपि अमृतयाया अपि·स्वप्नस्य·वाक्यार्थेनेतिशंक्यमित्यस्यानुषंगः·ज
लाहरणकर्तृत्वेनबोधकवारिवाहब्दस्येसत्त्वादतआहास्तुवास्वप्नभावेति·इदंवक्ष्यमाणंसक
लायोमिनीमभिव्याप्यसहस्थितेवतीनिद्रांगाढमालिंग्याथशांतस्तांविहायसः·चेतनामालि
लिंगेत्यन्वयः·नन्वेवंविबोधभावध्वनित्वाभावेपिकस्येदमुदाहरणमतआहयथेत्यादि·प्रागवत्·
विबोधवत्·कारणानांपरकृतावज्ञादीनां·कार्याणांमौनादीनां·आमृष्यसंस्थेत्यय·जोषंजोषमि
तिनिर्निमेषंदृष्ट्वादृष्ट्वेत्यर्थः·जोषमेवतूष्णीमेवभामिनीकर्त्री·अत्रादिसंग्रात्सविभावानुभावयोः
सत्त्वमित्याहेहत्त्विति·इदंचानिर्निमेषनिरीक्षणंसेवार्थकजुषाणमुल्लाचगम्यंतदाहनिर्निमेषेति·
इदमुपलक्षणंमौनमथनुभावोबोध्यः·किंभेदकमिति·उक्तकार्यकारणयोस्तुऐकात्मेवेतिभावः·
तत्त्वतुविषयतावैलक्षण्येतु·कार्येति·क्रोधामर्षयोर्यथाक्रमममित्यादिः·हर्षाद्यनुभावानामिति·

३७ हर्षादिजन्यानुभावानामित्यर्थः भावविशेषो ऽभिप्रायविशेषः अनुभावेत्यस्य हर्षादिजन्येत्यादिः
37 ततः अवहित्थं भयादिभिर्विभाव्यं जन्यमित्यर्थः गुरुषु तत्समीपे· गोत्रानां प्रसंगे इत्याद्यन्वयः
पन्नगपतेः कालियस्य· साश्चर्यमाश्चर्येण सहितं तांडवविधिं यदुपते रिति भावः ताढ्यशेति· विषवम
नकर्त्रेत्यर्थः असदिति अविद्यमानदोषकथनमित्यर्थः अंगाधिपतेः फणीतः परीति उत्कृष्टेत्य
र्थः पराभूतमिति युधिष्ठिरविशेषणं· नचामर्षोग्रेति कारणेक्यादिति भावः अमर्तीतेरिति अस्यां
वधादीच्छापि न तस्मिन्नित्यनुभावभेदादिति भावः असोऽउग्रता· भेदादिति· गुरुवंधुवधादिज
न्यः स्थायी वा गपराधादिजन्यः संचारीति भेद इत्यपरे· व्याहृतये इति ज्ञानस्योन्मादे त्वव्याहृत
ये इत्यर्थः तस्माप्रसक्तेरिति मुख्यमरणस्यांतर्भावासंभवादित्यर्थः तत्र हेतुमाह भावेषु चेति· ३७
अंगीकुरुतेन· न प्रतिवस्तीत्यर्थः अत्र मरणे· हंतपदस्य दुःखातिशयबोधकत्वादिति भावः

प्रकृतेऽनुपदंवक्ष्यमाणरीत्याविप्रलंभासंभवादाहशोकेति करुणस्थायीभावस्येत्यर्थः अस्यपुरोऽन
नभिव्यक्तेराहचरममिति·अतएवैतत्तध्वनित्वं·तदेवाहायंचेति·नन्वस्यप्रधानोदाहरणंकुतोनदत्त
मतआहकवयइति·पुनः शब्दोहिशब्दार्थे·आदिनाविपर्ययपरिग्रहः आलंबने·आधारभूते·न
नुनियमेनतदभावेपिलक्षणेतदनिवेशात्प्रकृतेतत्संभवएवातआह किंभविष्यतीति·ननुनविने
त्यादिनाऽर्थांतरन्यासस्यप्रतीतेः कथंध्वनित्वमतआहनविनेत्यादीति सामान्येनविशेषसमर्थ
नमत्रबोध्यं·भास्करस्तेनोकर्णे·दुर्योधनसञ्जीवितेति संबुद्धिः हेवीरेत्यर्थः इवशब्दोवाक्यालंका
रे·निर्मासिगच्छसि·विषादध्वनित्वंद्रष्टपति·अस्मिन्नेवेति·वाच्यध्वनिरितिलक्ष्यतावच्छेदकं
चकर्णदर्शनावधिजीवित्वं एकादशाक्षौहिणीपतिवधत्वंप्रतापेनागणितपांडवतेजस्त्वंपां
डवानांवनवासादिदातृत्वंवा·अतिदुःखित्वंव्यंग्यं·परेतित्वत्सृष्टेत्यर्थः युधेति·तथाचकिं

३८ भविष्यतीत्याद्याकारायास्तस्याअसंभवइतिभावः तेनागेतितथाचतद्विभावस्याभावइतिभावः परापे
38 तिवहुव्रीहिस्तुतीयातत्पुरुषोवा· परापकर्षस्यैवाभावादितिभावः उत्साहस्येतितत्स्थायीभावस्ये
तिभावः अधीतिकोमलामंत्रणे· अमीमेइतिपाठः वाहुजानांक्षत्रियाणां· अस्यपदार्थस्य· निपतदि
तिनियतद्वाष्पसंरोधनेमुक्तचांचल्यात्स्वाकारकायस्येत्यर्थः आलोकेप· लिङोरूपं· उद्वेगस्येवेतिउद्वे
गावेगोपर्यायो· चिंतोत्कंठेतिचिंतोत्कर्षेतिपाठांतरं· रक्षानिष्ठेति· प्रियानिष्ठेत्यर्थः तद्विमेतिज्वड
ताविभावाद्दत्यर्थः रुजारोगश्चेत्यर्थः वाशब्दः समुच्चये· विदं अर्थांतरसंज्ञानांमतंदृष्टं· दूरतः दूरे· क
रणैः इंद्रियैः प्रणयः स्नेहः अन्यासामसंभवादाहततस्तेति· चाक्षुषादिरूपास्त्वित्यर्थः चाक्षुषा
देरितिसामान्येनेतिभावः प्रकमेतितन्त्रकारेणेत्यर्थः अतएववाहुल्येन· अतएवसर्वथाअस्यागा ३८
दैव· अस्यआलस्यस्य· तुल्यत्वेपिग्लान्यादावितिशेषः यथासंख्यमन्वयः पारयामिशक्नोमि· आ

यमी लोहमयी · रसज्ञा जिह्वा प्रियेति प्रियस्यागमनं यस्मिन्दिने ततो द्वितीये इत्यर्थः जडता तो भेदं
तस्माह जडेति · वाच्शब्दश्चार्थे · अत्र आलस्ये · कथाभिरित्यविवक्षितेति · कथाभिरिति सुर
तपरं तत्त्वमेव लक्ष्यतावच्छेदकं अतिश्रमयुक्तत्वं व्यंग्य · श्रमरस्य सव्यंग्येत्यादिः परिपोषक
इत्यनेन श्रमध्वनित्वं निरस्तं · ननु तस्य तत्त्वे प्रकृते गौरवमत आह श्रमेति · नन्वेवं सर्वत्र तत्त्वे
न विभावभेदोक्तिरयुक्ता अत आह हानीति · प्राकृत इति क्षत्त्रियोद्भव इत्यर्थः तत्रस्यानां सीतापरि
णयनार्थं जनकगृहे समागतानां सदसि उपविष्टानां · शिशुपदेति एतदुभयपदे इत्यर्थः तस्या
लोले तु उदाहरणादौ नेवीजं कथयितुमाह तस्येति · कलयतीत्यादि सत्त्वं संतमं यं तं कलयति · चं
द्रिकापानार्थं स्वीकुर्वति चकोरव्रजे तत्समूहे · कुलं समूहः धुन्वति टंकारयति · विधौ चंद्रे धारा
धरेति · मेघाच्छादनमित्यर्थः तदीयेति धात्रीयेत्यर्थः प्रकाशेत्यनेन तस्यावाच्यत्वं सूचितं · वक्तुमिति ·

३९
39

तथाचेदमपिअस्याउदाहरणमितिभावः कार्यकारणयोस्तुल्यत्वादिति· असत्याकार्यकारणयो
रिवामर्षकार्यकारणयोरपिविद्यमानत्वादित्यर्थः असौअमूयाप्रतीयतइ सत्रान्वयः एवव्यवच्छेद्य
माहनेति· भेदेननेत्यर्थः अनइदंनोदाहृतमितिभावः ननुपूर्वोदाहरणेपिचावलितत्वमिवातआह
नहीति· ननुरामस्यकुतोनापराधोऽतआहस्वभावोहीति· अप्रस्तुतप्रशंसैवात्रेतिमतंनिराचष्टे अत्राप्रे
तितैषांच· अवांतरवाक्यध्वनीनांच अस्येअपस्मारस्य· विज्ञोभेति अपस्मारत्वेनेत्यर्थः वीभत्सत्याद्यु
क्तिस्वारस्यमाहविप्रेति· अस्यापिचअपस्मारस्यापिअंगत्वमित्यस्यानुषंगः कंपमानः श्वसनिति·
श्वासजन्यकंपवानित्यर्थः चमत्कारइतिमत्कारश्वेत्यर्थः अहितेतिनाहितंव्रतंभगवदनुरक्तिरूपंयस्य
तत्त्वंवुद्धिः अतएवपापा· त्मनप्रह्लादः· भावितइतिउत्पादितइत्यर्थः अवतादिभिरिति· आदिनावि ३९
रहादयः यदीतिभगवतोरामस्योपभुक्तिः सामीता· जडेतिअचेतनजीवितेनेत्यर्थः विफलेन· विरु

दृफलेन· ननु कुत्र निर्वेदस्याधिकत्वं शान्तरसस्य ध्वनित्वमेवात आह निस्सेति· असौ निर्वेदः भवदिति वि
हेतुप्रतिभक्तोक्तिः हे क्षपितमुरमुरजित् जयविजयौ द्वारपालौ ते अनिर्वचनीयप्रभावास्ते भवद्वा
रि भवल्लेत्रपातोत्कंठया कीटा इव विनिष्ठेत इत्यन्वयः काकादीनां नाभिव्यज्यत इति· धनाद्य
भिलाषेणापि तदुपपन्नेरिति भावः इतीत्यस्याभिव्यज्यत इत्यस्यानुषंगः चेतपद्यपि· नन्वस्या अ
प्राधान्येन कथं तत्त्वमत आह देवेति· अस्य· भावस्य· अंतर्भावे हेतुमाहात्म्यात इति· ननु सूक्ष्म
भेदप्रयुक्तभेदः कुतो नात आह मुनीति संचारीति षष्ठ्यर्थे सप्तमी· तत्र निरूपणीये रसाभासे· य त ३
त्र विभावादेः· तेषां लोकानां· आदिना गुरुपत्न्यादिसंग्रहः तत्रैयोः तस्यादिति· तथा चानुचितविभा
वालंबनकरतिस्त्वं तत्त्वे हेयं· आदिना हास्यादिपरिग्रहः इत्थं च तथाविशेषणे च· इतिरपरमतसमा
प्तौ· चस्त्वर्थे· तत्र रसाभासेषु· आदिना भावपरिग्रहः निर्मलस्य निर्दुष्टस्य· हेतुत्वेनेत्यस्य न तमा

५० नाधिकरणमित्यस्यानुषंगः नन्वत्र मतेर्दुष्टो हेतुरिति बहुष्टोरसदृस्यादिव्यवहारानुपपत्तिरतो मतांतरमाहु
50 नहीति· आत्महानिः स्वरूपहानिः अभ्याभासेति· अभ्येइतिभावः सौधेति· सुधानिर्मितराजगृहोपरि
तनप्रदेशमित्यर्थः फेनस्यात्यंतस्वच्छत्वादुक्तिः पुष्पशयने· पुष्पशय्यायां· अहहेतिशंकायां· अनु
चितेति· अनुचितः प्रणयोयस्यामित्यर्थः यस्याइतिना· इदमाद्योदाहरणमित्याह निषिद्धेति· अ
स्याः नायकनिष्ठायाः परेत्यस्यविबोध्येतिबोधितेत्यादिः स्पर्शेतिस्पर्शहेतुत्रासेत्यर्थः अनुभयेति·
नायके सत्त्वेपिनायिकायामभावादितिभावः हेतुरितितथाच तृतीयोदाहरणमेतन्नाद्यस्येतिभा
वः समाधत्ते अस्याश्चेतिचोपत इत्यर्थे· व्यनक्तीत्यत्रास्यान्वयः रतिमिति· नायिकासंबंधिनीरति
मपीत्यर्थाः हर्षसमुच्चायकोऽपि· नन्वेवं विनिगमनाविरहोऽत आह परंत्विति· नायिकानिष्ठातु ५०
स्मेरेतिपदमात्रव्यंग्यत्वान्नवाक्यार्थः तथाचाद्योदाहरणतास्यस्तुस्येतिभावः द्वितीयोदाहरणमा

हृपयवावेति· भवनं स्पृहं· विज्ञानापतदंगीकारायतेषु तरुणेषुः करुणायामन्वयः परमेत्यस्य तरु
णसंबंधीत्यादिः वक्तिति तरुणेष्विति वक्त्रित्यर्थः तृतीयोदाहरणमाह यथावेति· भुजेति रूपकं· उपे
ति आभासत्वमिति शेषः प्रथमोदाहरणसंग्रहायाहात्रेति· अत्र वक्ष्यमाणोदाहरणे· किं रसो
वा तदाभासो वेत्यर्थः स्फारिताः विस्तृताः प्रथमोऽइत्यनेन पूर्वं दर्शनाभावः सूचितः सभक्तित्वमि
त्यादि दृष्टिती यांतानां व्यंजयंतीभिरित्यनेनैकान्वयः भाम एवैतस्य व्यंग्य इति शेषः एवेनासत्यव्यवच्छेदः १५
ग्रोवस्त्विति अत्रारुचिवीजं तु रत्यनौचित्यस्यापरिणीतेश्वात्रापि सत्वं न हि लक्षणे तथा निवेशोऽस्ती
ति· तत्र रसाभासा नामध्ये· एकं स्पणमिति पूर्वान्वयि अपरमुत्तरान्वयि· ननु सीतायास्तद्भावे पि
लं के शेत तत्त्वमत आह जगदिति· उक्तिसिरिति यथाक्रममिति शेषः तथैव जङ्करुपत्तीवि
षयकतयैव· प्राधान्येनेति तथा च न तङ्गावाभासध्वनित्वमिति भावः कलहशीलेति· अवी

५१ न रागादिविषयमिदं अत एवाह वीतेति· कदर्यो निंद्यः कातरो भीतः एवमेव रसो भासतेव देव· खेदक
लितारिवद्व्यामा· विनिर्गमनादिरहाराहान्नेष्येति· अत्र च स्वात्मत्यागेति· विषयविद्योभयकर्तृ
कस्वत्यागे न विषयविद्ययोः कृतघ्नत्वं नाधिकाकर्तृकस्वात्यागे न चास्यां नाधिकायां लोकोत्तरत्वमि
त्यर्थः एवं स्मृतिमेव पुष्णातीत्यर्थः सचनाश्चश्च· उत्सवच्छिन्न एव उत्पन्नत्रिकालावच्छिन्न एव· मुदि
तालिर्मेघः नाशास्य साक्षात्कार्यत्वाभावादाह तदभीति· ननु ततः किमत आह चमत्कारेति· एवं
चमत्कृतो यत्र चमत्कारस्तत्र तद्व्यवहार इति भावः सामानाधिकरण्यमिति· एकदेशवृत्तित्वविशि
ष्टैककालवृत्तित्वरूपमित्यर्थः स्वस्वभेदस्तु अकिंचित्कर इति भावः शबलतायां तु एकदेशवृत्ति
स्वरूपमेव सामानाधिकरण्यमिति विशेषः नाट्यस्यैव· लोकोत्तरस्यैव· एकेति· एकं यत्तोहं संज्ञा ५१
नं वा मार्थवो धर्मस्तद्विषयत्वमित्यर्थः पापमिति· अत्र पापमित्यनेन नमतिः हंते त्यादिना असूया

महा

सीतापीत्यादिनाविषादः सेत्सनेनस्मृतिः मामित्यादिनावितर्कः आलोकैर्येत्यादिनाव्रीडा किंतरइत्या
दिनाशंकाः राज्यमित्यादिनानिर्वेदइतिबोध्यं· पत्रैर्लकश्चिदितिशंकाचलचपलैरेइत्यस्याका
लैरेतिधृतिः अहंकुमारीतिस्मृतिः हल्लालंबंवितरेतिश्रमः हहहेतिदैन्यं· ग्रुक्रमइतिदैन्यंकासी
तिमतिः यासीत्यौत्सुक्यं· औत्सुक्यानामितिमध्येपूर्वपूर्वस्यान्तरोत्तरेणेतिशेषः मूलकृतैवप्रका
शकृतैव· तत्त्वेथाहनवेति· तत्त्वेथाहनापीतिअत्रचसहृदयहृदयमेवप्रमाणमितिभावः उपसंहर
तितस्मादितिचूर्णिकेयं· संहतो· मिश्रेणे·भावशांत्युदेति· भावसंवंधिशांत्यादीनांध्वनयइत्यर्थः स्य
तौतद्विषतेष्वेवभावेष्वेवं· तस्याः प्रधानतापाः ननुतत्रतत्कृतश्चमत्कारोनतुएतत्कृतइतिवैषम्यमम
तआहकिंचेतिसामान्येनोक्तमर्थंविशिष्योपपादयतितथाहीतिअंचतीतिसमर्मीअत्रवक्रिणो
तिनेति· उदुपसर्गपूर्वकेणणाधातुनेत्यर्थः शंकोतउदयेति· नोपयिकत्वेः प्रधानेस्यत्राकारप्रश्ले

५२ षः मुदयस्थले दोषंदत्वाशांतिस्थलेतमाह एवमिति· एकपदयोः असाधारणस्थानयोः पततीति स
५२ प्तमी· उभयपत्रशंकतेनन्विति· वाच्यान्वयेतिसकलपदानामितिशेषः वाच्यैः प्रशमादिभिः व्यंग्या
न्वयेति आरूप्यव्यंग्यदोषान्वयेस्यर्थः अन्यथा तदंगीकारे· नस्यात दोषोदयेस्तुदृक्कृत्वस्यबाधात्त
थाच दोषप्रशमादिध्वनित्वं सुस्थमितिभावः मां निर्वासयंती दूरीकुर्वंती मांसलः पुष्टः क्षणदा
द्युणिकोः तिथिः शंकते उभयोरपीति× एवमपि उक्तदोषद्वयाभावेपि× प्रधानाप्रधानयोरपीत्य
र्थः अन्यथा तदंगीकारे· नस्यात दोषोदयेस्तुदृक्कृत्वस्यबाधो पद्यद्वये· उषसिक्षमापेसत्रेस्यर्थः
६६३ संश्लेषानामिति अत्रशास्त्रे तेषामेवमुख्यप्रमाणत्वेनोरीकारादितिभावः अपिर्भविष्यतीति स
मुच्चायकः नन्वेवं वैलक्षण्यानापत्याभेदेनोक्तसंगत्यापत्तिरतआह इदंपुनरिति· पदैकत्वंशुद्ध ५२
भावध्वनौ· विशेषणस्याव्यापर्तकत्वादिदोष्यमात्रकृतचमत्कारात्वाहामर्षादित्वमेवेति·

अन्यत्रभावशांत्यादिध्वनौः इतिर्निदानसमामौ· ननुभावशांत्यादिवद्रसशांत्यादिः कुतोनो

स्य २ दाहृतो· तआह रसेति असंभव इति· तत्त्वस्याधिस्त्वानुपपन्नेरिति भावः नन्वभिव्यक्तिना

शादिरेव प्रशमादिः तआह संभवेति। त्यादिलक्षणः रत्यादिरूपः समयेनकालेन· हेतिति·

विभावादिरत्साद्यो रित्यर्थः प्रकरणस्य स्फुटत्वेथाहौन्नेयावेति· अत एव तन्मात्रत्वाभावादेव

अस्योभयत्रान्वयः देवर्षौ नारदे· पितुः हिमालयस्य· तथापि ध्वन्यमानत्वमात्रत्वपि· अनुर

णनभेदेति ध्वनिभेदेत्यर्थः तदेत्यादिः रसी भवति अरसो रसः संपद्यते· एवव्यवच्छेद्यमाह नसं

लक्ष्यति· एवमग्रेपि· तेषामभिनवगुप्तादीनां ग्रणनेन· व्याख्याकारैः। तिशेषः उपपत्तिस्त्व

र्थे इति· विभावादिप्रतीतेरसप्रतीतरसप्रतीतेश्च विद्यमानस्य सूक्ष्मकालांतरस्वरूपस्य क्रम

४३ नै१ 43 ससहृदयेनाकलैतस्य विगलितवेद्यांतरत्वानापत्त्या रसत्वभंगापत्तिः विगलितवेद्यांतरत्वंच सक
लसहृदयानुभवसाक्षिकमितितवापिसंमतमितितदुपपत्तिर्वाच्या· नव्यास्तुवक्रवैशिष्ट्यप्रकरणा
दिज्ञानसहितस्यैवव्यंजकत्वात्तत्सहितविभावादिज्ञानोत्तरंजायमानरसप्रतीतेर्विभावादिज्ञानापे
क्षयाविद्यमानक्रमालक्षणेनचालक्ष्यक्रमत्वं· तच्चप्रकरणादिज्ञानविलंबेनविभावादिज्ञान
विलंबेपिपूर्वोदाहरणेऽक्षतमेवनहिविभावादिज्ञानस्यतज्जनकस्यचक्रमममादायालक्ष्यक्रम
त्वंअपितुतज्जन्यस्यएतदेवाभिप्रेत्यार्थशक्तिमूलसद्वादशभेदाइत्यभिनवगुप्तोक्तिः· यत्
किंचित्वाच्यार्थापेक्षयाक्रमोपिदृश्यतेऽत्वभिप्रेत्यलक्ष्यक्रमत्वोक्तिर्यथाकथंचिन्नेया· न ४३
हिविभावादिप्रतीतिरहितयात्किंचिद्वाच्यार्थमात्रप्रतीतौविगलितवेद्यांतरतासहृदयानुभव

२ यथेति प्रतिपादितमधस्तात् अभ्यर्हितत्वाद्वचनाशक्तस्य पूर्वनिपातः कोटीति रचनाविशिष्टपदत्वादिना व्यंजकत्वमिति भावः इतिद्वतत्रः धातुद्व
विति दंडविशिष्टचक्रादेश्च क्रादिविशिष्टदंडादेर्वा कारणत्वमित्यत्र विनिगमनाविरहेण यथा कारणतायाः प्रत्येकपर्याप्तिस्तथात्र व्यंज
कतायाः इति भावः नव्यमतमाह वर्णेति इंद्रियत्र पद्मनि घ्राणरसनश्रोत्रे इत्यर्थः। इत्यादिचेति प्राकृतमेवेत्यस्यानुषंगः योगोनि प्रथमा
द्विवचने यथासंख्यमन्वयः निदर्शनानि उदाहरणानि पूर्ववदुदाहरणं भावस्य त्वेऽप्रहमत्रीति भावस्य २

दि१ साक्षिकायेनतत्क्रमग्रहणेऽपि रसत्वहानिः स्यात्याहुः रसभावादिरर्थइत्यत्रेति अभिनवगुप्तवाक्ये इत्यर्थः
अन्यथा तदसंगतिः स्यादेवेति भावः कस्यचिद्देवषदस्य नद्यंग्य संबंधि प्रबंधादिरूपव्यंजकस्य उदाह
रणानीति शेषः पदैकदेशस्य चेति चस्त्वर्थः उदाहरणमिति शेषः वीररसस्येत्यस्य व्यंजक इति शेषः
रागादिभिरपीति रसस्येति शेषः वक्ष्यंते इत्यत्रोदाहरणानीत्यस्यानुषंगस्तस्य चाग्रे नामनीति रसव
दित्यत्रेत्यर्थः इति प्रथमानन प्रकाशः तथाभूतेनैवेति वस्त्वलंकारात्मनेत्यर्थः अन्येषां भेदा
नां संग्रहायाह प्रतिभेतित दुंभिनेति तन्निबद्धेत्यर्थः तस्यापि उंभितोंभितस्यापि प्रतिवेद्यास्तमा
धत्ते प्रथमोभीति पृथग्भेदेति वस्तूक्तिविषयाच्छिन्नस्ति विषयश्च वक्तृवक्त्रुक्तिविषयात्स्वविनिबद्धोक्ति
विषये च मत्काराधिक्यानुभवित्वात्पृथगुक्तिः ततः पंचप्रणिधान साध्यप्रतीतिकतया चमत्कार
स्यगनाल्लोंभितोंभितादेः पृथग्गणनेति तु नव्याः साकल्येन मिलित्वा अयं संलक्ष्यक्रमध्वनिः

१ अपेत्यर्थः प्रतिबंधकसत्वादिति भावः तदाह गवादीति नानाशक्तिरिति मातामिश्रा
येणाशंकते अथेति तथापि प्रतिबंधकसत्वेपि तस्य पूर्वशक्त्याउनरनुपस्थि

१ तन्निर्णये। तात्पर्यनिर्णये। तदात्मकपदेति। तात्पर्यग्राहकपदेत्यर्थः १

४४ तस्यनष्टत्वादाहतदधीनेति द्वितीयेतिगवादिविनैतत्वंजएननप्रयोगेपिव्यापारोनिष्फलइतिभावः ज्ञानस्य
सुपलक्षणंतात्पर्यनिर्णयस्यापिएवमग्रेपि अनुपरमात्अनाज्ञातसत्वादितियावत् शक्तेर्नानात्वेन
मानंसत्वेपिवातत्संकोचएवेतिभावः अन्यथा तत्सत्वेपितदंगीकारेः व्यंजनांगीकारेप्यनिर्वाहइति
शंकतेनचेति नाहत्वेतिद्वितीयेत्यर्थः व्यक्तापिव्यंजनयापिः नाहत्वेतिअर्थांतरोपस्थापकेत्यर्थः तद
जन्येतिव्यंजनाख्यवृत्त्यजन्येत्यर्थः विनिगमनाविरहादाहव्यक्तिज्ञानस्येति बोधकताविशेषः शक्ति
स्तद्विशेषोलक्षणातद्विशेषएवचव्यंजनेत्यालंकारिकसमयः तज्ज्ञानंचशाब्दबोधेहेतुरित्यभि
प्रायः उक्तंकाव्यप्रकाशाकृतेतिभावः प्रथमं तात्पर्यनिर्णयात्पूर्वं तस्मिन् तात्पर्यनिर्णये इति पूर्वो
क्तार्थस्याग्निमनिषेधद्वयेहेतुत्वबोधकः नावश्यमितिननियमेनेत्यर्थः अव्याप्यानेकस्यत्वेतुअपे ४४
क्षैवेतिभावः प्रथमं तात्पर्यनिर्णयात्पूर्वं तस्मिन् तात्पर्यनिर्णये इतिः पूर्वोक्तार्थस्याग्निमनि

वीचारितार्थ्यात्तत्पत्रा

(विधद्वयेहेतुत्वबोधकः नावच्छमितिननियमेनेत्यर्थः व्यंग्यानेकस्थले तु अपेक्षैवेतिभावः तात्पर्यज्ञानमपे)
(क्षतेइतीतिधर्मिग्राहकमानेनतस्यास्तथैवसिद्धेरितिभावः इतिपरमतसमामोक्तिश्चेत्तस्यकथंसंगच्छत
३२ इत्यस्यानुषंगः इत्यपिवदंतीतिअपरेत्वितिभावः तादृशेतितात्पर्यज्ञानात्मकेत्यर्थः सत्वादितितथाचतेन
संबंधेनतत्त्वत्वमितिभावः परस्यापीति· नसोऽस्तिप्रत्ययोलोकेयः शब्दानुगमादृते· अनुविद्धमिवज्ञाने
सर्वंशब्देनभासतइतिहर्युक्तेरितिभावः परिवृत्तीति पर्यायांतरेणाबोधनादितिभावः अत्र· मतमत
द्वय· तत्राद्यमतेआहमन्नावदिति· ननुतात्पर्यज्ञानस्यतत्रैवोपयोगइतितदावश्यकत्वमतआहापरेति·
तदुपस्थितेरपिअपरार्थोपस्थितेरपि· ज्ञाकतः नैवेतिः ननूपायस्योपायांतरादूषकत्वात्साप्युचिताऽत
आहानुभवेतिप्रकारेणेतिप्रकरणादीत्यर्थः अपिनातदज्ञानिसमुच्चयः अतएवतस्याअनुभवसिद्धत्वा
देवः विपक्षेबाधकमाहयदिचेति· अनुपस्थितजलादिइतिहेतुगर्भविशेषणंतदुपस्थितेरेवाभावादि

४५ तिभावः तस्याने· व्यक्तिनुबोधस्थाने· तत्कल्पनं तात्पर्यज्ञानकारणताकल्पनं· कार्यकारणभावानंगीका
45 रे नियमभंगमाहात्म्यथेति· अतथाभूतस्य· अतात्पर्यविषयस्य· अनंतरांत्विति बोधादित्यग्रे ऽन्वेति· युग
पत् इति शेषो बोधस्येत्यस्य बोध्यः तत्तात्पर्यज्ञानं वाच्य इति तद्रूपवाचोयुक्तेरित्यर्थः द्वितीय इति· ना
नार्थस्यलेक्षकचिदेव व्यंजनोल्लास इतीत्यर्थः शाकतेव्यंग्येति· तथोहेतुः नन्वेवमपिफलवलात्स्वीकि
यते ऽत आह यत्रेति विरहादिति दोषप्रतिपादनेनात्पर्यादिति भावः तत्तानस्यकवितात्पर्यज्ञानस्यः
ताहशेति व्यक्तिजे इत्यर्थः व्यभिचारेति व्यतिरेकव्यभिचार इत्यर्थः शक्तिविशेष इति वुद्धिशक्तिविशेष इ
त्यर्थः सः शक्तिविशेषः नियंत्रितेत्यस्य प्रकाणादिनेत्यादिः अभ्युपेत्याह किंचेति विनिगमनाविरहा
दाग्रहीतेति· सर्वथैव· सर्वप्रकारेणैव सिद्धांतिरित्यादिः तपेति व्यंजनेपेत्यर्थः तदापतितः द्वितीया ४५
र्थबोधापत्तिः एतदोपाद्धार्यशंकतेनचेति· रमणेति नायककर्तृकरतीत्यर्थः सतिवेतिनायकेच्छ क्लि

क्तिग्रहसत्त्वादितिभावः तेनैवेतिशक्तिग्रहेणैववोधोपपत्त्याविस्यर्थः एवंजातीयकः येनेशब्देनेत्या
द्युक्तः तेथाचनि· शेषस्यादौनदोषइतिभावः नन्वन्यथानुपपत्त्यागौरवंस्तुसहमतआह नियंत्र
णेति· तद्धेतोरिति· व्यक्त्युल्लासहेतोस्तदर्थगतशक्तिज्ञानस्यैवतदर्थबोधजनकत्वमस्तु किंव्य
क्त्युल्लासजनकत्वेनेत्यर्थः अपि: प्राकरणिकार्थसमुच्चायकः तत्रेत्यस्येत्यादाविस्यनेनान्वयः
जैमीति· जैमिनिप्रोक्तंपूर्वमीमांसाशास्त्रे अलंपरिपूर्णंधत्ते इत्यस्यैकोर्थः जैमिनिप्रोक्तशास्त्रा ६६
ध्येतॄणांतल्लंविघ्नांधत्ते इत्यपरोर्थोनिंदितः गामितिसौधानामितिचभिन्नपद्यार्थौ· गामित्यस्य
यतइत्यादिंसत्वेनेति· बाधज्ञानंशाब्दज्ञानेनप्रतिबंधकं अयोग्यतानिश्चयश्च· एवंयोग्यताज्ञान
मपिनकारणं आहार्यबाधेइत्यादिपत्तेग्रेमूलेएवस्फुटः अन्यथा· तत्रैवयत्नानुसरणाभा
व· सर्वेष्विति· गामित्यत्रव्याजोक्तिः सौधानामित्यत्रसंबंधातिशयोक्तिः एवमन्यत्रापिबोध्यं· ना

५६ थार्थस्य शब्दस्य सामंजना तथाचोपमाया अर्थापत्तिवेद्यत्वस्यापि संदिग्धे संदिग्धवचनं वेदाः
56 प्रमाणं पदीतिवत् ताहृशाद्वितीयार्थमादाय वाक्यार्थस्यासंबद्धार्थकत्वं माभूदिति कल्प्यमा
नोपमाया अर्थापत्तिवेद्यत्वस्यापि संभवइत्यत उक्तं कदाचिदिति अपहरणं बाधः योगार्थेति
योगशक्तीत्यर्थः अबलेति विद्युतो मेघैः सह नायिकानां शोभाम् अपहृत्य यत्र तिष्ठंति स कालः स
मागत इति वाच्यार्थः तस्य अर्थान्तरस्य अन्यथा तदप्रतीतौ तद्घटितस्यैव प्रतीताविति यावत्
अतएवेत्यस्यार्थमाह रूढ्यर्थेति तस्याइति योगशक्तेरित्यर्थः ननु फलबलात्तथा कल्प्यते अत आ
ह पुंश्चलीति आदिना पुरुषत्वरतित्वपरिग्रहः योगरूढस्योदाहरणांतरमाह यथा वेति तद्गुणे
ति त्वं चाल्पगुणाधिके इत्यर्थः तस्याः स्मरति शोभाया स्तिरस्कार इत्यर्थः जलजनयनमृगीति इ ५६
त्ययोरेकाज्जड जलेन नष्टः खं पुत्राणामित्यस्य स्पन्नयनीति नयनमित्यनेन नेतृत्वेन चारादेरित्यस्य

मृगयंतीति मृगा इत्यनेन गवेषकाणामित्यस्य लाभः मृग अन्वेषणे इत्यदं ताच्छुरादेः पचाद्यच् अत ए
व योगरूढत्वाअलाभादेव एवमग्रेपि· ईशान इत्यस्यांगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमक इत्यादिः कठव
ल्लीस्थमिदं अद्य वर्त्तमानकाले स एवास्ति श्वो भविष्यत्काले स एव भावितेत्यर्थः जीव एवेति· अं
गुष्ठपरिमाणस्य लिंगस्य ब्रह्मण्यसंभवादिति भावः स्तुत्यितमिति सिद्धांतार्थमिति शेषः स चेत्थं परमा
त्मात्र प्रतिपाद्यः प्रमितः कुतः शब्दादेव ईशानो भूतभव्यस्येत्यत्र ये ईशान शब्दात् न हि जीवे ईशान शब्
द आंजसः लिंगश्रुतेर्विरोधे श्रुतेः प्राबल्यात् एतत्सूचनार्थमेवैवकारः अंगुष्ठमात्रत्वं तु अंगुष्ठमा
त्रजीवानुवादेन ब्रह्माभेदप्रतिपादनान्नानुपपन्नमिति· ननु शाकावेद्यत्वेपि अन्यत्र क्लृप्तलक्षणा
वेद्यत्वमेवास्तामत आह यथेति· तथा च मुख्यार्थबाधरूपलक्षणाबीजाभावान्नैवेति भावः ननु ए
वं तथापि कथं निर्वाहोऽत आह तात्पर्यार्थेति· ननु यत्र तद्वाक्येन तदर्थान्वयबोधात् प्राक् प्रका

४७ रांतरेणतदर्थवक्तुस्तात्पर्यग्रहस्तत्त्वास्तुनामकाकेभ्योदधिरक्ष्यतामित्यादौतात्पर्यानुपपत्त्यालक्षणाग्रह
47 तेतुनतथेत्याहनत्वपहर्तुंव्यवहारइति·अस्मात्·व्यंजनरूपात्·ताहशेतिअन्येत्यर्थः·अवतरंपवाच्यमे
तिअर्थापत्तेःप्रमाणांतरत्वेमानाभावादितिभावः·क्लिष्टेति·पूर्वोक्तेत्यर्थः·तत्रनिरूपिताःव्यंजनायां
नैःप्राचीनैस्तत्रसंयोगादीनांमध्ये·मात्रपदेनविशेषणदलसत्त्वात्सूचिता·भगवतिविह्लोक्रमेण
दलद्वयकृत्यमाहनत्वायुधेति·असोसंयोगःलिंगत्वात्तत्वेनग्रहणात्·तथाचविशेषणदले
नियमेनेतिपूरणीयमितिभावः·तयोरेवशंखचक्रयोरेव·तथाअभिधानियामकः·एवमग्रेपि·
अतिप्रसंगवारणायाहाश्वेति·तेनसंश्लेषपूर्वकस्यैवतस्यग्रहणमितिनातिप्रसंगःप्रागवत्तत्कृत्य
माहतेनेति·गुणतयाप्रकारतया·ताहशेतिदलद्वयाक्रांतेत्यर्थः·अलंसमर्थः·विश्लेषस्यनियाम ४७
कत्वेकल्पनजगौरवादाहयद्वेति·केवलत्वेनशुद्धसंयोगत्वेन·रामशब्दस्य·राघवेअभिधानिया

मकमितिशेषः ऽनिवारणेतिसर्वकार्यंतदभावादितिभावः पक्षद्वयेपीतिकार्यमात्रेतयोस्तदभावा
त् आद्येः संभवात् अंसेतदारघोरसत्वादितिभावः प्रसिद्धइतिनानार्थपदार्थइतिशेषः तत
साहचर्यं नक्रसंबंधानाक्रमेणोदाहरणान्याहतेनेति· यत्रसद्रोरवचक्रइत्यादाविसन्वयः आ
द्यस्यसंयोगस्य· यत्रचराम लक्ष्मणाविसादौ· संबंधांतरं एकजनकजन्यत्वादिरूपं· तृतीयस्यसा
हचर्यस्य· संबंधिमात्रेशब्दोपात्तमित्यनुषज्यते: मात्रपदव्यवछेद्यमाहनत्विति गुणयोःप्रतीत्ये
तिअसंभवादितिभावः किंतुसाहित्यतदभावयोःप्रतीत्येतिशेषः आद्यस्यसंयोगस्य· संबंधयेति·
दंद्वादिघटकः केवलः संबंध्येवतथाप्रसिद्धः शब्दोपात्तइत्यर्थः भावेतिभावरूपविरोधादित्य
र्थः तत्परशुरामेत्यर्थः तस्मिंश्चमतिकार्तवीर्येऽभिधानियमनेसति· ततकार्तवीर्यत्यर्थः राम
पदस्यपरशुरामेऽभिधानियमनमितिशेषः व्यवस्थितेतिनिश्चितेत्यर्थः नियामकत्वमित्यस्या

४८ दाहरणमित्यत्रान्वयः एवंस्थितेपि· साहचर्यस्यनियामकत्वसंभवेपि· नथापृथक्· तदुक्तंअथदीक्षि
48
तोक्तंतसिद्धांतंखंडयतिअन्यतरेति· हरीतियथांच विरोधः श्वाश्वतिकइतिसमाहारेकवद्भावः अतए
भ८३ वाहेकवद्भावाभीति· सएव· अप्पदीक्षितएव· भूतमित्यत्रेति· निषधपदसांनिध्यातभूभृत्पदस्यरा
ज्ञिदोमपदसांनिध्यान्नागपदस्यगजेऽभिधानियमनं· अर्थांतरविषयत्वेपीति· रामार्जुनवत्सराक्र
मशालित्वमित्याद्यर्थांतरः एवमपिदीक्षितोक्तसंगत्यपि· स्थितेयेति· दीक्षितोद्भावितान्योन्या
श्रयस्यानुद्धारादितिभावः तदर्थेतिउदाहरणार्थेत्यर्थः प्रस्तावः प्रकरणंसुगपादितितथाचनान्यो
न्याश्रयइतिभावः नियमाधीति· तन्नियमाश्रयस्यप्रक्रांतत्वेएवप्रकरणस्यनियामकत्वमितिभा
वः द्वितीयावैरोधितोदाहरणमाहसहेति· आदिनातुमुनादिपरिग्रहः छेदनादीत्यस्यप्रयोजनमिति ४८
शेषः भवे· अभिधानियामकमितिशेषः अतछब्दाः त्रिवपराः कोष्ठाहृत्तीत्यनेनानन्यसाधारण

त्वं स्मृचितं·उक्तस्य भवच्छेदजनकभजनकर्मत्वस्य·शाब्देति·भवच्छेदफलकचैत्राभिन्नकर्तृक
स्याणुकर्मकभजनमित्यस्यैवशाब्दबोधत्वादिति भावः प्राचीनाशयं स्वचकंमतांतरमाह लिंगमि
ति एकपदार्थ इत्यस्य विवरणेवदार्थांतरेणानन्वित एवेति एवं चासमस्तारंवुडेकपदार्थोलिंगमि
ति फलितं·भवच्छेदनादिकं च भजनादिरूपभिन्नपदार्थान्वितमेव भवधर्मइति भावः कोपादि
रातिकुपितो मकरध्वज इत्यादौ·उक्तेति·भवच्छेदजनकभजनकर्मत्वरूपस्तु भजनादिरूपभिन्नपदा
र्थान्वित एव भवधर्मेणानन्वित इत्यर्थः अत्रारुचिः स्फुटीभविष्यत्यनुपदमेव·युष्मदर्थे·शक्ति
नियमनमितिशेषः एवमग्रे सर्वत्र·नन्वेति नहीत्यर्थः अर्थांतरेति हस्तसर्पेत्यर्थः·प्राचोक्तं ख
ण्डयति देवस्यत्यादिवदंतीसंतेन·अर्थांतरेति भूपनगरारिरूपेत्यर्थः·तस्य·पुरारातिपदस्य·
देवेतिसुरेइत्यादिः पदांतरेति त्रिपुरांतेरीतीत्यर्थः अस्य·देवस्य त्रिपुरारातेरित्यस्य·वदंतीति

राा

५९ स्मूचितामरुचिमाहतत्रेति· देवस्य त्रिपुरारातेरिति पाठ इत्यर्थः· प्रकृते चैवैरित्वं त्रिपुरासुरएवान्वित
59 मेव शाक्तं । तत्र व्याहतत्वमतो न दोष इति भावः वस्तुतस्तु त्रिपुराराति पदस्य योगरूढत्वेन रूढ्यर्थान्वि
तत्रिपुरासुरवैरित्वस्यैव प्रकृतशाक्ये धर्मत्वं शाक्यांतरव्याहतत्वं च योगमर्यादयोपस्थितपदार्थापेक्षया
रूढ्योपस्थितपदार्थस्य भिन्नत्वं स्पष्टमेव तु धियां केवल त्रिपुरासुरवैरित्वस्य तत्प्रतीयमानभूभृत्त्वपिस
त्वेन शाक्यांतरव्याहतत्वाभावाच्च· एवं चैकपदार्थ इत्यस्य यथाश्रुतत्वमेवास्तीति बोध्यं· नोक्तेदोष इ
ति शब्दांतरसंनिध्युदाहरणत्वाभावरूपदोषो नेत्यर्थः अव्यभिचरितस्य· अर्थांतरप्रत्यापकस्य· गवे
षणे अन्वेषणे· तन्मूलोक्तेप्रकाराकारोक्तेः मधुनः मघस्य· वदंतीति स्मूचितामरुचिमाहतत्रेति· म
धुनेस्युदाहरणविषयभूतमित्यर्थः मारने करणे ल्युट्· वाचकत्वेति शाक्तीत्यर्थः असाधारणत्वाभावा ५९
दिति भावः द्रष्टापत्तावाहत्यास्तीति· अप्रच्युतमतिको किल मारनसामर्थ्यस्य वसंतेएव प्रसिद्धेरिति

भावः शाब्दः त्वाञ्शाब्दस्ताभ्यामिति· मधुर्यकेणकमदाश्रयः कोकिलइतिहितत्त्वबोधः शाब्दः कुपितोम
करध्वजइत्येतत्रतुकोपाश्रयाभिन्नः कामइत्येवतथेतिभावः एवंभेदस्यभागेनुक्तत्वात्तत्रापिकोपसाध
नोल्लेखस्यसुवचत्वाच्चाहेकानेकेति· आक्षिप्तेतिविशेषरूपेणाक्षिप्तमित्यर्थः सांमुख्येन·संमुखत्वेन
तेनमुखेन·तदुक्तीतिअधिकरणोक्तीत्यर्थः एकत्र·आद्ये·अर्थान्तरेति·परमात्मवानरादीत्यर्थः आ
दिभ्यांरात्रिवस्त्रादिपरिग्रहः श्लोनेइत्यस्येत्यत्रापिबोध्यमितिशेषः· पुंनपुंसकेपुंनपुंसकलेसहस्त्रपर्यो
रितिमर्यसहस्त्रेशितिक्रमोबोध्यः पाठएवबेत्यं·नभाः श्रावणः एद्दहेति· एद्दहमेत्तस्यणिपाएद्दहमेत्तेहिं
अच्छिवत्तेहिं· एद्दहमेत्तावत्याएद्दहमेत्तेहिंदिअएहिं· एतावन्मात्रस्तनिकोएतावन्मात्रैरक्षिपत्रैः एता
वन्मात्रावस्थीएतावन्मात्रैर्दिवसैः· अर्थसामर्थ्येनअर्थयोग्यतया·यथासंख्यमन्वयः· बोधकवैचि
त्र्येति· पदार्थयोर्यः कार्यकारणभावस्तद्बोधकेत्यर्थः नियामकस्य· अर्थादेः वैचित्र्येणभेदेन·श्राचा

५० मितिसत्त्चितारुचिमाहवस्तुतस्त्विति· साधारणत्वे· सतीतिशेषः स्वारसिकत्वाभावेस्तुस्दोषधर्मोस्यर्थः
50 नियामकस्य· अर्थादेः वैचित्र्येणभेदेन· तदाहयथाकथंचिदिति· आनुकूरीस्या अर्थादीनामसंग्राहा
दाहआयशब्दइति· तेषामप्यंतर्भावसंभवादाहसर्वथैवेतिततः लिंगात्· तत्र त्रयोदशभेदानांमध्ये· अ
लंकारस्येत्यस्योपमेत्यादिः अविरलेतिसंततेत्यर्थः अवनीवलयः भूमंडलः धनदानामग्रे आदौ महि
तापूजितामूर्तिर्यस्य सः अत्रेतिहस्तवितरणदातृजनभूपेष्वितिभावः तन्मूलकेन· शब्दशक्तिमूलके
न· अर्थोतरेति द्वंद्वशत्त्रांतेस्यर्थः षष्ठ्यर्थेबहुव्रीहिद्वयं· करतलंऐरावतशुंडागंडस्थलं· धनदः कुबेरः
अप्रस्तुतस्यः असंबद्धस्य· मिथइतिअयमैंद्रीमुखंपश्यत्यादौ· व्यवहारस्यमुख्यचुंबनादिरूपस्य·
आरोप्येतिअन्यथाऽसंबद्धाभिधानंस्यादितिभावः इहापि· करतलेत्यादावपि· तथाचमध्यमका ५०
व्यत्वंनोत्तमकाव्यत्वमितिभावः॥ व्यंग्योपमेतिव्यंग्यरूपोपमयेत्यर्थः समासोक्तावपित्ऊक्तरूपायां·

अत्र च· करतलेत्यादौ· एवमग्रेपि· व्यवहारिणोजारादेः तद्रूपेति सार्वभौमेति नानार्थपदोपेसर्थः स्व
भावसुंदरस्यापि शृंगारादेः क्वचिद्गुणभावदर्शनादाह काव्यप्रस्तुदेश्यतयोचेति· अन्यथानानार्थ
शब्दघटितकाव्यकरणरूपकविप्रयासानर्थक्यापत्तिरिति भावः वस्तुमात्रे प्रकृतार्थेः यथा वस्तुमात्रे
णेति· वीररुद्रभट्टानन्दहृष्टाजपलक्ष्मीसमाहृतान्· रणेकर्षेस्परिवधूकेशांस्ते कंटकिद्रुमान्नृपस्यादावि
ति भावः तुल्येति उक्तहेतोस्तुल्यत्वादित्यर्थः अनलंकारत्वेऽवयवत्वं हेतुः अदृष्टेइति छेदः साद्दृश्या
श्रेन· तद्रूपोपमांगेनोपमानेन· उक्तमेवार्थविशदयतियतिर्यथेति· गुणीभूतव्यंग्यत्वापत्तेरिति· अयंभा
वः विशिष्टस्योपमाशरीरत्वेपि उपमेयांशस्यनव्यंग्यत्वं शक्त्यैवतस्याभात एवं च तदघटकव्यंग्यांश
स्यतदघटकवाच्यादनतिशयापित्वे न गुणीभूतव्यंग्यत्वं दुर्वारमिति· अत्र वदंति अलंकाराणामुद्दी
पनविधया रसाद्युपयोगित्वेनालंकृतापेक्षयाहीपनेऽधिकचमत्कारित्वस्य सर्वानुभवसिद्धतया करतले

५१ तिपदवाच्यालंबनविभावापेक्षयाअतिव्याप्तित्वातध्वनित्वमव्याहतमेव· रसाद्यपेक्षयागुणीभूतव्यं
51 ग्यत्वंत्विष्टमेव· समासोक्तौतुआगत्यसंप्रतिवियोगविसंष्ठुलांगीमितिसखीछिक्षावाक्ये· प्रकृतनाय
कवृत्तांताध्यारोपंविनातदनुपपत्तेर्गुणीभूतव्यंगत्वमिष्टमेव· यत्रतुतस्यापिरसाद्युपस्कारकतया
वाच्यादतिशयितत्वंप्रागुक्तरीत्यातत्रास्तुनामध्वनित्वंतस्याः नचैवमप्युपमाकृतौत्कर्षमादाया
स्तुध्वनित्वंअलंकारध्वनिरितितुकथमितिवाच्यंअलंकारकृतोत्कर्षध्वनावेवालंकारध्वनिरि
तिव्यवहारात्तद्इति· विनिगमनाविरहादाहास्यवचेति· प्रभेदस्यैवेत्यर्थः प्राचोक्तमुपमालंकारध्व
न्युदाहरणंखंडयतिअन्यच्चेति· किंचेत्यर्थः श्लेषभित्तिकं· तन्मूलकं· विधीयमानेइतिक्रियमाणे
३२ इत्यर्थः एकपदोपात्तत्वादन्यादित्यन्वयः ऍहतुउल्लासस्यादौतु· इति: पूर्वग्रंथसमाप्तौ· अलंका
रांतरमितिउपमातिरिक्तमपीत्यर्थः रवीतिसूर्यवंशप्रीतिंमनुष्यपक्षमुभयपक्षमहप्रीतिंअवाप्तिअ ५१

प्रतिवद्धप्रवाहा· क्षोभनं वार्जलं तत्संजातं यस्य ताहृशः प्रवाहो यस्याः सा· विरोधश्चेति अलंकारो ध्वन्यत इ
ति शेषः द्वितीयार्थस्य च· अप्रकृतार्थस्य च· तदेति अपि वो ध्यविरोध इत्यर्थः ननु निपातानां द्योतकत्वे
नोक्तत्वाभावात ध्वनित्वमेवात आह निपातानामिति· तथा च द्योतकत्वं विलक्षणमिति भावः न तथा
त्वं न ध्वनित्वं· प्राचीनोदाहरणे त्वां केतेन न्विति· ननु तादात्म्यवदुपपत्तिः स्याद त आह नामार्थ
योरिति· संसर्गत्वे तद घटकत्वे· तादात्म्यस्य संसर्गत्वं तु तंत्रांतरे प्रसिद्धमिति भावः ननु मतीत्यन्यथा
नुपपत्तिरेवमानमत आह पर्यंते इति· पर्यवसाने इत्यर्थः मात्रपदेन वाच्यत्वनिरासः अंतर्भाव्यः
मृणालेत्यादौ· शब्दशक्तिमूलालंकारांतरध्वनिमुदाहरति यथा वेति भगवत्सेक्षेऽधिकाप्रीतिर्यस
स द्विजराससमंतात परिपूर्णमंडलं यस्य निष्कलंकः पवित्र आत्मा यस्य सोयं भूयो भुविमोदतर इति प्र
कृतोर्थः कृष्णपक्षेऽसितपक्षेऽधिकरुचिः सदा सर्वकाले संपूर्णमंडलः निष्कलंकः कलंकशून्य

५२ आत्मायस्यसोयंमुविमोदतेइतिचंद्रवैधर्म्यात्मा॰प्रकृतोर्थः यद्वाकृत्स्नपक्षेपापकर्मणिअधिकरु
52 चिः सदास्तंयथातथापूर्णमंडलंयस्य॰ निष्कलंकंआत्मायस्यसोयमित्यप्रकृतोर्थः तत्रेतिअप्रकृ
तार्थप्रयुक्तव्यतिरेकालंकारइत्यर्थः व्यज्यतइतिशेषः उदासीनेरतिद्वेषाभयानाविष्टे॰ सतीतिशेषः
स्तव४ असंगतेइतिरक्तेरेवाभावादितिभावः ननुरागेविश्लेष्टकारित्वसंभवो॰तआहगुणीभूतेति॰ अन्यत्रे
तिशेषः अन्यथातथानंगीकारेनिरूपेतिउपादानसंभारः उपकरणसमूहस्तूलिकादिकंतद्रहितं
यथास्यात्तथाअभित्ताववभून्येएवचित्रंनानाकारंजगतत्वतेतस्मैअनिर्वचनीयस्वरूपायकलाचं
द्रस्यषोडशोभागस्तेनश्लाघ्यापमौलिनेमहादेवायनमः पक्षेचित्रमालेख्यंकलाआलेख्यक्रि
याकौशलंच॰ तैः प्राचीनैः राज्ञइति॰ हेवालेखंमस्यातिकूलादागत्तस्सकाशादुपस्थितंमहसां ५२
थस्यममभयंवासदानविधानतोवारयेत्सन्वयः वासश्चदानंचेत्यर्थः नेदापोहीतअभेदस्यर्थः

शुं

तथास्तु अनुरणनविषयोस्तु तथा च तत्रालंकारध्वनेरेवोदाहरणं न वस्तुध्वनेरिति भावः युगपदुल्ल
सिते उपमानोपमेययोस्तयोरित्यर्थः तस्य वाक्यभेदस्य· आछादकेति तद्रूपार्थेत्यर्थः आ
छाद्येति चंद्ररूपार्थेत्यर्थः शक्तिनियमेनेति भावः नास्ति तुल्यकक्षतेति· एवं चाछाद्याछादकभाव
नविवक्षितत्वादीदृशवाक्यभेदे इष्टापत्तिरिति भावः अत्र बाले इति पदे न व्यंग्यस्य वाच्यादुपमान
ताकरणादयोग्यमेतत्तत्र क्लिष्टिरिति· चो निर्ग्रहः अत्रानिर्वच्यं च· पुनस्त्वर्थे· उदार उद्भटः अनुदारः अ
नुगतदारः नृपदत्तैश्वर्येणाप्रवासात्· न उदारो यस्मादिति वा· पक्षे शनिः शनिविरोधी तज्ज्ञो·सु
रादाविव विरोधार्थकत्वात्· अनुदार उदारादन्यः शबलितमेव उक्तवस्तुव्यंग्यमित्यनुषंगः तदलं
कारसत्त्वे हेतुमाह शत्रुविरुद्धस्येति· विरोधित्वज्ञो·सुरादाविव विरोधार्थकत्वात्· अनुदार उदाराद(
(न्यः शबलितमेव उक्तं वस्तुव्यंग्यमित्यनुषंगः तदलंकारसत्त्वे हेतुमाह शत्रुविरुद्धस्येति· विरोधिशत्रो

विरोधांतरमित्रत्वादेकस्य विरोधिद्वयकर्तृकहननकर्मत्वायोगेन ताहृशाहननकर्मत्वयोरपि विरो
धादिति भावः राज्ञो विहतात्तत्त्वमादाय कोपस्यातिशयितत्वमादाय वा तत्परिहारः अत्रानिरस्तत्र न
न्वविरुद्धार्थके॰ इत्युक्तं न चैवं विरोधे॰ स्य कथं व्यंग्यता तन्मूलकहननकर्मत्वयोर्विरोधस्य व्यंग्यत्वे
नाक्षतैः तमादायैव च विरोधाभासः तस्यैव समाधानात्तनत्वनयोर्विरोधस्यास्य समाधानमस्ति एवं
नैकधर्मिगतत्वे एव विरोधस्यालंकारत्वात् अत्र विरोधालंकार इति परास्तं॰ तादृशाकर्मत्वयोरे
कधर्मिगतत्वस्य स्पष्टत्वात् अन्ये तु विरोधिनोरप्येकत्रानुसंभवान्न तादृशाहननकर्मत्वयोर्वि
रोधः इत्याह द्वितीयार्द्धं चानुगतदार इत्यर्थेन तत्परिहार उक्त एव इति दिक्॰ रणनं यथेति॰ स्वतः
संभवि वस्तुना वस्तु ध्वनिर्यथेत्यर्थः संमुखमिति तादृशाहननकर्मत्वयोर्विरोधः इत्याहुः द्वि ५३
तीयार्द्धं चानुगतदार इत्यर्थेन तत्परिहारोऽस्त्यस्य इति भावः आसन्नेति शीघ्रभाविनी या कमलाना

मुसन्निस्तद्व्यंजनेत्यर्थः अरसेति॰ अलसशिरोमणिर्धूर्त्तानामग्रणीः पुत्रिधनसमृद्धिमयः इतिज

ल्पितेन नतांगी प्रफुल्लविलोचना जाता॰ पतिंवरां प्रतिधात्र्याः परोचनोक्तिः पूर्वार्द्धं॰ उत्तरार्धं कविवा

क्यं॰ हे पुत्रि अयंवरः निरुद्योगश्रेष्ठः धूर्त्तश्रेष्ठः प्रचुरधनसमृद्धिः इति भाषितेन लज्जया नतांगी का

चित्कन्या हर्षविकसितलोचनाजातेत्यर्थः अत्रालसत्वेन नायिकांतरगमनं सूच्यते॰ धूर्त्तत्वे

न रतेष्वनाहतगुणत्वं धनिकत्वेन कृपणतया दातृत्वं च सचितं सत् अन्यासामनाकर्षणीयत्वं मना५

मदुपभोग्यत्वं च व्यनक्ति तद्विषयकं च कुमार्या ज्ञानं प्रफुल्लनयनत्वेन वस्तु स्वरे तु हर्षव्यंजनद्वारे

ण तत्कारणीभूतं सामाजिकेषु व्यज्यते केचित्तु अलसत्वेन धनिकत्वेन चाप्रवासित्वं धूर्त्तत्वेन

संभोगेष्वतन्त्रत्वं धनिकत्वेन नौनाधनदातृत्वमपि नतांगित्वेन नमस्कारः तेन सार्थमानिनी त्वं स्या२

प्रफुल्लनयनत्वेन हर्षः तेन ममैवोपभोग्योनाविदग्धायमिति वस्तुव्यञ्जनमित्याहुः तेषां विश

५४ षणानां निरूपितत्वेन कथितत्वेन· एवमग्रेपि· परीति अस्य कामिनीनिष्ठ स्फुरत्वादिति भावः तस्येति·
54 परिफुल्लविलोचनात्वस्य हर्षाख्यव्यभिचारिभावकार्यत्वेनेत्यर्थः कार्येण कारणानुमानस्य प्रसिद्धत्वा
दिति भावः विभावः कारणं· न तस्मात् एव हर्षोदयात्· नही त्वस्य वक्तुं शक्यमित्यत्रान्वयः तद्विभावेति भा
वविभावेत्यर्थः हि सूचितमशक्यत्वे हेतुमाह केवलस्येति विशिष्टस्य तत्त्वस्य सिद्धान्ते वक्ष्यमाणत्वादि
दं विज्ञेषणं विलोचनतायाः इति सत्वेन तस्याः इति शेषः अनैकान्तिकत्वात् व्यभिचरितत्वात्· इय
भणीति इति भणितेनेत्याद्युत्तरार्धस्य योर्थस्तद्द्वारेण प्रापितो यस्त्वाहश्यापरिफुल्लविलोचनात्व
रूपधर्मस्तेनेत्यर्थः तस्यैकपदावबोध्यत्वात् अर्थवशप्रापितेत्युक्तं· विभावेति हर्षभावविभाव इत्यर्थः
भावध्वनेः हर्षभावध्वनेः द्वारस्य तद्विभावाभिव्यक्तिरूपस्य· तस्येति अपसिद्धान्तत्वस्येत्यर्थः त ५४
थाच सिद्धान्त एवापमिति भावः मृद्वीकेति· स्वतः संभविवस्तुना अलंकारध्वनिर्यथेत्यादिः मृद्वीका

द्राक्षासिता खंडशर्करा· स्वर्यातेन स्वर्गं प्रतिगतेन अपि समुच्चयमाह रंभेति· भूयः पुनः पुनः अयं सांप्रत
मनुभूयमानः निःकृष्टेति· परिहृत्यमाने तच्छरीरादिष्टथकृते त्यर्थः तत्त्वं च तस्य भवतामदीये त्या
भ्यामाविष्कृतं· अर्थेन· मधुरिमोङ्कारलक्षणरूपेण तथाभूतेन स्वतः संभविना नाम्नः इत्यस्य तादात्म्या
ध्यवसायेनेत्यन्वयः अनेकजन्मस्य वृत्तांतप्रत्यक्षीकरणकारणभूतो योगाभ्यासजन्यसिद्धिवि
शेष इत्यर्थः अर्थापत्तेर्मानांतरत्वाभावादाह वाच्येति· तदेतितदप्राप्तिमहादुःखविलीनाशेष
पातका· तच्चिंताविपुलाह्लादक्षीणपुण्यचया तथा· चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं· नि
रुच्छ्वासतया मुक्तिं गता सा गोपकन्यका जगत्सूतिं श्रीकृष्णं तत्संभोगाप्राप्त्या महादुःखं· तच्चिंतया
विपुलाह्लादः नास्य प्राणाः समुत्क्रामंति अत्रैव समवलीयंते इति श्रुतेर्मोक्षकाले निरुच्छ्वासता· चय
शब्दार्थमाह पुंजेति· स्वसेवितत्व दुःखसुखरूपफलजनके त्यर्थः तासां अलंकृतीनां· अत्रप्र

५५ 55 कृतलक्ष्येतथाचसिद्धांतोऽन्यविषयकइतिभावः तथावाच्यसिध्यंगं वाचेतिवाच्यसिध्यंगगुरूपंग
तगुणीभूतव्यंग्यंतत्वापत्तेरित्यर्थः यथा चात्र प्रकारांतरेणाचमत्वसिद्धिस्तथास्यष्टमधस्तात सर्ववृत्तेति
सर्ववृत्तेनेत्यर्थः स्थितेतिसर्वज्ञत्वासंबंधेतत्कल्पनादितिभावः मुदोषः गुणीभूतव्यंग्यत्वापत्तिरू
पदोषः पुराणेत्युपलक्षणं श्रुत्यादेरपि तथाचवस्तुतस्तत्सत्तैवनकल्पनमितिनसंबंधातिव्याप्
त्तिरितिभावः अभ्युपेत्याप्याहाथवेति अनुगमः संबंधः पांडुभावः पांडुत्वं उपचीयतेवर्द्धते नद
तीति स्वतः संभवं लंकारेणवस्तुनोपद्य स्यादिः मरुदशब्दे अर्श आद्यचः विरुदावलीस्तुति
परंपरां अहितमंदिरे शत्रुगृहे तदवधितावत्पर्यंतं एवमग्रेपि पमयेतिवाच्ययेतिशेषः व्यं
ग्यस्येति तच्छरीरनिविष्टत्वादितिभावः तन्निष्पत्तेः उपमानिष्पत्तेः विनिगमनाविरहप्याहो ५५
पमेयीभूतेति उपमावाच्यहेनतरवस्यायायदुपमेयंतद्गतधर्मस्यैवतन्निष्पादकत्वंनतूप

मेयम्भ्रांतोपमाव्यंग्यरूपकोपगतस्यात् तद्धर्मस्य तदा तस्यानुपस्थितेः तथा च यस्य तन्निष्पादक
त्वं न तस्य व्यंग्यत्वं यस्य तत्त्वं न तस्य तत्त्वं सोऽनुपात्तत्वमुस्यन्यतः अस्योदाहरणांतरमाह यथा वे
ति· तरविकिरणाः पुष्पानुपांतु तके· येषु तरूणामतिनिविडमंतः प्रदेशं विदार्य भूमिगतेषु अ
तिदीर्घस्तुवर्णदंडसंबंधिभ्रमेण मृतं पोषितं मनो येषां ते जनाः हंत इत्याश्चर्ये पादान् किरणान् लि
प्संति धर्तुमिच्छंति· च· किंच शुकबालकाः येः संभिन्ने मिश्रिते तरुपत्राग्रनिष्ठचंचत्तुहिमकणे पा
दाडिमीबीजस्य बुद्धिस्तया चंच्वाश्चांचल्यं ग्रहणार्थं व्यापारमंचेति कुर्वंतीत्यर्थः अत्र भ्रांतिमान
लंकारः तद्व्यंग्यमाहात्रेति· अपि नाऽतिश्र्यो उदितमिति· तादृशालंकारेणालंकारस्य पर्यवसा
दिः तदवधीति· कविप्रौढोक्तिनिष्पन्नवस्तुना वस्तुनो पथेत्यादिः तदवधितावत्पर्यंतः एवं मनेपि
निष्पन्नेन वस्तुनेत्यन्वयः व्यंग्यमाह सुनोति हृद्विलासे सुस्थिते इत्यर्थः अस्य उदाहरणमा

५६ संखंडयतिकस्मादिति॰उपस्करणायभूषणाय॰भावाः पदार्थाः वर्त्तनंहृत्तिर्जीवनमितियावत्॰उत्तरा
र्धार्थमाहरमेति॰ अदृश्याः भक्षणीयाः अस्यनियमेन लोकसिद्धत्वाभावादाकुप्रौढोक्तीतिकवीत्या
दिः गुरोरितिसज्जनेत्यादिः तस्यव्यंग्यभूतवस्तुनः पर्यायोक्तेति॰ पर्यायोक्तंतुगम्यस्य॰ चोभंग्यंतरा
श्रयमित्युक्तेरितिभावः हियतःदेवाइतिकविप्रौढोक्तिनिष्पन्नालंकारेणवस्तुनोयथेत्यादिः के
इतिमध्यमणिन्यायेनान्वेति॰ पूर्वदेवाः असुराः समितिसंग्रामे॰ ममपुरस्तादित्यन्वयः नरइतिज
संतेमुग्धेतिमुग्धरूपशात्रुसंबंधिप्राणरूपदुग्धभोजनकृतस्निग्धकांतिरित्यर्थः रूपकेण॰ खड्ग
सर्परूपकेण॰ साहंकारेति॰ कविप्रौढोक्तिनिष्पन्नवस्तुनाअलंकारस्ययथेत्यादिः व्याख्यातमि
दमधस्तात्॰ अविवेकः अभेदः इदंचव्यंग्यत्वमभ्युपेत्यवस्तुतस्तदेवनेत्याहव्यंग्यत्वेतिवा ५६
च्यत्वान्नस्येतिभावः कौशीतियथासंख्यमन्वयः उपपन्नैरितिशाविताप्तविधेइत्सत्रव्यंग्यता

वच्छेदकेस्थात्वरूपज्ञातिरूपेतिपाठः तेनरूपेणेवमनोरथपदेनबोधनान्नपूर्वग्रंथविरोधः मनोरथ
त्वेछात्वयोर्घटत्वकलशत्वव्देकत्वात्तइहतुभ्रांतित्वसानंदावलोकनत्वयोर्व्याप्यव्यापक
भावनभेदादितिवोध्यंपथातुयेनरूपेणस्वमत्रेपि·दपितेइति·कविप्रौढोक्तिनिष्पन्नालंकारेणा
लंकारस्ययथेत्यादिः पूर्वोक्तरीतिलोकेसिद्धत्वाभावेनकविप्रौढोक्तिनिष्पन्नाभ्यामित्यादिः अनु
संधानंत्तानंतस्मयुक्तात्·तदसहिष्णुशब्दप्राचुर्यप्रयुक्तात्· प्रधानेतितदुपकारकतयेत्यर्थः चक्रा
ब्दानामितिनिर्धारणेषष्ठी· अयंपृष्टत्योध्वनिः एवमत्रेपिविनिगमनाविरहादाहार्थेति· गतार्थपि
तुमितिशकोयमित्यस्यानुषंगः उदेतिपृसध्वनेरित्यादिः अत्रहासरसोलिपद्मिनीशब्दास्त
दसहाः अन्येतत्सहाइतिसाम्यं·तेनपदसमूहरूपवाक्यनिष्ठत्वेनअस्यपृष्टस्यध्वनेः नविरोध
इतितस्याप्यवांतरपदत्वमादायपदसमूहत्वादितिभावः मात्रपदव्यावर्त्यमाहनत्वितिसा

५८ मान्यमन्यत्वमितिसामान्याभावइत्यर्थः तथा· तंत्रं· कारणमितितदर्थः अतइतितथावक्तुमशक्यत्वे
61 नतद्भिन्नत्वेएवतत्त्वस्यावश्यवक्तव्यत्वादित्यर्थः अयंहन्तुत्योध्वनिः उक्तरीत्याभेदसंभवएवात्रास्
चिः उपसंहरतितदस्त्यमिति तत्रनिरूपणीयेतस्मिन्· वक्ष्यमाणेतिवक्ष्यमाणंलक्षणंयस्यास्तस्या
मित्यर्थः सत्यामितिशेषः अलंकारात्मनेतिरूपकातिशयोक्तिहेत्वलंकारात्मनेत्यर्थः जह
त्स्वार्थाऽजहत्स्वार्थाचेति· अनयोरेवोपादानलक्षणलक्षणेतिव्यवहारः कथंकीदृशं· अन्वि
तत्वादिपदानांस्वार्थत्यागेनाधमाद्यौलक्षणाअपरेतिअजहत्स्वार्थेत्यर्थः द्वितीयमितिद्वितीया
तत्स्वरूपः नियमपवधानः शाकएवेतिजगन्नाथत्वेनेतिशेषः अनेनाजहत्स्वार्थत्वंप्रकटितम्·
पदान्तरेण· जगन्नाथपदातिरिक्तेन· तैक्ष्ण्यादिलक्ष्येइति· वाच्यार्थगतंयत्तैक्ष्ण्यादितल्ल ५८
क्ष्यवृत्तितयाव्यंग्यमित्यर्थः उपसंहरतितदेवमिति विनिगमनाविरहादाह शब्दस्येति· के

चित् वैयाकरणमीमांसकादयः अपरे· नैयायिकाः एवमपि उक्तरीत्यातिप्रसंगवारणेपि· वि
वक्षितेतिशक्तेतितृतीयाश्रुतेरितिभावः स्वज्ञाने स्वज्ञानापेक्षत्वेनात्माश्रयस्य दुष्टत्वादसं
गतिमुपपादयति न चेति न ह्यीत्यर्थः प्रमाणमस्तीति· प्रकृत्यादित्वाद्धान्येन धनवानित्यादिव
त्तृतीयायाः अभेदार्थवत्त्वेन न कश्चिद्दोष इति चिंत्यमेतत्सर्वम्· निरूपिताभिधां विभजते सेयमि
ति धातूपतिपंकादिभिर्यथासंख्येनान्वयः उभयोः समुदायावयवशक्त्योः· विधाः प्रकाराः दू
षणानां प्रतिपादकत्वनिष्ठत्वासंभवासंगतिरात्माश्रयाणां· विषयविशेषे इति· ओषधी
रूपे इत्यर्थः शंकते समुदेति· अनन्वयेन· मिथरूत्यादिः पदत्वपर्याप्येति· एवं च योगबोध्या
र्थान्वयायोग्यार्थप्रतिपादकत्वं रूढेः केवलत्वे रूढिबोध्यार्थान्वयायोग्यार्थप्रतिपादक
त्वं योगस्य केवलत्वं· परस्परप्रतिपाद्ययोरर्थयोरन्वययोग्यत्वे संकर इति फलितं· बोधक

५८ यौगिकेतीति भेदयोरस्त्यर्थः ताहृशकैवल्यविवक्षायां मानाभावादाह अन्येत्विति· संकरस्य योगरू
58 ढिशब्दे नैव प्रसिद्धत्वं मतांतरमाह चतुर्थ एवेति· एवेनाभिधापदसंबद्धेन संकरभेदनिरासः तथा
चाभिधा चतुर्विधेति भावः सिद्धांतमतमाहाखंडा इति· हि स्त्वर्थे तत्र· असंख्यानां मध्ये· तथा
चाभिधायाः रूढ्याख्य एक एव भेद इति भावः अत्र श्लोकेऽथेति· गीष्पतिरिति राजवर्णन
मिदं· अतिशयेति राजनिष्ठगुणाद्यतिशयेत्यर्थः अनियंत्रणे न· असंकोचेन· प्रकरणादि
संकोचकाभावादिति भावः प्रकरणादिसत्त्वे आह एकेनैवेति· आवश्यकयोरिति पदद्व
योल्लेखेनोक्तातिशयव्यंजनार्थमिति भावः एकपदोपेति अंतरंगत्वदोहेतुरयं· तयोः योगा
र्थरूढ्यर्थयोः विशाकलितेति पदांतरार्थेनान्वय इत्यस्यानुषंगः एवं योगार्थमात्रबोधक ५८
त्वानुपपादनं आद्यदोषमुद्धृत्य द्वितीयदोषमुद्धरति नापीति· तथासतीति· द्वितीयपदानु

पादाने सति नांतरीयकत्वेति· मुख्यतात्पर्याविषयत्वेत्यर्थः शंकायाः अभावे तु इष्टार्थासिद्धि
रत आह पाक्षिकेति· अत एवाग्रे नियमेनेति वक्ष्यति· जगत्कर्म· । कचिद्धूतत्वमुपादाने
ऽन्वेति प्रतिसंधानेन· श्रोतुरिति शेषः इत्यत्रापि· इत्यादावपि· शाक्तानानिर्वाह इत्याह योगेति·
प्रत्यक्षेति· गवादीनां प्रत्यक्षत्वादिति भावः अनुमानेति घ्राणेंद्रियादीनामतींद्रियत्वादि
ति भावः आनंत्यादिति अनंतशाब्दिकत्वम् नञ् गौरवादित्यर्थः ज्ञायमाने सामान्यप्रत्यासत्ति
रिति मतेनाह ज्ञातगोत्वादीति· सामान्यज्ञानं प्रत्यासत्तिरिति मतेनाह गोत्वादिज्ञानेति· प्र
त्यक्षेण अलौकिकेन गौरवस्येति द्वितीयदोषोद्धारे व्याघ्रदोषस्येत्यर्थः एतेन· गौरवदोषानु
द्धारेण· एवकारेण समानविशेष्यकत्वादिव्यवच्छेदः नदुक्तमिति· प्रकाशकत्वेति शेषः एक
तायाइति· तथा च नित्यत्वमपि सिद्धमिति भावः एवमग्रेऽपि तथा सति धर्मिस्वरूपमात्रेण व्य

५ एकत्वायाद् इति। तथा च नित्यत्वमपि सिद्धमिति भावः ५

५९ 59 वहारनिर्वाहकत्वांगीकारे· गौर्विगोरितिव्यवहारेइष्टापत्त्याआह गोभिन्न इतीति· अविशेषादि
तिव्यक्तिस्वरूपाणां स्वतोऽव्यावृत्तत्वादिति भावः गौरित्यत्राविशेषणज्ञानविधयात स्याप्रयोगेपि
नाप्यगौरित्यनेन व्यवहारमात्रेधर्मत्वानसाध्यमित्युच्यते· अभावज्ञानेपि प्रतियोगितावच्छेदक
विशिष्टज्ञानस्य प्रतियोगितावच्छेदकज्ञानस्य वा हेतुत्वादित्याहुः शंकतेशुक्लादीनामितिइ
हापि· गुणक्रिययोरभिधेयत्वेपि चेदित्यस्यान्वेतिशेषः तथैव· क्रम एवः व्यक्तिगतः अर्थ
व्यक्तिगतः अतिरिक्तस्फोटांगीकारे फलाभावादाहानुपूर्व्वीतिवर्णानांजन्यत्वेनसमुदाया
संभवादाहकेवलेति· दर्शनं· मतं· मतांतरमाह सर्वेषामितिजातिगुणक्रियायदृच्छाशब्दा
नामित्यर्थः शास्त्रतंत्रैः परंपरयातन्निष्ठत्वकल्पने गौरवादाहतत्तत्समयेति शालत्वयुवत्वहे
इत्वरूपेत्यर्थः तंत्रं कारणं· व्यतिरेकलक्षणेति· उपक्रांतेबहुनामेत्यादौ· यथायोगं· यथा ५९

संभवं· लक्षणाशरीरणीति· लक्षणाज्ञानकार्यतावच्छेदकं च तादृशशक्यसंबंधप्रकारकलक्ष्य
विशेष्यकशाब्दबुद्धित्वमिति प्राचीनालंकारिकमतं तदनंतरं व्यंजनया तादृशशक्यतावच्छे
दकप्रकारकलक्ष्यबोध इति च· एकप्रवणत्वं तदेकासक्तत्वं विषयविषयिणोरिति उपमेयो
पमानयोरित्यर्थः· आद्येन· आरोपेण· द्वितीयेन तिरोति अध्यवसानेनेत्यर्थः· सहितेत्यस्यानु
षंगः· तस्या इति गौण्या इत्यर्थः· ननु गौरवात्सदृशरूपधर्मिलक्षणानयुक्ता· तत्राह सादृश्येति· त
न· सादृश्येन· नस्यात्· कथमपि नस्यात्· अतिरिक्तेति· अभेदेन तु बाधान्नेति भावः· एवं सति·
धर्मिलक्षणयाऽभेदेनान्वयांगीकारे सति· धर्मलक्षणया व्युत्पत्तिसंकोचसंगीकृत्य भेदान्वये तु
स्या हेलक्षण्यमिति भावः· बोधावेलेति उपमायामप्यभेदेनैव बोधादिति भावः· सदृश्याविशे

६० 60 षणचंद्रसंबंधासंबंधाभ्यामिति सदृशेविशेषणभूतोयश्चंद्रस्तत्संबंधतदसंबंधाभ्यांसंसर्गतयाभास
मानाभासमानाभ्यामित्यर्थः बोधवैलक्षण्यमितिशेषः मुखंचंद्रइवेत्यत्रचंद्रपदस्यतत्सदृशेला
क्षणिकत्वेनतस्यैकपदार्थत्वात्संसर्गस्यापिलक्ष्यघटकतयाचंद्रसदृशयोः संबंधस्यसंसर्गवि
धयाअभानेचंद्रसदृशमित्यत्रतुतयोर्भिन्नपदार्थत्वेनसंसर्गस्यतत्वेनभानमावश्यकमेवेतिभावः
अन्यथाबोधवैलक्षण्यमात्रेणालंकारभेदांगीकारेः मुखंचंद्रइवेत्यत्रेतिइत्यस्यामुपमायामि
त्यर्थः इवस्यद्योतकत्वेनरूपकरीत्यासंसर्गस्यतत्वेनाभानात्सादृश्यवाचकत्वेपितेनसह
प्रतियोगित्वसंबंधः चंद्रसदृशमित्यत्रतुतत्प्रतियोगिकाश्रयेलाक्षणिकतयाअभेदस्यसंबं
धत्वमितिस्पष्टंवैलक्षण्यं सदृशवाचकत्वेपिस्वप्रतियोगिकाश्रयत्वंचंद्रइवेत्यत्रसंबंधस्तत्र ६०
तुसएवेतिस्पष्टाभेदइतिभावः एतद्भूतादितिउपमालंकमादितिशेषः ताद्रूप्यसंवेदनामितिना

३ सर्गः स्लं स्पष्ट ३

द्रूप्यमात्रसंवेदनमित्यर्थः एतेन भेदाभेदोभयप्रधानोपमा· असाधारणरूपेणोपमानोपमेययोर्भे
दः साधारणरूपेण त्वभेद इत्यलंकारसर्वस्वकृद्दूथविरोध इत्ययास्तं· उपायस्येति शक्तिलक्षणा
न्यतरस्येत्यर्थः तत्रापि लक्षणास्तु अत आह भेदेति· अन्यथा तस्या प्रतिबंधकत्वे· इत्यत्रापि इत्युप
मायामपि· ताद्रूप्येति ताद्रूप्यमात्रेत्यर्थः एवमुपायमुक्त्वा द्वितीयहेतुं खंडयति वैयंजनीति· एवेनमु
खत्वविशिष्टमुखेव्यवच्छेदः तदेवाह नखितिरूपांतरेण मुखोपस्थितेः सत्वादाह मुखत्वेति इष्टा
पत्तिं खंडयति अनुभवश्चेति स्वताद्रूप्यवदिति· चंद्रताद्रूप्यवत्सहत्वाभेदेत्यर्थः तस्मिन्विषये· त
स्यताद्रूप्यप्रत्ययस्य· केचिदित्यनेनारुचिः सूचिता तद्वीजं तु स्वरूपसंवेदनकृतवैलक्षण्यस्या
पि संभवेनतावत्सर्येतगमनं व्यर्थमिति अत एव मतांतरमाह अपि स्विति· अपि मुखत्वसमुच्चाय
कः· रूपेणैवेत्यस्याभेदान्वये तत्रान्वयः· उपस्थापितेरित्यस्य मुखत्वानामुखादिभिरिति त्रो

लाभावोऽत आह प्रकृतेति ति । नन्वेवं प्राचीनविरोधस्तादृप्यसंवेदनस्य । पं३

६१ षः नन्वनुलक्षणाज्ज्ञानकार्यतावच्छेदकं प्राचीनसंमतं प्रागुक्तमिति कथं तथाबोधोऽत आह तन्त्रस्य दे
ति नन्वेवमपि उपस्थितिबोधयोः समानप्रकारकत्वनियमभंगोऽत आह पदार्थेपीति · कल्प
नायाः आवश्यकतामाह तत एवेति अपिना समीपत्वसमुच्चयः ननु प्रकृते फलत्वस्य तेरुक्तत्वा
दित आह तादृप्येति तदसाधारणेति · विजातीयाह्लादकत्वेत्यर्थः इत्थं चेति रूपके तथा बोधे
न तथा फलेऽभि क्रियमाणे चेत्यर्थः उपमातो रूपकस्येति उपमायां तथा बोधाभावात्साधारण
स्यैव गुणस्य प्रतीतेश्चेति भावः अत्रापि पक्षेऽह्लादं स्वच्छयन प्रमतीतं रमाद्दापरोतलिति करं वितं वि
शिष्टं · सादृश्यस्य धर्मरूपत्वेऽतिरिक्तत्वे च भेदाद्वगर्भत्वादिति भावः जीवातुर्जीवनौषधं ·
स्फुटे भेदे इति उपमायां चेद्रभिन्नं चंद्रसदृशमिति बोधः रूपके तु चंद्रसदृशामिस्येवैति भावः प भेदः ६१
क्षस्मिन्नित्यस्याप्रमित्यनेनान्वयः ननु मुखं न चंद्र इत्यादिबाधज्ञानसत्त्वेन कथं तथा बोधोऽ

तआह बाधेति· अनाहार्येति· तस्यत्वेपीच्छारूपोत्तेजकवशादाहार्यस्यजायमानत्वादितिभावः
नचैवमस्यैवमितिशेषः शाब्दान्यत्वनिवेशो दूषितइत्यर्थः नन्वेवंप्रकृतेपियोग्यताज्ञानाभावात्क
थंबोधः तआह मुखमितिअतएव· आहार्ययोग्यताज्ञानसत्त्वादेव· शाब्दबोधेशाब्दबोधत्वाव
च्छिन्ने· लाघवात्कथंबोधः तआह मुखमितिअतएव· आहार्ययोग्यताज्ञानसत्त्वादेव· शाब्द
बोधेशाब्दबोधत्वावच्छिन्ने· लाघवोन्मतांतरमाहाहार्यएवेति· माचास्त्विति· वह्निनासिंच
तई तीत्यादावपिआहार्यज्ञानस्येष्टत्वादितिभावः असमोभयत्रान्वयः उक्तंद्रढयतिअवश्यंचेत्या
दिना· अभेदेस्यसमाहार्यस्यादिः एवव्यवच्छेद्यमाहनत्विति· अन्यथावैपरीत्यांगीकारे· विरु
द्धस्यत्रास्यान्वयः उपमितविशेषणेतिउपमितंव्याघ्रादिभिःमयूरव्यंसकादयश्चेतीत्यर्थः त
त्रतयोः स्वीकारेयातदनुपपत्तिः सावैपरीत्येनिर्णायिकेस्यात्खंडलार्थः बाधकस्य· तत्कर्तृ

६२ कालिंगनासंभवस्य बाधकाभावेन ताहशमनोहरत्वासंभवाभावेन। प्रागुक्तेति प्राचीनोक्तेत्यर्थः
नास्ति बाधकमिति। प्राचाऽनुक्तत्वादिति भावः। सिंचतेरपीत्यपिरेवार्थे। उत्स्व क्षेति अत्र तु य-
थालक्षणा न तथा स्फुटीभविष्यति। विनिगमनाविरहादाहानुभवेतितत्रविसंवादादाहापिचे-
ति। सच समानधर्मश्च। एवमादौ इत्यादावित्यर्थः। अत्रादिशब्दस्यप्रकारार्थत्वात्तत्रैयोजक-
धर्ममाह हापात्रेति। तद्धर्मेतितपात्रधर्मान्याह्लादकत्वादिरित्यर्थः। तथानुभवे विसंवादादुह-
कितानीति। अक्षाणींद्रियाणि अक्षाः पद्माक्षास्त्वनत्समूह्यैर्व्यामानि। रोगसहितानि सरो-
गामानीत्यर्थः। श्लेषेतिशब्दश्लेषनिमित्तकोया विशेषणार्थयोरभेदाध्यवसायस्तद्विषयीभू-
तायो धर्मस्तद्व्यामत्वसरोगत्वरूपस्तमित्यर्थः। एवमग्रेपि। एवंचात्र पौनरुक्त्यंदृढमितिभा- ६२
वः। शब्दापात्रेतिलक्षणयेतिभावः। तथा च रूपकोच्छेदापत्तिरिति भावः। वाच्यतायामेवेति।

शक्येतिभावः तदभावेतिप्रतिपक्षज्ञानस्य न सादृश्येप्रज्ञक्तिः किंतु लक्षणेतिभावः इष्टापत्त्या वा
हं किं चेति· विहृदिति विहृन्मानसहंसैवैरिकमलासंकोचदीमृद्युतेदुर्गामार्गणनीललोहि
तसमित्स्त्रीकारवैश्वानर· सत्यप्रीतिविधानदक्षविजयप्राग्भीमप्रभोसाम्राज्यं वरवीरवत्से भीमरु
ण्णातं वैरिं चमुच्चैः क्रियाइत्यादाविसर्थः अत्र मानसमेव मानसमित्यादिश्लेषः तस्यां रूपकसि
दू८ द्धौ· तं घटकेतिलक्ष्यतावच्छेदकेत्यर्थः अर्थद्वयेतिसरोमनोरूपेत्यादिः प्राचोक्तमन्यत्तवंडयति
सदृशेति· नास्तिलक्षणेतीति· मास्तु लक्षणा· नामार्थयोश्चाभेदान्वय एवास्तु· न च वाधज्ञा
नं प्रतिवंधकं सादृश्यज्ञानरूपदोषस्योत्तेजकत्वात्· एतज्ज्ञानं च प्रसिद्धसादृश्यकस्थले सा
धारणधर्मानुपादाने एकसंबंधिज्ञानादपरसंबंधिस्मरणन्यायेन साधारणधर्मस्मृतौ दोष

६३ 63 विशेषसहकारेणशब्दादभेदप्रत्ययः शखेपीतत्वाभावनिश्चयेकाचकामलादिदोषेणतस्यपीत
त्वप्रत्यक्षवत्· रूपके आहार्यबुद्धिरिति प्राचीनव्यवहारो बाधबुद्धिकालिकत्वमात्रे आहार्यपदं
लाक्षणिकं स्वशब्दादिसमभिव्याहारे तु तेन भेदगर्भसादृश्यस्यैवोपस्थापनान्नाभेदप्रतीति
रितिममप्रतिभाति· तत्र दोषं वक्तुमाह तत्रेत्यादिना चमत्कारी यः साधारणधर्मस्तदनुपेत इत्यर्थः
उभयत्र क्रमेण साधारणधर्ममाह सुपर्वेति देवालंकृतत्वं पंडितालंकृतत्वं सकलकलत्वं चेत्यर्थः
कला षोडशो भागः कौशल्यं च एकत्र· प्रसिद्धोदाहरणे· इतरत्र तुः अप्रसिद्धोदाहरणे तुः न
चेति· नियमेन स्वबोधकश्रुतिमपेक्षते इत्यर्थः कथमिव· कथमपि· अन्यानपेक्षेति· रूपकस्य ६३
तु धर्मविशेषोपस्थित्यपेक्षं पर्यवसानमिति भावः विशेषज्ञानमिति तथा च तदभावादभेद

बुद्धिरपि न स्यादिति भावः वक्त्रमनुष्ठेति· वक्त्रादावनुष्ठाद्यभेदप्रतीतेरित्यर्थः नचोपमेतिवद्ध नुस्वादी
नां तु नोपमानोपमेयत्वं अत एव तत्र रूपकादिकं ना अभेदबुद्धिस्तु तत्रास्तीति भावः ननु अन्यथा
नुपपत्तिरेवमानं तत्राह साधारणेति तादृशेति उपमानोपमेययोश्चंद्रमुखयो रूपकसत्त्वेनाभेद ५३
प्रतीत्यंगीकारादित्यर्थः तस्मादभेदबुद्धौ तस्य प्रयोजकत्वमस्त्येव चतन्पासेवस्माद्रूपकं न पर्यवस्यद
तस्तदुपस्थित्यर्थं लक्षणावसमाश्रयणीयेति भावः तत्र शंकते ननु रूपकेति विरहेरति नामार्थयो
रभेदान्वय इति सरण्यनंगीकारे इत्यर्थः विधेयकोटाविति· सिंहामरावेपर इत्यादाविस्यर्थः तथा
पितादृप्यप्रतिपत्त्यंगीकारेपि· एवं न सादृश्यस्य विधिनिषेधव्याप्तिः तिरोभूतभेदेति वक्तुरीहिः
सादृश्येति सादृश्यरूपस्येत्यर्थः विशेषणसमासेति मयूरव्यंसकेति समासेत्यर्थः उपमितसमा
सेति· उपमितं व्याघ्रादीति समासेत्यर्थः तादृशेति लक्ष्मीकर्तृकालिंगने इत्यर्थः तस्पररति मंजुमंजी

रसिंजितमनोहरच्छायाइत्यर्थः उपमानताद्रूप्येति उपमानसदृशयोरेकपदोपात्तत्वेनोपमान
ताद्रूप्यवत्सदृशाभेदबुध्या उपमेये उपमानताद्रूप्यस्य उपमायामपि ज्ञातुं शक्यत्वादित्यर्थः तत्र
हेतुमाह लक्षणेति· रूपके इवोपमितसमासे वाचकेवशब्दस्याभावेन लक्षणासत्वेन तत्सा·
समत्वादित्यर्थः भेदाकारवीति भेदाविशिष्टत्यर्थः दोषांतरमाह भेदेति· संबंधाभावादिति द्वयो
रेवपदयोः समासादिति भावः अप्युपेक्षा हसतिचेति उपमोल्लेकाः प्रतीत्यर्थः वाक्यांतरस्य· समा
सवाक्यस्य· ननु समासेमा लुप्तसादृश्यप्रतीतिरत आह तस्येति विग्रहवाक्ये इत्यर्थः इत्यं चउक्त
दोषे चेत्यर्थः द्विलुप्तेति· उक्तरीत्या धर्मवाचकयोः सत्वेन कथं धर्मवाचके लुप्ते क्त्यर्थः वि
शिष्टशक्तो गौरवादाह तत्र घटकीति· भेदघटितेति· तथाच साधारणधर्माभानाद्धर्मलुप्तत्व ६४
सुस्थम्· नन्वेवमपि ताद्रूप्यप्रतीत्या कथं धर्मलुप्तत्वमत आह निरूढलक्षणेति· इमेवेति उक्ते

प१

वगतिरित्यर्थः धर्मलुप्तोदाहरणमाह मुखं चन्द्रवेति वाचकलुप्तायामिति तडिद्गौरीत्यादावित्य
र्थः नन्वेवमपि सादृश्यवाचकस्योपमानशब्दस्यैव सत्त्वात्कथं वाचकलुप्तत्वमत आह वाच
केति वाक्ये इवाद्यनुपादाने वाचकलुप्तत्वाय सादृश्येपि समसदृशाद्यप्रयोगेतत्त्वायाह तद्वि
शिष्टेति सादृश्यविशिष्टस्यार्थः अत्र शोधे परिहरिष्यते इति अयं भावः उपमेयोपमानयोरभे
द एव रूपकमिति मते सादृश्यज्ञानमूलकाभेदप्रतीतिविषय एव सः एवं च पौरुषाख्ये सतरंगः प्रत्य
र्थिवंशोल्वणविजयकारस्यानन्दानांबुपदः खड्गो मालवस्येत्यादौ खड्ग इति शब्दात्प्रतीयमानदा
नांबुपदाभेदे प्रत्यर्थिवंशाभेदप्रतीतिमूलकतज्जेतृसंबंधित्वरूपं साधर्म्यमूलं प्रत्यर्थिवं
शाभेदे च खड्गे दानांबुपदाभेदप्रतीतिमूलकतद्वद्भज्यमानत्वं तथा तिलक्षणाभाववादिना
पि कथमन्योन्याश्रयः परिहार्यः किमर्थं वा क्लिष्टपर्यन्तानुधावनं नवीनैर्दीक्षितैः कृतमिति चिं

६५ स्यमितिअयमेवाद्दिगर्थइतिबोध्यंतथैतिताद्रूप्यमित्यर्थःतस्मादेवत्रयंरूपकेलक्षणाःअत्रसुक्तंतर
65 माहमहाभाष्यादीति·तथाचपुंयोगादाख्यायामितिसूत्रेभाष्येभिन्नानामभेदाभावात्कथंमतस्मि
२३ न्सइत्येतद्भवतिचतुर्भिःप्रकारैरतस्मिन्सइतिभवतिचतुर्भिःप्रकारैस्ताद्रूप्यमारोप्यतेनतुमुख्यं
तात्स्थ्यात्ताद्धर्म्यात्तत्सामीप्यात्तत्साहचर्यादितितात्स्थ्याद्यथामंचाहसंतिताद्धर्म्याद्यथाजटीब्र
१५ ह्मदत्तःब्रह्मदत्तेयानिकार्याणिजटिन्यपितानिक्रियंतेःतत्सामीप्याद्यथागंगायांघोषःतत्साह
चर्याद्यथाकुंतान्प्रवेशयेति·माहात्म्यादिति·समानप्रकारकत्वनियमस्यलाक्षणिकबोधान्यबोधवि
षयकत्वस्यप्रागुक्तत्वादितिभावः·नियमांगीकर्तृमतमाहलक्षणेतिइदमपिप्रागुक्तं·मुखत्वादीनां
चेति·एकपदोपस्थाप्यानामितिबोध्यं·साक्षादिति·सारोपायांतुचंद्रत्वस्यचंद्रसदृशेभानद्वारा ६५
तत्रभानमितिपरंपरयातद्भानमितिभावः·अस्याइतिसाध्यवसानायामभेदकमित्यर्थःएकधर्म्याधिक

रणकोभयमानंतुसमानमितिभावः विषयतावच्छेदकेति लक्ष्यतावच्छेदकोऽर्थः क्वचित्तथैवपाठः
लक्ष्यतावच्छेदकंचसाधारणधर्मरूपमाह्लादकत्वाद्येवैतन्मतेइतिबोध्यं· तथेतिनतोभेदिकेत्य
र्थः· तन्नेतितादृशाधर्मभानंनप्रामाणिकमित्यर्थः·· सा· कारणकल्पना· विरुद्धभानसामग्र्याः
प्रतिबंधकत्वकल्पनारूपा· उचितेवेत्यस्येतिबोध्यमितिशेषः अथोपमाकाव्यात्मनइतिभेदेष
ष्ठीयं काव्यात्मनेयद्वाऽम्यंतस्येत्यर्थः यद्वाकाव्यात्मनइति अलंकाराइत्यनेनान्वेतितत्सामान्य
लक्षणमाहव्यंग्यरमणीयतेत्यादि· तत्रापितेष्वपि· विपुलेतिवङ्क्रित्यर्थः सब्रह्मचारीतिसदृशे
त्यर्थः स्वयमितिस्वस्यापर्यवसादित्यर्थः अतएवस्वार्थबोधनेतात्पर्याभावादेव· तस्यसादृश्यस्य· द्वि
तीयंतदाहव्यतिरेकेइति· अन्यदपितदाह एवमिति अनन्वयव्यतिरेकयोरिवेत्यर्थः तत्रान्निष्पाद
केति अभेदापह्नवादिनिष्पादकेत्यर्थः तयोः तादृशाप्रतीपोपमेयोपमानयोः संशयत्वादिति·

चित्रमीमांसोक्तोपमालक्षणदूषणावसरे इति भावः नव्यास्तु यत्र चंद्राद्युपमानप्रतियोगिकत्वसाद
श्यानुयोगिकत्वबुद्धिकृतश्चमत्कारस्तत्रोपमालंकारत्वं अनन्वये तु न स्वसादृश्यबुद्धिकृतः सः
किंतु निरुपमत्वबुद्धिकृत इति नोपमालं उपमेयोपमायामपि न परस्परसादृश्यबुद्धिकृतः सः किं
तु अनयोरेव साम्यमनतृतीय एतत्सदृश इति बुद्धिकृत इति तस्यामपि न तत्त्वं मुखमिव चंद्र इति प्र
तीपेपि मुखादौ सादृश्यप्रतियोगिकत्वबुद्धिकृतस्य सः न तदनुयोगिकत्वबुद्धिकृत इति तत्रा
पि न तत्त्वं अहमेव गुरुरिति प्रतीपेपि उपमानतिरस्कृतत्वकृत एव सः न तु सादृश्यबुद्धिकृत इति
न तत्रापि तत्त्वं अलंकारभेदे च चमत्कारनिदानभेद एव निदानं रूपकोत्प्रेक्षादौ तथाक्रमत्वा
त्सहृदयानुभवसाक्षिकत्वाच्च एतेन सादृश्यस्य प्रतिष्ठाने यदि सादृश्यास्य प्रतीतिस्तर्ह्यनु ६६
भवविरोधः यदि भेदाग्रहे तदप्रतीतिस्तदाभेदांशनिवेशेन तद्विवरणे किंफलं उपमेयोपमावत्तते

५५।८१

स्याथस्तूपमात्वमित्यपुलमित्याहुः उपमानस्य चंद्राधिकरणकानलस्य असंभावितत्वेन न
तु सत्त्वेन रूपेणेति भावः कल्पितमिति यतः कल्पितमत एवासदित्यर्थः नन्वेवं भवतु तादृशस्या
पि साहृदयस्य चमत्कृतिजनकत्वं तथापि लक्षणे उपमानोपमेययोर्निवेशेन तयोः सत्त्वस्यापेक्षि
तत्वेन कथमुक्तस्थले निर्वाहो ऽत आह होपमानोपेति भावफलकत्वमिति उपमानान्तराभावस्य
फलत्वेपि कविकल्पितमाह दृश्यकृत एव चमत्कार इति न व्यमतेपि न दोषः आलक्षितेति आल
क्षिताम्लिष्टबुधमित्यर्थः तथा पाठस्तूचितः अत एव वक्ष्यति बुधमौक्तिकयोरिति कथमिति तदु
मोपस्थितेः कारणत्वस्य तत्र प्रागभिहितत्वादिति भावः तादृशाराकेंदुमंडलेति तद्विशिष्टराके
न्दु इत्यर्थः एवमग्रेपि तथा वक्तुं युक्तं आद्ये दूषणमाहोपमानोपेति द्वितीयपरीत्योक्तप्रसिद्धोदाह
णेन निर्वाहेपि अप्रसिद्धोदाहरणे दोषमाह साधारणमाह कोमलेति कोमलातपत्वं शोणाभ्र

६७ 67

त्वचबहुव्रीहिण्यासंध्याकालविशेषणं अतएवकोमलातपादीनामितिवक्ष्यति· अभेदाध्यवसायेनेति
नचैकधर्मवत्त्वमिवोपमानवृत्तिधर्मसदृशधर्मवत्त्वमप्युपमाप्रयोजकमस्तुकिममुनाभेदाध्यवसा
येनेतिवाच्यं· साधारणधर्मेणोपमानोपमेययोरभेदप्रतीतिकृतचमत्कारस्योपमायामिष्टस्य धर्म
योरभेदाध्यवसानंविनाऽनुपपत्तेः तथाचोक्तमलंकारसर्वस्वकृता· भेदाभेदप्रधानोपमेतीतिवो
ध्यम्· प्रागुक्तइति· यत्तद्भ्यादिः अयमेव· सादृश्यमूलाभेदाध्यवसायएव· प्राचीनैर्बिंबप्रतिबिं
बभावइत्यभिधीयतइत्यर्थः एवं· उक्तोदाहरणेउपमासिद्धिवत्· भगवतः कुलस्य· वंचनचांचल्य
वान्धात्नामनेकार्थत्वात्· चाणूरोदैत्यः तत्रधर्मयोर्मध्ये· वस्तुप्रतिवस्तुभावइति· तत्रचूर्णनसं
हारयोराश्रयभेदस्त्वभेदप्रत्ययस्तत्संबंधिचाणूरजगन्मंडलयोरभेदप्रत्ययेनतयोरप्यभेदप्रत
यान्निरस्तः तत्रैकपदोपस्थितविशेषणांशमादायाभेदबुद्धौजातायांभिन्नपदबोध्यसंबंधि ६७

भेदकृताभेदबुद्धिर्बहिरंगानोदेतीतिभावः चांचल्यवेगवत्त्वयोस्त्वाश्रयभेदाद्भेदेपि एकनिमित्तकत्वेना
धर्म२ भेदमादाय साधारण्येनेति बोध्यं· समासेइति उपमानानीतिसूत्रेणेतिभावः अत एव नश्रोतीत्या
ह श्रौतीयेति सकलवाक्यार्थस्य सकलवाक्यतात्पर्यविषयीभूतस्य· शृंगारस्येत्यस्योपस्कारकतये
त्यत्रान्वयः त्रासेति· गुरुजनभयमहिलोकनपदबोध्ययोः गुरुजनभयमहिलोकनयोर्मध्ये व्याकु
लत्वोदयेन द्वयोरपि तुल्यकक्षत्वमत एवाह परस्परेति· तस्य संधेः· पुनः शब्दस्तु शब्दार्थे· शब्दस्य
शब्दवाच्यत्वमतेनायं दोषः· न आह विलक्षणत्वानेति· अव्यंग्यत्वात् व्यंग्यत्वाभावात्· तादृशेति
अदुष्टाव्यंग्याद्यविशेषणद्वयान्यतरेत्यर्थः· इत्यादावपीति उपमालंकारापत्तिरित्यस्यानुषंगः
आदिसंग्राह्यं चिंत्यं· अत्रापि कालोपसर्जनयोरपि· अत्र कालोपसर्जने च तुल्यमित्यत्र· द्वि
वचनोपादानादितिभावः· एतदर्थमेव द्वितीयदोषोक्तिः· उपप्लुतेति· कालिमेत्यर्थः प्रधानस्य

६८ यार्थवचनवतकालइत्यादीतिभावस्तदाहेकोपमेयेति अत्रेतियथागौरित्यादावित्यर्थः व्यतिरेके
इतितवाननस्येत्यादावित्यर्थः कमलादिसादृश्येति कमलादिनिष्ठसादृश्येत्यर्थः ननुव
र्णनपदस्यचमत्कारजनकज्ञानविषयीभूतानुयोगित्वकत्वार्थे तात्पर्यग्राहकमिदं नतुल
क्षणशरीरघटकमिति चेत्तत्राह किंचेति वाक्यार्थत्वेनेतितथाचनवार्कर्थोपिस्कारकत्व
मितिभावः तदाहानलमिति ननुअलंकरोतीतियोगबोधितोपस्कारकत्वस्यालंकारसा
मान्यस्वरूपत्वेनविशेषलक्षणेषुतदनिवेशोपिक्षस्यभावइत्यतआहापिचेति अतएवचित्रभूतोप
मालक्षणेत्वितितेनोक्तिं पूर्ववदस्यापितात्पर्यः एवमर्थमाहहृद्यतेति ननुतत्रैवतात्पर्यग्राहकेत
दत्तआह कायेति अतएवेति प्रकाशग्रंथे उक्तदोषोऽतआहश्लेषेति प्राचा प्रकाशकारादी
ग्राहकत्वादिदमपिचिंत्यं अव्यंग्यत्वे च तल्लक्षणे प्राधान्येनाव्यंग्यत्वंबोध्यमितिदिक् एवपदार्थमाह

२ द्दोषगणादेरेवेत्यर्थः तथैववाचनीयरमणीयमित्यर्थः । एवमिति । व्यतिरेके निष्पापनादित्यर्थः ननुपर्यवसिततत्त्वेनविशेषणान्न २

[illegible] ६८

नांतत्र· तयोर्मध्ये· तत्र· तासांसमानांमध्ये· तत्र· पंचविंशती नांमध्ये· भीष्मेति· मंडलस्यभीष्माज्वाला
यत्रतत्रप्रदेशेयत्संस्मरणंगमनंतेनेत्यर्थः हृष्टिवरेण्यः कललः वाक्यगत्वमाहात्म्येति· इवेनसमासइ
सतेः तिस्तुस्त्रपेसस्याविंत्वेनास्यतत्त्रपंचत्वात एवंचवैकल्पिकत्वात्तदभावइतिभावः पूर्णात्वमाहे घे
ति· श्रुत्येति इवेनेत्यर्थः विश्राम्यतयेतिभावः प्राणापेति· अत्रसमासाभावात्तवाक्यगत्वविषयेचेंद्र
योः प्राणापहारकत्वरूपधर्मस्यतुल्यशब्दस्यचोपादानात्पूर्णात्वंतुल्यशब्दस्यसदृशार्थक
त्वेपिप्राधान्येनैवशब्दवत्साहश्यबोधकत्वाभावादार्थीत्वं· हरीति· देवव्रतेनेपुत्रिणीपुत्रवती
त्यर्थः अत्रापिचतुर्णामिवस्यचोपादानात्पूर्णात्वंश्रौतीत्वंचसमासगात्वमाहात्म्येति· आनंदते
नेतिकरणेल्युट्लोकानामितिमध्यमणिन्यायेनान्वेति· आसमंतात्तापेत्यर्थः इंद्रपमोभवानि
ति· अत्रसमासस्यधर्मिशक्तत्वात्कर्मसाधनेनोपमशब्देनसमासमासाद्दा आर्थीत्वंसमा

६९ 69 सगलंचस्वर्णात्वंतुस्पष्टमेव·सगुणंब्रह्म·स्थूलरूपं·कुसुमकुलानांतरूणांतिलकश्रेष्ठेतिचंपकविशे
षणं·यत्तुलनामितियस्यतुलनायत्तुलनापीत्यर्थः शंकतेउपमानेति·यस्येतिपतद्इत्यादिः इत्सु
क्तेतिसनास्तीत्युक्तिरन्यथास्यादितिभावः एतेनेतिउक्तरीत्यासादृश्यपर्यवसानेनेत्यर्थः अत्रा
पितत्त्वापित्तस्तवदुर्लभेत्युक्तेनतुसनास्तीतीतिभावः दुंदुंहत्वामरिष्यामिकंटककलितानिकेतकी
वनानि·मालतीकुसुमसदृक्षंभ्रमरभ्रमलभ्राम्यामि·लवलीलताहरफारेवडीभाषयाप्रसिद्धा· ति५
अशोकमूलमितिउपाल्विस्याधारः कर्म·श्यामत्वादितेतिविवक्षितमित्यनुषंगः सादृश्यसा
रू२ तिरिक्तेतिआहप्राहृषेण्येति·धर्मरूपत्वेआहताहृशेतिप्रावृषेण्येत्यर्थः वच्छेदिकेत्यस्येतीतिशेषः
सादृश्यमेवेतितथाचतद्विशिष्टार्थप्रतिपादकत्वाद्दार्थीत्वं·कर्माधारेतिवाचकलुप्तेत्यादिः न ६९
न्वेवमाचारवत्सादृश्यस्यापिकाजादिनावोधनात्कथंवाचकलुप्तात्वमतआहाचारेतिसादृश्य

ग५

वाचकाभावादितिशङ्क्येति भावः ननु नेदं युक्तं अत्र मते द्वादीनां द्योतकतानये सर्वत्रैव वाच
काभावाद्वाचकलुप्तत्वापत्तेः चेदप्रतिपक्षमानेन मिसत्रापि वाचकलुप्तत्वापत्तेश्च तत्र हि
प्रतिपक्षपरेन साहृश्यं लक्ष्यमेव तस्मात्साहृश्यसाहृश्यविशिष्टान्यतरमात्रबोधकाभावए
ववाचकलोप इति तत्वमत आह नलीयतीत्यादीति गाहितमितियद्यपीत्यादिः तथापि
ह५ हसैकारगतितव तुल्यं वस्तु भ्रमेरण न प्रामामित्यर्थः शुद्धैवेति आर्यासामान्यलक्षणाक्रान
त्वात् सा तु मिश्रितेति भावः धातवइति तथा च हारंतीत्यादिप्रयोगसिद्धिरिति भावः तत्रोक्त
प्रयोगेषु आचारमिति बोधयतीति शेषः सद्दृएवेतिः साहृश्यं शक्त्या प्रतिपाद्यत्वात् क्विपोलु स्प३
प्तत्वाच्चेति भावः साहृश्ये मिहारादीत्यर्थः तदिह्युचितं अभिन्नमिति तस्य धर्मरूपत्वादिति भावः
संभिन्नाः मिश्राः कांताश्चेतदंताश्चेत्यर्थः विशेषणेति मयूरव्यंसकेतीत्यर्थः अधिकरणे

७० तिवर्द्दनांबुजेइत्यत्र स्यामित्यर्थः वछेदिकाति तिउपमेतिशेषः कांतयः केसराइवकांशांतिइत्य
70 त्रत्येतिभावः वाचकस्येतिइवशब्दस्येत्यर्थः उपमेयानुपादाने हेतुमाह स्फुटत्वेनेति· स्वयंत्त्वि
तिति लोत्तमीयंतीति लोत्तमीयंतीतिवोध्येत्यर्थः तत्कर्त्र्यो· आचारकर्त्र्यो· तयोः समानरूपत्व
स्यतत्रांतंत्रत्वादितिभावः शारदेकेतिशारदपूर्णिमाचंद्रइवाचरतीत्यर्थः पूर्वोक्तेन· समासाद्य
त्यनेन· स्थितेइत्यस्यार्थेइत्यादिः तृतीयचरणोक्तेति· उपनतमेतदेकस्यादित्यस्य स्थानेचरणां
तरनिर्माणेइत्यर्थः धर्मलोपस्यापीति· उपमानादाचारइत्यत्रोपमानेमाचारनिरूपितमेवगम्य
तेउदाहरणेच पुत्रपदस्य पुत्रकर्मकाचारसहत्वे लक्षणेतिवैयाकरणमतेषस्तुतरांधर्मलो
पः नचैतन्मतेत्रिविष्टपंतत्खलुभारतायतइत्यत्र कथंचोऽनुपपत्तिः भारताचारसहत्वाचारस्यत्रि ७०
विष्टपवृत्तेरप्रवृत्तेरप्रसिद्धेः सपर्वभिः शोभितमित्यस्याश्लेषेणाभेदाध्यवसायएवनस्याद्

६५१ यर्पावसायइतिवाच्यं· एकत्राप्लोपात्तत्वेनाभेदबुद्धेरिवशब्दरूपसाधर्म्येण सादृश्यबुद्धेरप्युपपत्तेरि
त्याहः ननुनारीपतेइस्यादौतस्यतत्त्वमस्तीत्यतआह नारीति· इत्यंतरेति· मात्रपदेनकिंचिदिम
न्नतयाऽध्यवसिततत्त्वव्यवच्छेदः· तस्यैवपद्यस्य· तस्याउपमालंकृतेः साधारणोपि· उभयनिष्ठोपि· न
नुकाद्यर्थाचारमात्रस्योपमाप्रयोजकत्वाभावेपि साधारणत्वेनोभयधर्मत्वेनतत्त्वाच्चकथंत
ल्लोपसंभवोऽतआहोपमेति· अत्रचेतिचोप्यर्थे· सूत्रार्थइतिह्यिवस्य सादृश्यद्योतकत्वेपिशक्तत्व
रूपवाचकत्वाभावाद्वाचकलोपइतिभावः हृदयं· ननुइवादेर्द्योतकतानये चंद्रइवमुखमित्यत्र चंद्र
मुखमुखमित्यत्रचवाचकलुप्ताव्यवहाराभावाय सादृश्यतद्विशिष्टान्यतरबोधकाभावास्येववा
लस्यवाच्य२ चकलुप्ताव्यवहारप्रयोजकत्वेन द्योतकस्यापिबोधकत्वानपायेननास्तिवाचकलोपइतितदा
श्रयाद्बोधमूलकमितिचिंत्यमिदम् इदं चान्यदपि· वक्ष्यमाणमन्यच्चेत्यर्थः· क्विब्लोपेतथा

मेतत्१

७१ 71 केयुक्त्वेपिकनलोपेऽयुक्तत्वमित्याह कनइति · तामुपपादयति इहापीति · कथंकारं · कथंकृत्वा ·
पाठांतरवादी स्वाशयमाहोपमेयेति · एवमेवेति एवं च तुल्यतेति भावः प्रकारांतरेण स स्वाशयमाह
यदि चेति · इदमप्यन्यदिति · वक्ष्यमाणमित्यर्थः तसिलीति इदं चिंत्यं तद्व्याप्तिः आद्यादित्वात्तसा
विस्युचितं · महाकविः कालिदासः तैः अप्पदीक्षितैः · इदं चिंत्यं पुरइव तिनिपातं ग्रीकारात् अत ए
व इयं चैत्रेन्यापुरतो विडंवनेति कालिदासः पश्यामितामितइतः पुरस्थपश्चादिति भवभूतिश्च संगच्छते
इति केचित · अन्ये तु दक्षिणोत्तराभ्यामतसुतित्यत्र तसुचैव पुंवद्भावेन सिद्धेः तसुद्विधानमन्यस्मा
दपीति ज्ञापनायतेन पचाद्यजंतात्सुरसाव्यान्तस्मिन्निष्टसिद्धिरित्याहुः वस्तुतस्तु पुर अग्रगमने इति
चौरादिकाणिजभावेऽप्युपधलक्षणे के सार्वविभक्तिकस्तसिरिति बोध्यं · वैयाकरणा इति प्रांचइत्या ७१
दिः एवं भेदा वक्ष्यमाणप्रकारभिन्ना · तदेव विशिष्याह वस्त्विति · आपातेति · प्रागनुभूयमानकट्टुत्वका

नीत्यर्थः ताहशि· आपातकाटवानि· प्राधान्येन व्यंग्यस्येति तेनापातकाटवानीति पदव्यंग्यस्य
त्यर्थः नन्वत्रोपमालंकारेणैवात आहात्र प्राधान्येनेति व्यंग्य इति वाक्यव्यंग्य इत्यर्थः अलंकारे
स्प२ सतीति शेषः उपपादकं त्वस्य तस्येत्यादिः अत्रालंकार इति· तथा च तदुपस्कारकत्वमस्याः स्पष्ट
मिति भावः नन्वस्त्वलंकारयोरिव रसस्यापि वाच्यत्वेन षोढा वक्तुमुचितं यमत आह रसादिरिति·
प्रधानस्येवेति अलंकारस्त्वप्रधानमेवेति भावः वाच्यतायामपि न विरोध इत्यनुषंगः उभयं· अनुगामित्वं
विंवप्रतिविंवभावं च· अयं चोक्तांतर्गतो नातिरिक्तो भेदः अत एव वक्ष्यति त्रितीयोपि त्रिविध इति षष्ठ इति
च· वनस्रजा· आपादतलावलंविमालया· द्वितीयार्द्धं तु· कषायवसनोपातीत्यादौ· यद्यप्यस्ति तदेत्यनेना
रुचिः सूचिता· तद्वीजं तु एकोप्यर्थो भिन्नशब्देनोपात्तो भिन्नमप्रतीयते· अत एवोदेति सविता ताम्र
स्ताम्र एवास्तमेति चेत्यादौ रक्त एवास्तमेतीति पाठे दुष्टतेति प्राञ्चः प्रकृते संवंधिभेदादपि भेदप्रत्य

यत्तयोः भिन्नरूपेण प्रतीयमानस्य वचनसाधारणता साधारणीकरणस्य वचनकश्चिदुपायो विना बिंबप्र
तिबिंबभावापन्नैकधर्मसंबंधित्वं तथा च शब्दाद्ध्दे न प्रत्यये संबंधिभेदाच्च भेदप्रत्यये बिंबप्रतिबिंब
भावापन्नैकधर्मसंबंधित्वेन तयोरभेदाध्यवसाये साधारणधर्मस्येति कथं शुद्धस्योपमानिष्पादकत्व
म् अतएव प्राचः बिंबप्रतिबिंबभावकरंबितएवायमित्याहुरिति प्रकृते तु न तथेति तथा उ प्रकृते नेत्य
र्थः गगनाधिपगगनाभ्यामिति गगनाधिपगगनयोर्बिंबप्रतिबिंबभावे च बिंबप्रतिबिंबभावापन्नसिंदूर
संध्याविशेषणकारुणत्वशोणत्ववस्तुप्रतिवस्तुभावापन्नैव साधारणधर्म इति तयोरभेदे विशि
ष्टधर्मेण स्तुक्तिरिति भावः काऽर्थोऽनुगामीति यद्यपि प्रसिद्धो ज्वलत्त्वशोभाविशेषादिकमादायापि
आचारोऽनुगामी कर्त्तुं शक्यते तथापि कवितात्पर्यविषयताऽस्य वैजिज्ञास्यं तादृशशोभाविशेष ७२
योरैक्यप्रतिपत्तये चानयोर्बिंबप्रतिबिंबभावआवश्यक इत्याहुः केचित् अनुगामिनि हेतुरिति

तयोर्विंवप्रतिविंवभावं विनाभिन्नकरणकत्वेन हृा विसर्जने भेदप्रतीत्या अनुगामित्वमेव न स्या
दिति भावः उपमानिष्ठादिकेति· एवं च वाक्यार्थोपस्कारकैक्यमेपमित्यर्थः विंवप्रतिविंवाभाव
मापन्न इति· यद्यपि स्मयहृत्रात्राव्दाभ्यां प्रतिपादितोपमयोर्वस्तुप्रतिवस्तुभाव एव तथापि त
द्विशेषणयोः शोणाधरनायिकास्तवकावनतलतयोर्विंवप्रतिविंवभाव आवश्यक इति भावः तयो
श्च विंवप्रतिविंवभावे साहचर्यानुयोगित्वमेव साधारणधर्म इति ध्येयं· तत्र तयोरुपमेययोर्मध्ये·
निरूपकत्वेति प्रतियोगित्वेत्यर्थः· तेनैव संवंधेनेति· प्रतियोगितासंवंधेनेत्यर्थः अधरपल्लवयो
रिति कांतालताविशेषणयोर्विंवप्रतिविंवभावमापन्नयोः साधारणधर्मभेदसहितानां पूर्णा
लुप्तादिभेदानामित्यर्थः व्यंग्यत्वे इति धर्माणामित्यस्यानुषंगः लक्षितायामिति धर्माणामि
त्यादिः महिम्नेति तेषु शांतमूर्त्तित्वादेरभावादिति भावः धर्मालक्ष्यं तेन इति· लक्ष्यतावच्छेदके

३ धर्मत्वमित्यर्थः। तन्निरूपितेति। तत्प्रतियोगिकेत्यर्थः। साहश्यपाश्र्य यस्मात्तत्प्रतियोगिन इत्यर्थः। सधर्मणां भेदानामिति। साधारण ३

७३ पिलक्षणेति मत्तेनेदं· इयं चेति उपमेत्यर्थः तत्र नाभौ· अवरोह इति लक्ष्यस्येति एतत्पदलक्ष्यस्येत्यर्थः
73 व्यंजनैवेतीयस्य वोध्यमिति शेषः विनिभात्वितमिति विशेषेण दृष्टमित्यर्थः अत्र चेति प्रतीयमा
नेत्यत्रास्यान्वयः प्रतीयमाना उपमेति अत्रोपमानस्योपमेयत्वकल्पनात्मकप्रतीपस्यैव व्यंग्यत्वं मूढ
पदस्वारस्यात्· चमत्कारातिशयाच्च· किं हृष्यसीत्येतत्स्वारस्याच्चेति केचित्· एतेनेति· एतेनापीत्य
त्रि५ र्थः अपिना प्रागुक्तदूषणसमुच्चयः तैरेवेति· अप्पदीक्षितैरेवेत्यर्थः तस्येति· तवेत्यर्थः नानुचि
तरस्यानुषंगः इयं· स्ववैचित्र्यमात्रविश्रांता· विरुद्धा स्यादिति· वस्तुतस्तु उपमासामान्यल
क्षणस्यापि प्रकृतत्वेनोपमासामान्यस्यैवायं विभागः उपमानोपमेयतावच्छेदकयोर्भेदाच्चो
सैवोपमितिनिष्पत्तिः अत एव समयमुपमेयैवोक्तं न त्वलंकार इति· नयने शिशिरीकरोतु मे शार ७३
दिंदुप्रतिमं मुखं तवेत्यत्र तु दुक्तार्थोपपादनपरैव मुखकर्तृकनयनकर्मकशिशिरीकरणस

कस्युक्तस्येंदूपमेयैवोपपन्नेः उक्तार्थोपपादने स्य स्य चोक्तार्थस्योपपादनेमुक्तार्थे ऽतिशयस्य
वोपपादनमित्यर्थः हृदयं विनिगमनाविरहादिति न दोष इति चिंत्यमिदमिति वोध्यं॰ उक्तार्थोपपा
दनपरोपमायास्तदुक्तमुदाहरणं हृषयति अनंतेति॰ अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि
जातं॰ एको हि दोषो गुणसंनिपाते निमज्जतींदोः किरणेष्विवांक इत्यत्रेत्यर्थः स्फुरतीत्यस्यार्थस्य॰ तृ
तीयचरणप्रतिपाद्यस्य॰ तत्वेनानिर्दिष्टत्वे हेतुमाह सामान्येति॰ अनवतारादित्यग्रे तथा चेति शेषः
अलंकारोयमतिरिक्त इति॰ अदत्वामाह शोमाभूर्दत्वात्वं त्वादृशो भवेत्यमित्रधर्मिकोपमायामु
पमानतावच्छेदकोपमेयतावच्छेदकभेदेनोपमितिक्रियानिष्पन्नरूपमालंकारव्यवहारस्य च सर्वस
मतत्वेन तद्वदिहापि सामान्यधर्मविशेषधर्मयोस्तयोर्भेदेन तन्निष्पत्तेः संभवादुदाहरणालंका
रे मास्त्वतिरिक्त इति न शास्त्रार्थायाश्चिंत्यमेतत॰ उदकोकारे दधीकारे दधीस्यय ईमीतिपाठः त

त्प्रसंगे· उदाहरणालंकारप्रसंगे· अत एव· त्तस्य द्वैविध्यादेव· इयमपि उपमापि· तत्र तासां मध्ये· इयं
च केवलनिरवयवा च· ऐंदवीति· ऐंदवी रुचिरिवेत्यर्थः यातुनिवासेति· राक्षसनिवास इत्यर्थः द्वितीये
त्वमुपपादयति अत्रेति· द्वितीयपद्ये इत्यर्थः सूर्यमंडलस्येति लंकाप्रतिबिंबते सत्रान्वयः अमायां रा
वणवधे सति प्रतिपदि सीता निर्गमिष्यतीति एकदेशाकालावच्छिन्नत्वं बोध्यं· सामानाधिकरण्यादिति·
उपमांतरनिरपेक्षत्वान्निरवयवत्वं त्वामिस्यपि बोध्यं· कमलतीति· अत्र चतुर्षु उपमानादाचारे क्वि
प्· ज्योत्स्नेति ज्योत्स्नाभं मंजु हसितं यस्याः सकलः पूर्णकलः कलाकांतश्चंद्रस्तद्वद्वदनश्रीर्यस्याः
अत्र· उदाहरणद्वये· सर्वेषां अवयवरूपाणामवयविरूपाणां च· तथा च तेषां तदभिधेयत्वमेव
समस्तवस्तुविषयत्वमिति भावः अंगोपमेति· अवयवोपमेत्यर्थः एवमग्रेपि सांगा· सावयवा त
थाचोपमांतरसापेक्षत्वं सावयवत्वमिति भावः मकरामत्स्याः कविता अमृतमिव· कीर्त्तिः चंद्र

इव· विशेषणेति· मयूरव्यंसकेतीत्यर्थः नगरांतरेति· महेंद्रवत्पूजितापीर्यस्यतस्यराज्ञोनगरमध्ये
सुरालयेमत्ताः देवाइवखलुविरेजिरेइत्यर्थः गारस्योपमेति· सुरालयइवसुरालयेइतीतिभावः
नन्वेवंश्लिष्टत्वेपिकथंपरंपरितत्वमतआहान्योन्योपायतारूपस्यैवेति· सावयवायांपरस्परस्त
मर्थकत्वेपिनोपायताज्योत्स्नायांहसितत्वारोपंविनापिओजेत्यादिनासीतायांराकासाम्यसिद्धेः
खुसुमेरु५ इहतुमदिरागारैपमांविनाक्षीवेषुदेवोपमायांनकिंचित्साधर्म्यंतस्मिंश्चतादृशसादृश्यप्रतीति
मूलाभेदमापन्नंसुरालयवृत्तित्वमेवतथा· मदिरागारेषुसुमेरूपमायांचक्षीवेषुदेवोपमांवि
नानसाधारणधर्मइत्यन्योन्योपायता· अन्योन्याश्रयपरिहारस्तुरूपकप्रकरणेवक्ष्यते· चस्त्व
र्थे· केवलपदोत्तरंवायोज्य· महीभृतांपर्वतानांराज्ञांच· गणेसमूहे· रत्नसानुः सुमेरुः काव्येशु
क्रेकवित्वेचवृषपर्वेव· दैत्यराजइव· तेनैव· एकशब्दोपात्तत्वेनसाधर्म्येण· समानधर्मेण· मधुमा

मइव॰ चैत्रमासइव॰ अत्रमालारूपताविरहात्केवलत्वंश्लेषाभावाच्चइत्थं अन्योन्योपायतारूपस्यासंप
रितैत्त्वामितिवोध्यं॰ मृगतामिति॰ मृगाइवाचरतां सर्वभूपानांमध्येहर्य्येनृसिंहइवाचरन्वृक्षाइवाचरंतांते
षांमध्येपरीरयन्चंदनद्रुरिवाचरन्॰ त्वंऋक्षतांनक्षत्राणीवाचरंतांतेषांमध्येभूतलेचंद्रवदाचरसीत्यर्थः
आनुकूल्येइतिअनुकूलतारव्यगुणेसतीत्यर्थः मृगतांहर्य्यनित्यत्रापिमृगाधिपत्वादनुकूलत्वमेवेतिवो
ध्यं॰ एवंप्रातिकूल्येप्युइपरंपरितामुदाहरत्समालारूपश्रुइपरंपरितामुदाहरतिएवमिति॰ कमलवदाचरतां
सतांमध्येशिशिरर्त्तुवदाचरता ऽनेनराज्ञाऽधुनादर्भवदाचरतांसर्वधर्माणांमध्येविदर्भदेशवदाचरितमि
त्यर्थः स्वस्वोपमानोनुपमानानामिति इदंविशेषणमुपमेयोपमायामितिव्याप्तिवारणार्थं॰ भूधराइति॰ प
रमोन्नतविग्रहत्त्वमेकोत्रधर्मः एषैवच॰ उपमैवच॰ परीति॰ सत्कालंकारत्वकेत्यर्थः नन्वेवंकथंतत्रालं
कारव्यवहारोऽत आहास्यांचेति॰ धर्ममात्रेतिउपमात्वेत्यर्थः मात्रपदेनालंकारत्वव्यवच्छेदः अविश्ले ७५

तिअयंराज्ञासार्वभौमः सर्वभूमीश्वरः उदकदिग्गजश्च धारापदंव्यर्थमितिकेचित्सकीचकेरितिवत्स्रयो
गइत्यन्ये· धनदाहृणामग्रेपूजितमूर्त्तिः कुवेराग्रेपूजितमूर्त्तिश्च· सत्त्वंप्राणीवलंच· रसोजलंस्फ़ंगारा
दिश्च· हंसः पक्षीपरमात्माच· अत्रेति· उदाहरणद्वयेइत्यर्थः अद्वितीयमितिवाशब्दोहेत्वर्थः अ
स्त्यादेरप्रत्ययादिति· अत्रमूत्त्वादिपदाप्रयोगेपिकिंचंद्रद्वयप्रसीत्याक्षेपेणास्त्याद्यव्यंग्यानवेति
सहृदयैर्विभाव्यं· लक्ष्यतेइति· अरविंदपदेनेतिशेषः अभेदानुसरणमिति· प्रयोजकसौंद
र्ययोरितिभावः ननुनित्यसांकांक्षस्थलेतथांगीकारेप्यत्रनतथेतिचेदतएवमतांतरमाहसमासे
ति· अत्रमतेगौरवान्मतांतरमाहारविंदेति· तथेतिसमस्तवद्व्यस्तेपीत्यर्थः ननुविशेष्यतयानामा
र्थप्रकारकवोधेविशेष्यतयाविभक्तिजन्योपस्थितेर्हेतुत्वात्कथमिवार्थसादृश्यस्यारविंदस्यान्वय
स्तस्यचकथंसौंदर्येऽन्वयइतआहनिमातेति· उक्तोदाहरणेइवार्थसादृश्यप्रकारताविशेष्य

७६ तान्यतरत्वसत्त्वादन्यतरभिन्नत्वनिवेशः एवेनोक्तकार्यकारणभावव्यवच्छेदः धात्वर्थमाहधीति तत्रैवे
76 तिअरविंदमिवभातीतिवाक्ये एवेत्यर्थः तृतीयार्थाभिन्नप्रयोज्यत्वमन्वयेकर्त्तृभानस्य तत्प्रयोज्य
त्वमन्वयेकर्त्तृभानस्यतत्प्रयोज्यत्वाभावादाहेवार्थइतिकर्त्रीयैवेत्येवेन लक्षणादिव्यवच्छेदः समान
धर्मिणेत्यस्यपूर्वेणान्वयः ननुतस्यतत्त्वेनप्रतीतावेवनमानमत आह गजइवेति अनन्वयोवोध्यइति
वस्तुतस्तुवनं गजइवरणभूमिं स्मरोगच्छतीत्यादौवनकर्मकगमनानुकूलकृतिमद्गजसदृशः स्मर
भूमिकर्मकगमनानुकूलकृतिमान्स्मरइत्यादिवोधः इवशब्देन च विंबप्रतिविंबभावापन्नवनस
मरभूमिविशेषणकगमनमेवधर्मत्वेनवोध्यते इवादयश्चधर्मत्वेनैववोधकाइतिसर्वसंमतं गज
इवयः पुरुषः सगच्छतीत्यत्र चेवेनगमनान्वितएवश्मश्रुत्वादिर्धर्मत्वेनवोध्यते पुरुषोयः सगच्छतीत्यत्र ७६
तुगमनमेवतथेतितयोर्विशेषोप्युपपद्यतेएवं उपमायाविधेयत्वे चैतदेवयद्विधेयस्यैवधर्मत्वेनो

पमावोधकवोध्यत्त्वमितिचिंत्यमिदम्· वैयाकरणनयेतुक्रिययोरेवोपमानोपमेयभावः गच्छती
त्यस्यचाहत्याउभयत्रान्वयः गजादिपदानांस्वकर्त्तृकक्रियायांलक्षणावेतिदिक्· कारकोपेतिक
त्रीदीत्यर्थः अंगीकारेदोषमाहागीति· उक्तदोषमुद्धरतिकथमिति· मात्रपदेनेतरनिपातव्यवच्छे
दः कथमिति· भेदेनाभेदेनवेत्यर्थः तत्रनाद्यइत्याह तुल्येतिउक्तव्युत्पत्तेरितिभावः नाप्यभेदेनेत्या
हनचेति· धात्वर्थे· भानरूपे· उपपत्तेरितितथाचोक्तरीत्याअभेदेनैवान्वयइतिभावः मतांतरमाह
धात्त्वोरेवेति· तथाचतस्यतोहृश्यो विशिष्टएवार्थइतिनोक्तव्युत्पत्त्यवसरइतिभावः इत्यपिकेचि
दिति· वस्तुतस्तुउपमाविधेयकबोधेतात्पर्ये अरविंदतुल्यमित्येवसाधुनतुतुल्यइति· यदितुवि
धेयस्यधर्मत्त्वेनोपमावोधकवोध्यत्त्वमेवविधेयत्त्वमुपमायाइतिविभाव्यतेतर्हिअरविंदतुल्यविषय
कंभानंभानविषयोऽरविंदतुल्यइतिवावोधेपिमातस्यैवधर्मत्वेनभानादुपमायाअविधेयत्त्वमे

७७ वः धर्मांतरस्यतथाभानेतुअरविंदतुल्यइत्येवप्रयोगःसर्वसंमतः उपमायाउद्देश्यतावच्छेदकत्वंचे
77 तिध्येयं· अरविंदमिवसुंदरमित्यत्रेवेतिवस्तुतस्तुक्रिययोस्तुल्यत्वेएवतेनतुल्यमितिवतिविधाना
दरविंदमिवसुंदरमित्यादिवत्कथंवाधइतिचिंत्यमिदं· अतएवब्राह्मणवदधीतेइत्यत्रब्राह्मणकर्तृका
ध्ययनेब्राह्मणपदस्यलक्षणेतिमहाभाष्यकारादयः अरविंदवत्सुंदरंमुखमित्यत्रचभवतिक्रिया मि४
अध्याहार्या अरविंदपदेनचसुंदरारविंदभवनंलक्ष्यते· तथाचसुंदरारविंदभवनसदृशंसुंदरंमुख
भवनमितिशाब्दबोधवृत्तेअरविंदमुखयोः सौंदर्यधर्मकृतसादृश्यंव्यंजनयाबुध्यते· एवमरविंदव
न्मुखमित्यत्रापिअरविंदभवनसदृशंमुखभवनमित्येवबोधायुक्तइतिबोध्यं· एकत्र· अरविंदमिवे
८२ त्यत्र· अपरत्र· अरविंदवदित्यत्र· सादृश्यवदभिन्नमितीतिबोधइत्यस्यानुषंगः लक्षणानेतिभा ७७
वः अतएवतुः प्रयुक्तः सौंदर्यलाक्षणिकतयेति· तत्रतत्स्यवेतिवतेरिवार्थविहितत्वेनसादृश्यार्थकस्स

तस्य प्रयोजके लक्षणया अरविंदसादृश्यप्रयोजकमेतत्संबंधि सौंदर्यमिति बोधे उपपन्ने ऽरविंदपद
स्यारविंदसौंदर्यलक्षणा किं फला किं प्रमाणा चेति चिंत्यमिदं शाब्दे इति वृत्ते इति शेषः तयोः मुखा
रविंदसौंदर्ययोः अभेदस्य ससादृश्यमूलेत्यादिः अभिन्नधर्मेति सौंदर्यरूपेत्यर्थः सादृश्यं तुल्य
पदार्थैकदेशे अभेदान्वयमितीत्यस्य स्वबोध इति शेषः एवमग्रेऽपि निरूपितप्रयोज्यत्वे सादृश्यविशेष
णे अभिन्नमिति अरविंदमाननं चेति शेषः परस्परेति मुखसादृश्यस्य कमले कमलसादृश्यस्य
मुखे इत्यर्थः विनिगमनाविरहादिति भावः प्रसिद्धत्वस्य गमकत्वादाह प्रसिद्धेति अरविंदेत्यर्थः सा
दृश्यवेति प्रतीतिरित्यस्यानुषंगः पन्नेति तितदापन्नधर्मके चित्यर्थः सहोदरशाब्दार्थमाह सह
शेति तदात्म्येति अभेदेत्यर्थः लक्ष्यांतरमाह कुंकुमालेपेति साधारणत्वेति सादृश्यमूलाभे
दाध्यवसायेनेत्यादिः कल्पनीयमित्यपतिरित्यस्य पतिरित्यर्थः अन्यत्रादृष्टप्रयोगादिति भावः लक्ष
नग्रो१

७८ 78

णयेत्यस्यारविंदपदस्येत्यादिः त्रोष्ठमिति तस्य चाभेदेनेत्यादीत्यर्थः अन्यथा चेति अरविंदपदोत्तरपाचे
त्यर्थः एकदेशान्वयः प्रागवदेवेत्याह साहश्यमिति लुप्तास्थलेवोधमाहकाऊ थेति साहश्यस्यातिरिक्त
त्वेः आह प्रयोजकत्वेति धर्मरूपत्वे आहाभेदेनवेति विन्नोष्ठमित्यस्य तस्य चेत्यादिः तत्र साहश्ये नतु
नद्योतकत्वं साध्यं अनर्थकनिपातेषु निपातत्वत्तु द्योतकत्वाभावेन व्यभिचारात् तस्य द्योसंसाध्य
माहनवाचकत्वमिति तथा च वाचकत्वाभावे साध्ये नोक्तव्यभिचार इति भावः नानार्थभिन्नस्थले त्रा
क्तावोधने तात्पर्यग्राहकानपेक्षणादाह लक्षणपेति लेनलकारेण अप्रयोजकत्वादिति साक्षा
त्क्रियते दापि तेत्यादौ लेन दयितादेरभिधानसिद्धये निपातत्वे द्योतकतावच्छेदकता कल्प्यते इति
चिंत्यमेतत् द्योतकत्वापत्तिरितिनचेष्टापत्तिः स्वरादीनां स्वातंत्र्येण प्रयोगानापत्तेरिति भावः अस्याः ७८
प्रकृतोपमायाः समयः संकेतः आनतुरूप्यमिति नञ्समासोत्तरं भावप्रत्ययः कालोभूतादिः पुरुषः

प्रथमादिः प्रफुल्लेति· अत्र कल्हारमुखयोः केसरोष्ठयोः कर्णेरवाण्योश्च तत्त्वं तत्संकितां प्रसिद्धं· कल्हा
रः पुष्पविशेषः रदानां दंतानां छदोपवारकः पल्लवः ओष्ठ इतियावत्· विनीति विशेषणं निर्वृत्तक्रिया
समूहः अत्रभ्रमुन्योः श्रुकश्रुनोश्च जात्याऽऽननुरूप्यं· लवतच्चंचलं स्तुपचेलिमं अंसंतपक्कं आ
दिकारणेति अपएव समर्जीदोनासुवीजमवास्टजादितिश्रुतेस्तत्त्वमिति भावः अत्र प्रमाणत आ
ननुरूप्यं· तयोरत्यंतवैलक्षण्यात् पतसोषकमपि स्तुपचेलिममिति विशेषणं फक्कस्यात्यंतसूक्ष्मत्वात् किंचि
सदेतिर्वल्लवसदयोरित्यर्थः मांसीवसमाभाति· लवतत्रस्तांडइतियावत्· अयमेव प्रमाणत अननुरूपता
स्यएव· द्राक्षेति· अत्र पूर्वार्धलिंगोदाहरणं उत्तरार्धलिंगसंरंभोदाहरणं वामेति वामया पार्श्वस्याकलितं
सीकृतं वामांगं यस्य सः त्वंपया· विद्युल्लतया· जीमूतो मेघः राजराजस्य· कुबेरस्य· ननिशाकरस्येति तद
यक्रियाविशेषस्य वर्त्तमानत्वात्· निशाकरस्याकल्मस्याधिपत्वात् एवमग्रेपि बोध्यं· धर्मस्य क्रियाविशेष

७९ स्य॰ अस्यैवोदाहरणांतरमाह यथावेति एवमग्नेपि॰ विभोः श्रीरामस्य वलितास्तीक्ष्णाः ईरितमिति वचइ
79 तिशेषः तदुक्तं॰ नायिकागतेतत्सोषितं नायिकागतौत्सुक्यातिशयपोषितं औत्सुक्यमिति उल्लासीत्यस्या
नुषंगः तस्यैव ईक्षणस्यैव॰ नोपमानान्वितत्वमिति॰ तथा चानुपपद्यमानकालार्थकत्वं सर्वत्र बोध्यं स
षु सर्वेषु भूतपूर्वनिष्पन्नतत्पदार्थानामेवोपमानीकरणे नान्वयस्य संभवोऽस्मिन्निति चिंत्यान्येतान्युदाह
रणानि स्यस्यामिवै देहस्तुतांपुरस्तात्समुद्रने मिंपितु राज्यैवेत्यादि तदाहर्तुमुचितं राजेवचंद्रइ
व॰ नोपमानेति तथा चानुपपद्यमानपुरुषार्थकत्वमत्र बोध्यं॰ विद्यादीत्यादिपद्यस्याप्यप्रार्थनो
श्लो ३ दाहरणमाह राजेवेति॰ नास्तीति॰ विशेषणाः भावप्रयुक्तविशिष्टाभावोत्र तदाहतयोरिति त्रा
यतेइतीति लडंतमिति र्भिर्भवः लडंतपक्षे शंकते अथेति॰ विधेयतेति उपमाननिष्ठतत्रानुवाद्यत्वमु ७९
पमेयनिष्ठे तत्र विधेयत्वमिति भावः प्रार्थ्यमाननायाइवे स स्वप्रार्थ्यमानतातदभावयोरित्यर्थः

साधारण्याभावे सतीति विशेषः प्रयोजकेति सादृश्यप्रयोजकसाधारणधर्माभावादित्यर्थः तत्र तस्या
मिलर्थः २ मुपमायां उदासीनैः शब्दाप्रतिपाद्यैः प्रसिद्धोदाहरणेष्वेवमेवेत्याहैवमिति तथाच तत्कृतभेदे पि तस्यान
लसर् पेक्षितत्वादपेक्षितस्य तत्त्वाल्लुडंतपाठेन दोषः इत्युक्तं युक्तमेवेति भावः प्रतीतियमुनागभीरजलमध्ये
प्रतिबिंबितश्चंद्र इवेत्यर्थः योगेति बहुव्रीहीत्यर्थः स्वेति अंकेत्यर्थः तादृशेति हरिणानयनसदृशेत्यर्थः
एवमग्रेपि इष्टेइति नयनस्याननमात्रसंबंधित्वादिति भावः तदाहानुभवेति शंकेत तथापीति तद
न्तित्वस्यार्थिकप्रतिपन्नावपीत्यर्थः समभातिरावृरूपेत्यर्थः शब्देन हरिणानयनशब्देन अप्रतीति
नयने आननवृत्तित्वस्येत्यादिः विषयता त्रिविधा प्रकारता विशेष्यता सांसर्गिकी च तत्राद्ययोरभा
पिर्मं २ वेथं स्यास्तु वचेत्याह संसर्गत्वेइति आननस्येत्यादिः तदेवाह स्वविशिष्टेति नयनविशिष्टे
त्यर्थः नन्वेवमपि प्रकारतयाविशेष्यतया वोपमेयवृत्तित्वज्ञानस्य बिंबताप्रयोजकत्वात्कथं

८० विंबत्वमत आह यथा कथंचिदिति न तत्र श्रीसेव तथा च संसर्गतया तत्त्वसत्त्वान्न त्वं सुवचं · नन्वेवमपि अति
प्रसंगापत्तिः · न हि संसर्गतयाभासमानस्य ज्ञानाद्ध्वस्त्वमत आह यद्वेति ताहृशेति हरिणीयत्वनायकीयत्वविशि
ष्टत्वस्यार्थः तद्विशेष्यतिनयनविशेष्येत्यर्थः ताहृशेति कांताविशेषणत्वे न नयनबोधकेत्यर्थः साक्षात्तज्जन्य
त्वाभावादाह प्रयोज्येत्यर्थः इति ज्ञाने वैयंजनिका दोषः नद्धर्थं तत्त्वमिति विंबाकांक्षाशांत्यर्थं · एवमाधिक्यदोषं परि
हृत्य नीलांचलेनेत्यत्र लिंगभेददोषमुद्धरति कवीति एवमन्यत्राप्यपवादमाहेवं चेति त्वत्र तदभावसि तप
द्धौ चेत्यर्थः तत्रादोकविसमयसिद्धतयेत्यस्य लक्ष्यमाह यथेति · ननु किं न तत्प्रकारांतरं येनादुष्टत्वमत आ
ह श्लेषमिति · प्रक्रमप्रकृतमुपसंहरति इत्युपमेति चंद्रालोके त्वनेकस्यार्थयुग्मस्य साहश्ये स्तबकोपमा ·
श्रितासि चरणौ विष्णोर्भृगस्त्वामरसौ यथा · स्यात्संपूर्णोपमायत्र द्वयोरपि विधेयता · पद्मानीव विनिद्राणि ८०
नेत्राण्यासन्नहर्मुख इति भेदद्वयमधिकमुक्तं ॥ ॥ इति रसगंगाधरमर्मप्रकाशे उपमाप्रकरणमुपमा

द्वयमिति पतोः ततः पुनर्वर्ण्यमानमिति विशेषः एकेनेत्यस्य यतइत्यादिः तदर्थं तेन धर्मेण सादृश्यसिध्यर्थं स
दृशीति व्यक्तिरित्यर्थः समस्तेति सर्वैरित्यर्थः विभाव्यते विभावनाविषयीक्रियते मतिमिति तदेत्यादिः
तदा एवं बुध्यारूढं भवति कौमुदीइव तत्वसदृशीतीत्यर्थः अत्र कौमुदीमिन्दोः कांतासादृश्यनिषेध
स्य शब्दतः कथनादीषत्सादृश्यस्य चंद्रिकायां कथनात्तृतीयसदृशाव्यवच्छेदः फलितस्तदाह तृती
येति परस्परमितीति कौमुदीसादृश्योक्तेस्तत्राभाव इति भावः दृष्टेति घट इव पटः पट इव घट इत्या
देस्तु सामान्यप्रामालंकारत्वेनैव निरास इति भावः तवांबुजं सममिति अत्र तुलितं सममित्युपमा
कृत वाचकवैलक्षण्यं वक्ष्यमाणोक्तिप्रकारादिवैलक्षण्यमिव दुष्टमिति चिंत्यमिदं व्यक्तेति व्यंजिते
त्यर्थः निगमेति वेदसमूह इत्यर्थः तथा गरीयान् विशेषणेति स्तवकवक्षोजयुगले त्यादिः एव
मन्येपि वस्त्विति वस्तुनस्तयोरुक्तत्वादिति भावः पुटितः संपुटितः कुलिशमिति अत्र पृथिवीनिष्ठक

८१ ठिनत्वस्यमनसिसुधानिष्ठमाधुर्यस्यप्रकृतावुपचारःअवीतिनिरंतरचिंतनस्यापिमुनवृत्तिलेपिद्दकाहन्निस्वात्स
८१ रूपत्वस्यसाधुचिन्तहन्निस्वेपिभारतग्रंथाहृन्नित्वाद्धद्‌एवसमानोत्रधर्मःनचोपचारितत्वंशंकांएकनिष्ठस्यान्य
त्रारोपेनत्वेपिप्रकृतेतत्वेनाप्रसिद्धत्वात्‌·अंततः·आर्कशाध्येसमुद्रमध्येच·आदिनादुर्घेनुलंसेतुस्वर्गंग ८३
स्तचयितुः४ योःसंगृह्यते·व्यक्तपदार्थँमाहव्यज्येति·वाक्यभेदेइति·उदाह्रियतेइतिशेषः·वेधसेविधात्रनिर्मिते·उदं
चति·प्रकाशयति·परस्परात्मना·परस्पररूपतया·इदंनयनंएतेननयनेनएवनत्रोपि·विचारकमितिविव
रणरूपमित्यर्थः·एवं·अनुगाम्यादिधर्मभेदवत्‌·अस्याः·उपमेयोपमायाः·असंभावितभेदवारणायप्रायइत्युक्तमि
ति·दिश्या·रीत्या·प्राचीनेति·उपमानोपमेयत्वंद्वयोःपर्यायतोयदि·उपमेयोपमासास्याद्द्विविधेयाप्रकीर्त्ति
तेत्यर्थःअव्याप्तीतितद्धल्लुनायुगपदुन्मिषितेनतावदित्सत्राव्याप्तिःस्तोभिःस्यंदनोद्धृतैरित्यत्रातिव्याप्ति ८१
रितिभावःततीयार्थःप्रातियोगित्वमित्याशयेनाहान्योन्यप्रतीति·लक्षणायाअसंभवादाहद्वाक्येतिइवादि

सत्वेइति भावः विश्रांतेति उभयत्र पर्यवसितान्वयोपस्थितीनस्यामित्यर्थः शक्तीति समंपदेस्यादिः ननु मिथोनि
रपेक्षत्वेननिविष्टमत आह परस्परेति अन्यथा पक्षांतरकथनासंगतेरितिभावः अर्थेइति अर्थरूपायां
तस्यामित्यर्थः रजसामिति प्रयोजकीभूतरजो ऽभिन्नानुगामिधर्मस्येत्यर्थः समानविभक्तिकत्वस्यैव
समानवचनत्वस्याभेदान्वयेनतंत्रत्वमितिभावः एवमग्रेपि घनगर्जयोर्भेदेनसाधारणत्वंकथमत
आह विंवेति प्रयोजकमिति अनुगतानतिप्रसक्तलक्षणमात्रंतुसहृदयास्पदतृतीयस्यव्यवच्छेदापय
द्वयोः अन्योन्येनोपमेयत्वंसोपमेयोपमामतेतिदृष्टव्यं अत्रान्योन्येनेति विशेषणमहमेवगुरुः
सुदारुणानामिति प्रतीपविशेषव्याहृत्यर्थमितिभावः अहमितिलतानुयोगिकसाहश्यायाश्रयाह
मित्यर्थः अरवर्वंमहांतं एषापीतित्वदनुयोगिकसादृश्यप्रतियोगिकेत्यर्थः अत्रेत्यस्येतीत्यादिः
ननु त्वेसस्यानुपात्तेत्यादिः लतादीति लताद्यनुयोगिकसादृश्यप्रतियोगिकत्वस्यैवेत्यर्थः एवं

८२ नसादृश्यसादृश्यव्यवच्छेदःसदृश्यादिपदानांधर्मिबोधकत्वादेवंचसादृश्यस्यतत्रान्वयेदृश्यंनतुस्त्रेतिभावःसु
82 खस्येतिअत्रापिसदृशपदस्मत्त्वेनतत्तुल्ययोगक्षेमत्वादितिभावःनन्वेवंतथादुर्वचमितियथैमत्संग्रहस्त
थाहंलतायाइत्यस्यापिसंग्रहदृष्टएवेतिअतिव्याप्तिर्नोतआहनत्वहमिति·ननुतन्मात्रपरत्वेएवकिंवी
जमतआहातपवेतितत्परत्वेनतस्याःसाफल्यादेवेत्यर्थःउत्तरार्धं·तदेकदेशःअन्यथातुर्यचरणेनैवे
ना५ ष्टार्थलाभेमध्येएतत्कथंवानर्थकंस्पष्टमेवेतिभावःनन्वेवमपितृतीयसदृशाव्यवच्छेदप्रतीतावेविषमित्य
त्रकिंविनिगमकमतआहतृतीयेति·सब्रह्मेतिसदृशोत्यर्थःएवमग्रेपिबोध्यं·सिद्धांतइतिपाठःसिद्धांतादि
प३ त्यैपाठःअन्यथातस्यतज्जीवितत्वानंगीकारे·वाच्यमितिअहंलतापाइत्यत्राव्याप्तिवारणायेदानींवक्त
व्यमित्यर्थःविशेषणांतरेतिअन्योन्येनेत्यादीत्यर्थःनन्वेवंकथमुक्तदोषनिरासोऽतःआहविशेषणेतिवि ८२
शेषणांतरेत्यर्थःतदुक्तमन्यदूषयतिअन्योन्येति·प्रतियोगित्वस्येति·अनुयोगित्वविशिष्टेत्यादिःननुतस

वृत्तिविषयत्वं कुतो नेत्यत आह वृत्तीति· उक्तग्रंथस्यैकवृत्तिमात्रवेद्यत्वेन ततोऽस्यार्थः किं तु वृत्तिद्वयवेद्यत्वा
भावे· यद्वा तज्जन्यप्रतीतौ यथा कथं चिद्भासमानत्वमेव तन्मात्रवेद्यत्वं अस्ति च खमिव जलमित्या
दौ· नास्ति च तत्रेति तन्निरास इत्याशयेनादौ षाष्ठिकत्वमिदं· द्वयोरिति द्वयोः पर्यायेण तस्मिन्सतीत्य
र्थः अत्रेत्यस्य यत इत्यादिः ननु स्फुटत्वार्थत्वे अन्येषामपि निवेशः कुतो नात आह प्रमेति· तद्भेदेष
तद्योग्यतायाः सत्वादाह कवीति· इष्टापत्त्या नातिव्याप्तिरत आह तदिति भावापामिति उपमेयोपमा
नैत्तिकायामित्यर्थः विधवेतीत्यादीन्याचारक्रिवंतानि· यथासंख्यमन्वयः नचेति नहीत्यर्थः तथा च
लक्ष्यत्वान्नातिव्याप्तिरिति भावः मत्रपदव्यवछेद्यं स्फुटत्वायाह तृतीयेति· सहृच्छांतरेनितृतीयस
वृत्त्येत्यर्थः विशीति· विशेषविषयीकृते तु इत्यर्थः तस्मिन् उपमानोपमेयत्वे· अस्मदिति· वृती
यसदृश्यव्यवछेदेत्याद्युक्त एवेत्यर्थः विमर्शिनीति अलंकारसर्वस्वव्याख्याकारेणेत्यर्थः सचे

८३ 83 तिमल्लीयत्वेनप्रागुक्तइत्यर्थःअस्याःउपमेयोपमायाःउपमानांतरेतितृतीयसपत्नसद्भावोइत्यर्थःहिय
तःअनुगामीतिरज्ञोरूपेणेत्यर्थःबिंबेतिद्यनगजेत्यर्थःसच·मिथउपमानोपमेयभावश्च·हिःपूर्वहेतुत्व
परामर्शकःइतीत्यस्यबोध्यमितिशेषःअतिमात्रेणअतिशापितेन·व्यक्तिरेवव्यंजनैव·इदंवक्ष्य
माणं·सुधेतिराजानंप्रतिकव्युक्तिःहेक्षमाचंद्रतवरम्यवाणीसुधासमुद्रमाधुर्यमध्यापयितुंस
क्रमतववाचंमाधुर्यमध्यापयितुंचमहेतीमानसिकगर्वसूचकाकारव्यक्तिंधत्तइत्यर्थःलक्षणये
त्यस्याध्यापयितुमितिपदेत्यादिःएवंमुख्यार्थबाधतद्योगावुक्त्वाप्रयोजनवतीत्वमाहप्रयोजनमिति
संलक्षणा·तत्प्रतीतिश्चवैयंजनिकोवितिभावःदोषाइति·अस्याइत्यादिःउच्यतेइतिशेषःतत्रवक्त
व्यानंतिषांमध्ये·प्रागुपमायांमुक्तायावंतोदोषाइत्यन्वयःनतत्परिगणनमित्याहातुक्ताश्चेति·न
नूपमादोषाअत्रकथमतआहोपमात्वेति·अतएवास्याएवभेदइतिप्रतिज्ञावाक्येऽस्ते·तदद्वयत्र ८३

दोषमाहार्यं पुनरिति· इति वेतिकमल्लमित्यादिः निर्माणे इत्यस्यानुषंगः उपसंहरति एवमिति यदीत्यने
न तदाभावः दुष्टत्वमेवेति सूचितं· इत्युपमेयोपमाप्रकाशः स्फुटइति· स्ववैचित्र्यमात्रविश्रांतद
त्यर्थः भूभृतः पर्वतस्य· कदाचित्समये तैराकीर्णस्वमिवेत्यर्थः स्फुटत्वापत्रत्युदाहरणांतरमाह दैवेति·
अत एवाहात्रापीति· स्वात्मनैव· पदांबुजद्वयेनैव· संप्रतिवर्णनकाले· तत्प्रवाहस्य· अत्र· प्रत्युदा
हरणद्वये· द्वितीयसब्रह्मेति· द्वितीयसदृशेत्यर्थः अनन्वयव्यर्थनिबंधनवशाद्धि द्वितीयसदृशव्यव
च्छेदः फलति· नहि धर्मांतरावच्छिन्नस्वस्य धर्मांतरावच्छिन्नस्वेन साधर्म्यमनन्वयि· अत एवोपमेयता
वच्छेदकोपमानतावच्छेदकयोर्भेद एव साधर्म्यघटको न तु धर्मिणोरित्युक्तं प्राक्· एवं चानन्वयव्यर्थानिबं
धनप्रयोज्यद्वितीयसदृशव्यवच्छेदफलकसादृश्यवर्णनमानन्वयः एकोपमानोपमेयकत्वविशेष
णं चत्रैवार्थे तात्पर्यमाह कर्मेतिभावः तदाह तस्येति· तद्व्यवच्छेदस्येत्यर्थः + तथा धर्मिभेदादेव तत्रवारणे

न तद्वैयर्थ्यं स्पष्टमेवे +१

असतइतितथाचधर्म्मिभेदःस्पष्टोत्र·नास्तीति·अन्यथानावश्यर्यंतधावनंव्यर्थंस्यादितिभावः·अथ·अ
ल्पपापकरणानंतरं·सपदितत्कालमेवनतुकालांतरे·प्राक्तनसुकृतोद्रेकादितिभावः·अपीति·प्रायश्चि
त्तप्राप्तिविषयत्वातिक्रांताचरणकानपीत्यर्थः··नरानितिसर्वाङ्गपिविशेष्यं·कुरुकर्तुं·निष्पापत्वेनस्वी
कर्त्तुं·जननि·गंगे·उदारणांतरदानेवीजमाह·पूर्वेति·विजयसेइतिवाच्यः·सर्वोत्कर्षरूपइत्यर्थः·इहतु
इतिस्र एवानुगामीतिशेषः·पूर्ववदत्रस्पष्टैवलक्षण्याभावादाहतुशब्दोपमिति·तुशब्दोत्रेतिपाठांतरं·
रतीति·कविनिष्ठसादि·अत्र·उभयत्र·बाधकाभावादिति·चोवाक्यालंकारेहेतौवा·सहद्यांतरञ्च
वहेदाप्रतिपन्नावन्वयेबाधकाभावद्धिहेतुः·सच·अनन्वयश्च·षड्विधोपीति·श्रोतार्थयस्त्वयोम
सेकंवाक्यसमासतद्धितगामित्वेनेतिभावः·गंगेति·अत्राद्यपादेश्रोतोवाक्यगःपूर्णाद्वितीयापादे ८४
समासगश्रोतःपूर्णःतृतीयपादेआर्थोवाक्यगापूर्णः·तुर्यपादेसमासगआर्थपूर्णाः·पंचमपादेतेनतु

६

त्वमितिवर्त्ततेः सत्वादार्थः तद्धितगः पूर्णः षष्ठपादे तत्र तस्यैवेतिवर्त्ततेः सत्वात्क्षोस्तद्धितगाः पूर्णैतिवाधं।
लुप्तेष्वपीतिपाठः भेदे षष्ठितिरोधः निर्धारणे एकवचनासंगतेः पंचविधोपीति। श्रौतोवाक्यगः आर्थो
वाक्यगः श्रौतः समासग आर्थः समासगः आर्थस्तद्धितगश्चेत्येवमित्यर्थः एवंतेषामेवोदाहृतत्वा
दितिभावः पदान्तरे तिगंगाराजन्यथा गंगा गंगा गंगैव सर्वदा। हरिणासदृशो विष्णुर्विष्णुतुल्यः स
दा हरिः गुरुवद्गुरुरास्ते स्मिन्मंडले गुरुवद्गुरोरितिन्यासे इत्यर्थः कर्मणमुल्गतमुदाहरतिएवं
लंकेति। ईदृशो दशास्यः रणेकुंडं सपदि दाशरथिं संरब्धदाशरथितुल्यं ददर्शेत्यर्थः संरब्धदा
शरथिरिवदृश्यतेइतिकर्मणिणमुण्। धर्मवाचकलुप्तमुदाहरतिएवंलंकेति। ईदृशो दशास्यः रणेकु
ण्डं सपदिदाशरथिंसंरब्धदाशरथितुल्यंददर्शेत्यर्थः संरब्धं वेति। अत्रसर्वत्राचारेक्विप्। अंवरं आकाशं।
ननु कोसौवाक्यार्थोयद्वपवास्तुपो ननुयाअत आह मुखइति मुख्यइत्यर्थः मुख्यइतिपाठस्तूचितः न

८५ तुमालोपमाद्रष्टवास्तिसर्वमनुक्तत्वादत आहैषाचेतिमालोपमाचेत्यर्थः अत्रैव अनन्वयप्रकरणे एवः वाच
८५ कधर्मोपमानलुप्तमुदाहरतिएतेति· तज्ज्ञैः रामस्तरूपज्ञैः पूनतांनिराचक्षेऽत्रचेति· संभवेप्याहाहृद्येति·
नेनेसस्यार्थमाहोपेति· आगुखेतिअमुखमित्यर्थः तदेकदेशेनेसस्यार्थमाहोपेति· तथैवउपमेयवत्· अ
वसितभेदेनेसुस्यार्थमाहोपेति· प्रतिविंवोऽत्रलौकिकः अवसितस्यनिश्चितस्यतत्वेति· उपमानत्वेस
र्थः महिलास्त्रीदक्षिणाधर्म्येतिकर्मणः शेषत्वविवक्षायांषष्ठी· अत्रोपमेयंसमुदितानायिका· गंधे
नेति· हे सिंधुरधुरंधरवक्रगजश्रेष्ठमुखगणपते ऐरावणप्रभृतयोपि ऐरावतादयोपि ते त्वयागंधेनसुगंधे
नमैत्रीनदीक्षिताः यद्वा गंधेनः संवंधेनलेशेनवा· गर्वेणवा· अपिगंधपदोत्तरंमैत्रीपदोत्तरंवायोज्यः
नतस्मात्कारणात्वंकैलासाचलरत्नखचितमित्याधारिकस्वप्रतिविंवेषुयूथपतित्वंदिग्गजत्वंक ८५
थमेषीत्यर्थः उपमानांतरविरहहरति· तत्राद्येस्फुटएव· द्वितीयेतद्वयवस्यतदवयवांतरोपमया

तस्मान्निरुपमत्वं सिध्यति· अन्यथा तत्सदृशापदार्थावयवेनैव तदवयवस्योपमानं स्यात्· तृतीयेपि प्र
तिबिंबस्योपमानत्वकल्पनया अन्यस्योपमानस्याभावो गम्यते· तथात्वेति अनन्वयत्वे स्यर्थः इष्टाप
त्त्या वाह यद्यथेति· तादृशेति उपमानांतरविरहेत्यर्थः सादृश्यविशेषणमुभयं· तत्त्वे· अनन्वयत्वे· पु
नःशब्दस्तुशब्दार्थे· भिन्नयोरितितथा च द्वितीयविशेषणाभाव इति भावः तद्भेदत्वेति· अनन्व
यविशेषत्वेत्यर्थः सेति· उपमेयेत्यर्थः इदमीमाद्यविशेषणं न देयं न द्विरहस्यैनानरीयकत्वा
दिति भावः विरहेणेति अबाधितत्वादिति भावः ननु रूढमेवान्वयपदमत आहापि चेति· अत्र
च द्वितीयभेदे च· निरुपमत्वं एवमुपमानांतरेत्यादिना प्रतिपादितमिति भावः विरहेणेति अबाधितत्वा
दिति भावः ननु रूढमेवानन्वयपदेमत आहापि चेति· अत्र च द्वितीयभेदे च· निरुपमत्वं· एवमु
पमानांतरेत्यादिना प्रतिपादितं ननु तेन ग्रंथेन कांतायो निरुपमत्वं प्रतिपादितं न तत्रात आह कांते

ति। अनन्वमध्वनित्वमिति तद्धामार्धं दक्षिणार्धमनुहरतीत्युच्यतां सोऽनुहरतीति व्यंग्यमिति भावः ए
वं चास्य हीत्यादिना विमुच्यते तद्धि चार्यं सहृदयैः ईदृशव्यंग्यव्यंजने उपायाभावं इत्य विकश्चित्‌ अत्र
द्वितीयलक्ष्ये· ह्रियतः अस्यानन्वयस्येदं स्वरूपमित्युक्तं अतस्तु लक्ष्यमित्यर्थः तदुपपादयति प्रकृ
तेचेति· नत अभिन्नोपमानोपमेयकं साहृश्यं नेयोभेदात्‌· ननु कां जागतनिरूपमत्वस्य व्यंग्यत्व
न तस्मा एवोपमेयाया उपमानत्वकल्पनेन तादृशसादृश्यप्रतीतिस्तयोस्तस्य बाधितत्वेप्यस्य
वात आह कांताया इति· सादृश्येप्यनन्वयः कालिदासेपेति· स्तनाभोगे इत्यत्रेत्यर्थः अतीतिपद्यार्थाती
त्यर्थः उपसंहरति तस्मादिति· सैव· त्वदागमनप्रभवैव· अमुष्या इति यतः इत्यादिः व्यक्तोरितिभेदेनेति शे
षः योगार्थेति अनन्वयपदयोगार्थस्येत्यर्थः ननु रूढमेवानन्वयपदमभिमतमत आह स्वस्मिन्निति· व्यवच्छे ८६
देवाधारिति· तस्य व्यवच्छेदकरणे सामर्थ्यादित्यार्थः कालांतरस्थप्रीतिव्यक्तिविशेषस्य सदृशस्य

सत्वादिति भावः नादृत्रोति श्रीकृष्णागमनजन्ये इत्यर्थः पूर्वोदाहृरेति · अनुहरतीत्युदाहरणे इसामर्थ्या
दित्यर्थः ननु अवयविनो निरूपमत्त्वप्रतीतिवन्मध्ये सादृश्यप्रतीतिरप्यस्तु अत आह क्वचिदिति पूर्वोदा
हरणे इत्यर्थः सैव · श्रीकृष्णागमनजन्यप्रीतिरेव · मध्ये · वाच्यव्यंग्यार्थयोर्मध्ये · चमत्कारीत्यान व्यंग्यत्वं
किंतु रत्नाकरोक्तरीत्येति नो कृदोषो ऽत आह रत्नेति तत्स्य प्रकारस्य · प्रकृतेऽवाच्यत्वात् अवाच्यत्वे
हेतुः प्रागेव दूषितत्वादिति · ननु त्वयादूषितो ऽपि न मया दूषितस्तत्राह स्वयमिति · अन्यथालंकारध्वनेर्वि
षयापहारः स्यादिति रत्नाकरोक्तिं खंडयितुमाह इदं पुनरिति परपुष्टाः कोकिलाः हे आम्रवृक्ष तव मधु विभ
वेन सादृश्यं भ्रमरेण न पदे गृहीतमित्यर्थः नगेभ्यः पर्वतेभ्यः कपर्दी जटाजूटः अत्र पूर्वार्धतादृश
व्यंजकाभावादाहीत्रकथा वेति पूर्वोदाहरणे भेदेनेत्युक्तातादृशव्यंग्यस्य स्फुटप्रतीतिरत्र तु अस्फुटं अ
तएवोदाहरणांतरदानं तदुद्ध्वनयन्नाह इतरपदमहिम्नेति इत्यनन्वयप्रकरणं ॥ उपमानिषेध इति सा

८७ 87 क्षासरपर्यावेत्यादिः तच्चमत्कारेति· तन्निषेधकृतचमत्कारपरिपोषकतयेत्यर्थः पृथगिति· पृथगलं
कार इत्यर्थः शहावदीनेति राज्ञो नाम· एतद्भूतेति श्रुत्यादिप्रसिद्धपंचमहाभूततज्जन्यप्रपंचविषयेत्यर्थः ३
किं ब्रूमहे इति· किंकाक्षां· इति वेव ब्रूमहे किं अपि तु अन्यदपि ब्रूमहे इत्यर्थः किं तदित्याकांक्षायामाह
धातेति· अनेन कारणांतरस्याप्यादौ निर्माणे न तेनाग्रिमसृष्टिकरणयोग्यता सूचिता· अन्यथा तेषामिवा
सत्वादसंगतिः स्पष्टैव· तदाह नूतनेति प्रसिद्धपंचभूतातिरिक्तस्वनिर्मितकारणैरित्यर्थः अत एव स्रष्टुर
पि न· तात्वं· नस्यादेवेत्यग्रे इतीति विशेषः नृपतिसंबोधनं पदं स्थानं चिह्नं वस्तु वा॰ आद्ययोर्भेदसंबंधः अं
त्ये ऽभेदः कालत्रयासत्वमुक्तोदाहरणाद्विशेषः ननूदाहरणद्वयेपि निषेधस्य प्राधान्यात्कथमलंकारत्व
मत आह राजेति· अत्र· उदाहरणद्वये· ननूपमानलुप्तत्वे वगतार्थोयमत आहात्यंतिक इति· यथासंख्य
मन्वयः नन्वात्यंतिकनिषेधेपि कुतो नोपमानलुप्ताऽतः आह सर्वथैवेति निषेधाभावादिति· संभव ८७

दूपमानत्वाच्चेत्यपि बोध्यं अन्यथा· तस्यैष्टत्वे· एवं वाच्यतायां निषेधस्यासमालंकारे सिद्धेऽनन्वये
निषेधस्य व्यंग्यत्वे वा समालंकारस्य ध्वननांगीकारे चमत्कारस्तत एवास्तु नाजन्वयकृत इत्यिने
नैव गतार्थः सदृस्याश्रयेन शंकतेऽथेति· प्रतिवंधासमाधत्ते सत्यमिति अत एव पूर्वं दृष्टांतो क्तिः
दीपकादेरित्यस्य पृथगलंकारत्वमिसत्रान्वयः हि यतः सत्वे पीति लंकारत्वं न हीयत इत्यस्यानुष
गः एवमलंकारत्वव्यपदेशो साधितेवाच्यालंकारत्वव्यपदेशं तस्य साधयति अनचेयेतिः शंकते दी
पकाद्यलंकारेति बहुव्रीहिः अलंकृतानीति· तद्युक्तकाव्यैरित्यर्थः तथा चैवमित्याद्युक्तिरयुक्तेति
भावः अप्रस्तुतप्रशंसाया अनेकविधत्वादाह सादृश्येति· अलंकारांतरमिति अत्रोपपत्तिर्व्यति
रेकालंकारप्रकरणे स्फुटीभविष्यति· त्वदिति त्वदुपमावर्णनविषये· वाचंयमो मौनिव्रतवति· प
दं चरणं· द्वितीयः सहायः सदृशइतियावत्· ननु निषेधस्य वाच्यत्वेन कथं तस्य व्यंग्यत्वं किं

८८ चलिटाभूतनिषेधप्रतिपादनेनात्यंतिकनिषेधाप्रतीत्याकथमयमत आहात्रेति पद्येइत्यर्थः एवं
चपदधारणनिषेधस्यशाब्दत्वेपितत्समाननिषेधत्वमव्ययत्वमेवेति भावः प्राग्यदाहेवमिति· अथ
अनंतरंहेतन्वितवतुल्या असमस्पदार्थगणभायांगणिता· एवंचत्वतुल्यी असतीति प्राधान्येन
ध्वन्यतेइति ध्वनिरयंनालंकारः नि खेतिनिःप्रसरेत्यर्थः नेराधारेतियावत्· एवंउक्तभेदवत्·
अस्यापिअसमालंकारस्यापि·॥ इत्यसमः॥ ॥सुखेतिद्रुततरंबुध्यारूढत्वायः तयोःसा
मान्यैकदेशयोः अवयवावयविभावस्वरूपमाह विशेषेति· अन्यथालक्षणानंगीकारे· अ
नुल्लासादिति मिथोभेदाभावेनस्फुटमप्रतीतेरित्यर्थः तस्मात्वेतु· साहश्यो ल्लासेतु· अस्यो
पपत्तिरियंः अत्रैवस्फुरीभविष्यति इत्येवयुतोदाहरणमुक्त्वायथाघटितमुदाहरणमाहयथावेति· ८८
गुणेति· कुत्सितनमतितद्विशेष्ययोरित्यर्थः विशेषाविल्यस्यानुषंगः निदर्शनपदघटितमाह

यथा वेति· सद्गुणो विपक्वतोपीत्यर्थः दृष्टांतपदघटितस्यापीदमेवोदाहरणमिति ध्वनयितुं निद
र्शनपदस्थाने पाठांतरमाह दृष्टांतो वेति· वाशब्द एवार्थः स्वेत्यस्य तत्रेत्यादिः सामान्यार्थप्राधा
न्यमिति तस्यापि प्राधान्यमित्यर्थः तमेव विशेषं प्रदर्शयति तत्रेत्यादिना· तत्र तेषां मध्ये· तादृशे
ति निखिलरसायनराजेत्यर्थः तादृशेति· अमितगुणेत्यर्थः एवमग्रेपि इतिषि· धीरित्यस्यानुष
गः ननु निंदितो भवतीत्यादेरेकत्रैवोपादानात्कथमुभयत्र बोधः तत आह तत्रापीति हे त्वंतराम
मेति· उग्रगंधादिरूपहे त्वंतरेत्यर्थः ६ अन्यथा तदनन्वये· नोपपत्तिरिति उपपत्तिर्नस्यादित्य
र्थः अन्यथा तदनन्वये· नोपपत्तिरिति पद्यस्यात्रेत्यस्यार्थमाह अस्मिन्निति· केषांचिदिति· नैयायि
कानां· इतरेषां· वैयाकरणानां· तादृशेति· पिपक्वताभिन्नसद्गुणकर्तृकोपकारक्रियेत्यर्थः पद्यस्या
त्रेत्यस्यार्थमाह पूर्ववाक्यार्थ इति· मूर्छांगतादिरूपः पारदः पूर्ववाक्यार्थस्यावयव इत्यर्थः ननु

८९
४१

क्रियारूपस्य पूर्ववाक्यार्थस्य कथं द्रव्यरूपः पारदोऽवयवइत्यत आह प्रधानेति घटमानयेति क
र्मसर्वमते गुणत्वादित्यर्थः नीलघटं वदिति चिंत्यमिति कश्चित् अत्रोदाहरणे एकवाक्यतासत्त्वेपि
वाक्यैकवाक्यता पूर्वस्माद्विशेषः एवंत्र तु पदैकवाक्यतैवेति बोध्यं स्तः दधीचिः नन्वेवं कथं मलंका
रत्वमत आह तत्रैचेति इतावित्यर्थः अर्धेति अर्धाधिक स्तृतीयचरणो यस्मिन् तत्र तस्येत्यर्थः अत
एव वक्ष्यति शकलेति विवेचनेति बुध्यमोहणे त्यर्थः यस्य हिमाचलस्य कुमारसंभवस्थं पद्यं न
न्वेवं सांकर्येण न हि विशेषत्वस्यैवात्र संभवे न कथं मलंकारांतरत्वमत आहास्मिंश्चेति भेदाद्विशेषात
त्मकेति अर्थांतरन्यासप्रकरणे इत्यर्थः अयं उदाहरणरूपः नन्वेवमप्यत्रैवादीनां सामान्यविशे
षभावात्मकापवाचयविभाव बोधकत्वेन कथं तद्भासोऽत आहैवेति आमुख आदौ त्वां प्रकृतरा
जामं मध्येरणमिति रणमध्ये इत्यर्थः वलात मनोहरैः पांडवं अर्जुनं दंतावलो हस्ती आरिमंडलकथ

उत्कर्षकतये
त्यज्ञास्यान्वयः ४

८९

नेतिसंवोधनं· अमंदेतितीक्ष्णेत्यर्थः करालेतिद्विः पाठः झगितिझटितिदेवेश्वरः इंद्रः रतेः भावस्य
लक्ष्यहृदयदानवीजमोहाद्येइति स्मरणमित्यस्यानुषंगः लक्ष्यमिति· अधिरोहतेर्लक्ष्यमित्यर्थः
करालेतिद्विः ॥ नन्वेवमपिवीररसस्यानयोः प्राधान्येनराजनिष्ठस्यसत्वात् ध्वनित्वमेवातः आहवी
रेति· प्रधानोत्कर्षेतिकनिष्ठस्योत्कर्षेत्यर्थः अलमितिरसवदलंकारइत्यर्थः विवक्षितं· लक्ष्मण
इतिशेषः एवमितिवैधर्म्यदृष्टांतः एतदितितस्यनिद्रास्मरणकारणतयेत्यर्थः संग्रहाय· एतल्ल
क्ष्यत्वाय· केचित्त्विति अत्रमतेजन्यत्वनिवेशात्सादृश्येस्मर्यमाणसंबंधिवेशश्चेतिपूर्वतोभेदः
भुजंगेंद्रेतिएकसंबंधीतिन्यायेनतल्पादिस्मरणस्यपयोधिस्मरणजन्यत्वेपिनादृश्यसंस्कारा
जन्यत्वात्सदृशविषयकत्वाच्चपयोधिस्मरणंतुतथेतिभवतिसइतिभावः अत्रारुचिवीजंतु
सादृश्यस्मर्यमाणसंबंधित्वनिवेशस्येवसतिफलाभावः नहितादृशसंस्कारजन्यस्मरणं विस

९० 90
दृशाविषयकं संभवति· तथा च पयोधिस्मरणस्य सदृशज्ञानत्वेन ततएवादिस्मरणानुकूलसंस्कारस्यो
द्बोधनसंभवे मतलन्यत्वमत्ताद्लंकारत्वमेवतस्येति· सादृश्यज्ञाननिवेशफलमाहेतएवेति· गुरु
भिः श्वश्र्वादिभिः परिवर्तितेत्यादिद्वयं स्मयक्रियाविशेषणं· इहापि· इत्यत्रापि· ननूक्तरीत्याऽन
लंकारत्वेपि भावत्वकुतोन· अव्यंग्यत्वस्याप्रतिबंधकत्वादत अतः आह व्यंग्येतितस्यासादृश्यमू
लकत्वस्य तामां· सत्वा· तयोर्व्यंग्यत्वसादृश्यमूलकत्वयोः अपीति· रघुवंशेदशरथमृगयावर्ण
नं सः दशरथः सादृश्यबोधकेकेशपाशस्यविशेषणद्वयं· दिव्यानामितिमाघेजलक्रीडावर्णनं· अं
भस्तः जल्यात· मंथनस्येतिअधीगर्थेतिकर्मणि शेषषष्ठी· लक्ष्यद्वयदानेबीजमाहैकत्रेति· आद्ये
इत्यर्थः इतरत्र अंत्ये· सदृशेतिलक्ष्मीसदृशनाधिकेत्यर्थः लक्षणंसंगमयतिउभयत्रेति· तथाच
द्वितीयलक्ष्यसंग्रहएववस्त्वंतरसमाश्रयेतिविशेषणफलमाहसौमित्रेइतिहनुमन्नाटकेसीतावि
+मित्याहअतएवेतिद्वितीयस्यलक्ष्यत्वादेवेत्यर्थः सदृशासदृशेति· स्मृतेः सदृशासदृशान्यतरविषयकत्वलाभार्थंतच्चेस सं: [illegible] ९०

योगेश्री रामचंद्रस्य लक्ष्मणप्रत्युक्तिरियं· ननु निश्चयेन चंद्रांशुः सूर्यः तन्नयनेति कुरंगनयनेत्यर्थः त
त्सदृशो तिनयनविशेषणं· इति भूता चेत्यग्रे योज्यः एषासीतास्मृतिः अलंकारसामान्यलक्षणं न विना
स्ती त्याहालमितिसीतास्मृतेः प्राधान्यादिति भावः अत्युच्चाइति भुवं प्रत्युक्तिरियं प्रस्तोमिकरोमि· इमां
भुवं· न सा हृत्स्येति किं लोकसंबंधीति रीत्येति भावः इति भावेति कविनिष्ठेत्यादिः अरमणीयमिति वक्ष्य
माणदोषादिति भावः तमेव दार्ष्टीयान्त्याआह यन्नावदिति· तत्र उच्यमानेन स्मिन् भूमइति शेषः तदा
हसाहृत्स्येति एवमग्रेपि· केशेति तस्य सदृशात्वन दृष्टांनत्वन्यिति भावः स्यादितिरती ति शेषः सादृश्यप
दस्य नियमसंसंबंधिकतया संबंध्याकांक्षायामुपस्थितस्मर्यमाणस्यैवान्वयापत्तिः नहि जनकत्व
मूलापूजातरस्तुक्तं पुत्रजनकत्वेन भार्या पूज्यते अतो वस्त्वंतरसमाश्रये सावश्यकमिति चिंत्यमिदं·
नेयं स्मृतिरलंकार्यभूतेति· अत्र स्मृतेर्हीकासीत्यादि पदगम्यत्वेन विवहन प्रवृत्त राजानुगम्यमान

९१ न्त्यवतश्चादेभविधिनानिद्रादरिद्रीकृतदृस्त्यादौश्लोकादिपदगम्यासूयावद्धातस्या एवप्राधान्यादल
१ कार्यत्वंअनुपस्कारकत्वाच्च· विप्रलंभस्यैवतत्त्वाच्चेतिचिंत्यं· विप्रलंभः श्रीरामचंद्रनिष्ठः नितरामित्य
स्यानौ विन्वयः तदाश्चायंखंडयतिनहीति· नित्यतिमर्वथेत्यर्थः कदाप्यवाच्यलक्ष्येति ेवत· नन्वे
वंप्राधान्येप्यलंकारत्वापत्तिरतआह प्रधानेतिसर्वेषु· नत्वत्रैवतथाचालंकारसामान्यलक्षणप्राप्तत्वा
त्तस्य नातिप्रसंगइतिभावः सिद्धांतेति· मम्मटभट्टादीनामितिशेषः तद्रूपमाहप्रेयोलमित्यादीतीसं
तेनः तत्रापितद्रुत्थापितस्मृतिष्वपिआगूरितेत्वेआविष्कृतत्वे· अत्रेतिदृष्यकेणलंकातोऽयोध्यां
गच्छतः श्रीरामस्यसीतांप्रत्युक्तिरियंरघुवंशे· अमुगोदंगोदासमीपे· वानीरेति तृणधान्यतृणेत्यर्थः
सुप्तं· स्वापं· इत्यापत्तिंपरिहरतिएवंचेतितथासुवचत्वेपित्यर्थः शंसेत्यादि क्रुद्धमितीत्यर्थः रतिभावेति ९१
कविनिष्ठत्वादिः स्मृतिमादायेत्युक्तिफलमाहकिंतुइति· एवंचप्रेयोलंकारसत्वेपित्वत्कृतंतदुपपा

दनंचित्रमीमांसास्थमयुक्तमितिभावः भावस्येति· अंगमितिशेषः स्वैनैव अप्पदीक्षितेनैव· तत्रकुवलया
नंदे· निर्वेदादिः त्रयस्त्रिंशात अपरस्य· भावादेः करयोः ग्रंथयोः अध्यक्षैः प्रत्यक्षैः अथप्रसक्षानंतरं अ
नुपसर्जनमितिप्रधान मित्यर्थः एवमलंकारत्वेनिरस्यध्वनित्वमुपपादयितुमाह स्तनेति· स्वस्यः स्मारणस्य·
व्यंग्यंच स्मारणमितिपूर्वत्रान्वयः उ॰ पिसाधुरिति· द्योतेः न्यंक्तानि॰ उ॰ न्यपिसाधुत्वेसंभवतिसर्वत इत्येतत्सर्यता
नुधावनंर्व्यर्थंदुष्टंचेति प्रपंचितमत्रव्यंज्येति अर्थाप्रतीयमानहृद्यकेइत्यर्थः अत्र· स्मारणालंकारे· अस्यो
पादानादावेवोन्वयः स्तनयोः सतोरितिशेषः अत्रापिस्मारणालंकारेपि· स्पष्टत्वायपुनरुक्तिः प्रतीयमानः गम्य
मानः साक्षात· उपमानोपमेयविशेषणत्वेन· यथेति उपमेयविशेषण छविविशेषणतयोपस्थितपांडरत्व
स्यैवप्रस्यासत्यातत्रगम्यमानत्वादितिभावः ननुधर्मांतरस्योपमाप्रयोजकत्वाभावादेनैनैवसादृश्यस्यगममत
आहसर्वत्रेति· अस्यद्वितीयमुदाहरणंविशेषवक्तुमाहयथावेति· नतीयतेचेतिवाच्यतामित्यसेदनुषंगः अ

९२ नुपस्थितौहेतुमाहप्रसिद्धेरिति· सएवेतिसुंदरत्वादिरित्यर्थः वलाकाराजिताइतिवलाकावकपंक्तिरितियारा
जितावलाकाराभ्योअजिताइत्यर्थः उपसंहरति इत्थंचेति· यथोपमायामितिशेषः जीवातुर्जीवनौषधं·
तत्र· अनुपादेयादिधर्माणांमध्ये· स्मृत्यारूढमिति· अत्रानुगामीत्वामत्त्वधर्मोऽनुपात्तः निरूपितंस्मर
णमित्यस्यानुषंगः एवमग्रेपि अत्रोक्तहेतोरलसोपानमित्याहकुलिशेति· सपवनात्मजइत्यन्वयः अत्रा
न्योः आदिनाकठिनत्वामागाधत्वादिपरिग्रहः द्वितीयोदाहरणदानेवीजमाहेयानिति· एकत्रआ
द्येअपरत्रद्वितीये· समुद्रस्येतीति· सादृश्यस्यसिद्धिरित्यस्यानुषंगः उभयाश्रयत्वात्उभयनिरूपत्वा
त्· ऋतुराजंवसंतं· भ्रमराणांहितं· नानापुष्पविकासद्वारामधुप्रापकत्वात्· व्यासपक्षेभ्रमेणरहितइत्य
र्थः नियमेनैतत्त्वेरान्वयी· इतिस्मरणं ॥प्रधानेषुअलंकारेषु· एवंचसर्वभेदाभेदोभयप्रधानोनि
रूपिताः इदानींवहुलंकारव्यापित्वेनप्रसिद्धतयाप्राधान्येनचरूपकनिरूपणमितिभावः· उपमेयताव ९२

च्छेदकेति॰ उपमेयंतावच्छेदकमात्रप्रकारकप्रतीतिजनकेनेत्यादिबोध्यविषयेइत्यर्थः तेनातिव्याप्यवच्छेदकोचंद्रादि
पदान्मुखत्वादिना मुखोपस्थितिरिति मतेपिनातिव्याप्तिरिति बोध्यं॰ तज्जनकेति॰ भ्रांतिजनकेइत्यर्थः उप
मेयतेति मध्यमणिन्यायेमोभयत्रान्वयोस्य॰ संभवनात्मनस्तद्रूपायाः उत्प्रेक्षायाः वस्तूत्प्रेक्षायाः उपमा
नोपमेयेति एतद्रूपविशेषणाभ्यामित्यर्थः उपमानत्वोपमेयत्वयोः साहश्ये नियतत्वादितिभावः आ
हरितिमम्मटभट्टादयइत्यर्थः अत्रार्धममदीयंअर्धमन्यदीयंतथाचभिन्नंलक्षणद्वयमिदंतच्चेति
उक्तरूपतादात्म्यंचेत्यर्थः संसर्गइतिअपदार्थत्वादितिभावः विनिगमकाभावादाह क्वचिदिति॰ भिन्नयो
रितिनतूपमानोपमेययोरित्यर्थः किंचेतियतइतिशेषः निर्विषयमितिसर्वस्यैवालंकारत्वेनतदन्यसंभावा
दितिभावः व्यज्यमानेवि॰ व्यज्यमानस्मरणविषयत्वेनेत्यर्थः नखरत्नामितिरूपकंविवेति॰ अयंभावः य
थाचंद्रः स्वतःशुभ्रत्वादनासंजनीयधावल्यस्तथानखाः स्वतोरुणत्वादनासंजनीयारुण्याइतिसाद

९३ द्वयेननखानांचंद्रस्यचबिंबप्रतिबिंबभावः अलक्तकचंदनयोरन्यत्रस्ववर्णासंजकत्वेनसमः तथाचबिंबप्रति
93 बिंबभावापन्ननखालक्तकविशिष्टएवंरंजनेतत्प्रतिबिंबभूतचंद्रचंदनविशिष्टंपांडरीकरणमुपदंजकं
इतिनिर्दिष्टेइतिउच्चारितेइत्यर्थः तत्रयेनयस्यव्यावृत्तिस्तत्क्रमेणाहस्वसमिति· अगोचरत्वेक्रमेणहे
तुआहसमेति· अनूत्त्वयादेस्वत्रः दाक्षिण्येति· रूपकमुखसंकोचरूपकोपीनमित्यर्थः निर्लज्जत्वादि
तिभावे विशिष्टार्थयोः वाक्यार्थयोः त्वदुक्तपदार्थनिदर्शनालक्षणमपिनास्तीत्याहकुवलयेति· वै
परीत्यस्य· वाक्यार्थनिदर्शनोच्छित्तेः स्वमतेनकस्याप्युच्छेदइत्याहास्माभिरिति· श्रोतत्वेतियथासंख्ये
नान्वयः नन्वेवंतर्हितस्याः किमुदाहरणंततआहतस्याश्चेतिवाक्यार्थनिदर्शनायाइत्यर्थः पावके· अ
लक्तकरसैः ननुकर्त्रोरभेदमादायवाक्यार्थरूपकमेवास्त्विति ततआहतस्यैवचेति· किंपयोरभेदस्यै ९३
वचेत्यर्थः समग्रेति· मुख्यत्वादित्यर्थः इदं· दीक्षितोक्तं· भ्रांतिनैवेति· भ्रांतेनैवेतिमुख्यपाठः कंदर्पेति

पेतिसर्वत्र षष्ठीतत्पुरुषः कंबुश्चासौ बः कलं रमणीयं · अनोकहः कुटः शालः पुद्रु सामान्येति · अनयोर्वस्तु
प्रतिवस्तुभावापन्नत्वादिदं चिंत्यं · उक्तं चेति चकारस्तदाहृतसमुच्चायकः · द्वितीयविशेषणं दूषयति तथेति ·
उताहो अथवा · इत्यत्र · रूपकातिशयोक्तिविषये न्वयएवेति · ततएव च मत्कारात्साविध्याच्चेति भावः
रूपकातिशयोक्तिं ध्वनयितुमाह कमलेति · तत्रैव आनने एव नलिति पदार्थः पदार्थेनेतिन्यायादि
तिभावः ताद्दशं येन केनचिद्रूपेण शब्देनाभितं · इत्यपि · उद्देश्यविधेयभावघटितोपि · अविधानादि
ति · ताद्दशमाननमुद्दिश्य भाने क्रियामाण एव विधेयत्वादिति भावः यद्वा सुंदरत्वादः कमलत्वादिवि
शिष्टविशेषणत्वमनोद्देश्यतावच्छेदकत्वं इत्योस्तु विशेषः यदतिशयोक्तावुपमेयधर्मस्योद्देश्यताव
च्छेदकत्वाभावएव रूपकेत्वनियमइतीति भावः अतएवाह मुखचंद्रस्त्विति · पृथगिति उद्देश्यविधेय
भावेन बोधे भिन्नविभक्तिजन्योपस्थितेस्तत्रत्वात् तथा च व्यस्ते तथा प्रतीतिर्न समासे इत्यत्रा व्याप्ति

९४ शितिभावः ननूपमेयतावच्छेदकरूपेणज्ञाने नाभिहितेइतितदर्थैननप्राप्तक्रदोषोऽत आह द्वितीयेत्विति·
९५ अपह्नुतौ· नायंसुधांशुः किंतर्हि व्योमगंगासरोरुहमित्यत्र· अनिर्दिष्टत्वादेवेति· अत्र निषेधप्रति
योगिविषयानिर्दिष्टत्वादिदं चिंत्यं न च तथानिर्दिष्टत्वेपि पुरस्काराभावः तर्हि तावत्पर्यंतविवक्षावो
धनार्थमेवानिरुक्तेइतिविशेषणसाफल्यादितिवाच्यं· तावतैवाउक्तार्थकनिर्दिष्टेइतिविशेषणेनैव
इदं चिंत्यं आहार्यत्वविशेषणस्यनिर्दिष्टेइतिविशेषणलभ्यार्थकथनतात्पर्यकत्वात्· अतिशयो
क्तौलक्षणमाह क्ष्माप्ज्जायमानज्ञानस्यानाहार्यस्यैवज्ञायमानत्वेनतावतैववारणात्तच्छक्यतावच्छे
दकलक्ष्यतावच्छेदकयोर्भानमितित्वल्लिखितमतांतरेपियुगपदेवोभयोर्भानेबाधस्यैवानुपस्थितत्वे
तद्बुद्धेराहार्यत्वं किंच चंद्रवृत्तिगुणवत्वस्यलक्ष्यतावच्छेदकस्यचंद्रत्वस्यचमिथोविरोधाभावेनवा ९४
धप्रतिसंधानेमुखत्वेनमुखंलक्ष्यतइतित्वश्लेहयमेवरूपकेतुबाधस्यस्फुटमुपस्थितत्वेनसाक्षाद्ध

जनयावाजायमानाताद्रूप्यप्रतिपत्तिदाहार्यैवेतिदीक्षिताशय इति दिक्‌ः अपह्नुतौ पर्यस्तापह्नुतौ·
विषयस्य संधात्त्रोः इदमपि चिंत्यं· उपनयो पमादीनां वृत्ति अविशेषेणालंकारांतरत्ववदिहाप्युपप
त्तेः मतांतरेप्यभेदादिकृते चमत्कारसुरेरूपकं निह्नवादिकृते तस्मिनेति विषयविभागसंभवात्‌· चम
त्कारित्वस्यालंकारसामान्यलक्षणत्वाभावात्समुदितस्यालंकारांतरत्वेनांशे रूपकत्व इष्टापत्तेश्चे
तिदिक्‌· चित्रमीमांसायामदीक्षितोक्तमन्यदपि खंडयति यच्चापीति· इदमेव प्रागुक्तं रूपकलक्षणमेव·
नन्वेवं कथमिति प्रसंगनिरासोऽत आह प्रधानेति· नन्वेवमपि विनिगमनाविरहात्तथोक्ति स्तत आह
नलमिति· तन्मतेनुते नैवोभयोर्वारणमिति भावः प्रकाशोक्तिं खंडयति प्रसंगनिरासोऽत आह प्रधानेति·
नन्वेवमपि विनिगमनाविरहं यच्चेति तथापि उक्तार्थांगीकारेपि· अत्र तस्य पुरस्कारोस्तीति भावः पुरस्
चंद्र इति· अत्र गमकाभावान्नेदुभयं न तत्र जैमिनीयं दृष्टांतमाह यथात्रारति आभिचारिककर्मणि

९५ विशेषविहितमिदं·व्याकरणोक्तं। तमाह यथावाक्येति ञ्यलङ्गिति विहितत्वमाहयत· नत्वग्राहयत· त
95 स्यैव तद्बीजत्वात· धर्मः अभेदत्वं रूपः संभावनेवोत्प्रेक्षेति पक्षे आह विषयेति· अलंकारद्वयेति रूपकोत्प्रे
क्षेत्यर्थः न हि प्रधानत्वं तद्विशेषणं तत्वस्यैव भंगापत्तेः तावत आदौ आह· प्रकाशाकारादयः एत
त्सूचितान्सूचितं तु अग्रे स्फुटीभविष्यति· यत्रावयवत्रतु संघातात्मकसावयवरूपके अवयवरूपके इति·
रूपकसंघातस्यावयविनोऽवयवे कस्मिंश्चिद्रूपके इत्यर्थः विवर्त्तिनादिति विरुद्धतया वर्त्तिनादित्यर्थः
विरुद्धत्वमेवाह स्येति· विनिगमनाविरहादाह यद्वेति· अवयवे· अवयवरूपके· अवयवानां मुक्तानक्ष
त्रवस्त्रज्योत्स्नामुखचंद्रनायिकादीनां रूपाणां· अभिप्रेतेति विधेयत्वेन वर्ण्यत्वादिति भावः तयोर्वि
षयविषयिणोः तदादाय तदीयविधेयत्वमादाय· अत्र· पद्ये· अन्यधर्मेणान्यत्र व्यपदेशमानमाह यथे
ति लक्ष्यांतरमाह व्योमेति· लक्ष्यांतरदाने विशेषमाह स्पष्टेति अत्र क्वापि पृथग्विभक्तेरश्रवणान्मिथ ९५

उद्देश्यविधेयभावाभावेन सर्वमुद्दिश्याभावादेव विधेयत्वादिति भावः स्पष्टत्वादितरदुपेक्ष्याहात्रेति· श्रो
तेपेसत्र कर्मधारयः व्यतिकरः संबंधः सहचरैरित्यनेनाक्षेपक त्वयोग्यतागजरूपकस्य प्राधान्यं च
सूचितं· लक्ष्यांतरदानेबीजमाह पूर्वं लिखितरूपकस्य· गजेत्यादिः मीनेति मंतरइत्यस्य तु माधवः स्तुहृदश्वेस
र्थद्वयमिति भावः जनकत्वेति गणनायां हेतुः गण्यते इति पृथगिति शेषः लोके दृष्टांतेन सिद्धमर्थं प्रतिबं
धाव्यतिरेकमुखेन द्रढयति· तद्वेति· उपमालंकारभेदेत्यर्थः प्रस्तुतो· प्रस्तावे· एवं· अस्पष्टथा गणनव
त्· एकविषयत्वेति· एतौ च मालारूपकनिष्ठौ धर्मौ सावयवत्वनेकविषयकं परस्परसापेक्षं चेति बोध्यं·
ग्गारदायाः सरस्वत्याः साक्षादिति अप्रतिहतशक्तित्वादिति भावः एकेति राजेत्यर्थः द्वयोरपीति· अ
हिसंबंधितापकरणभेषजारोपयोरित्यर्थः समर्थनीयतायामिति पाठः कवेरिति प्राधान्यादिति भावः
अतएव तस्य तात्पर्यविषयत्वेन समर्थनीयत्वेन तद्धेयत्वादेव· भंगेति· पदच्छेदे त्यर्थः इदमेव श्लिष्टपरं

परितमेव· कमलेति· कमलानामावासः कमलायायावासः पृथ्वीधृतिः क्षांतिधृतिः पृथ्वीमंडलस्यकुमदस
च· अयंवर्ण्यराजा· अत्रसमर्थककमलावासाद्यारोपस्यश्लेषमूलकस्यचंद्रारोपेनिमित्तत्वाद्यांत्रिकामा
राधनैकपदार्थारोपरूपत्वाच्चमालाश्लिष्टपरंपरितरूपकता· पूर्वदेवादेस्साःक्षमितीतिकइहेति द्विः
पाठः व्याख्यातमिदंदुग्धारोपेति· अनेनपरंपरितत्वमुक्तंश्लेषमालयोरभावाच्छुद्धकेवलत्वेतदेवश्रु
द्धपरंपरितमेव· प्राचीति· अपिनामालारूपकपरिग्रहः तत्रसावयवे· सिद्धिरितिपाठः अनलसमारोप
मितिराज्ञीतिशेषः कश्चित्त्विति· अत्रारुचिवीजंतुप्रागुक्तरीत्यानिर्वाहइति· विषयमालाकृतइति एक
स्योपमेयस्यनानोपमेयकृतइत्यर्थः यामाला· तस्यैकत्रैन्यारोपस्याः नानुपपत्तिरिति· अत्रेदंचिंत्यं
कमलावासेनीयंराजाकासारइत्यादौयथाश्लेषमूलकाभेदाध्यवसानेनैनंसाधारणधर्ममादाय ९६
राजकासारयोरूपकस्यगांभीर्येणसमुद्रोयमित्यादाविवसंभवत्तद्वत्कमलावासकासारइत्यादावि

पि संभवात्किमर्थोयं क्लेशः साधारणधर्मज्ञानस्य चाभेदारोपप्रयोजकत्वात् इदमेव चास्योपायत्वमा
रोपयतन्मूलीभूतसाधारणधर्मसंपत्तिः साधारणधर्मसंपत्त्याऽऽरोपेणैवैतस्यार्थस्य च न किंचिन्मानं· स
मर्थके रूपकत्वव्यवहारस्तु भाक्तः तथापि श्लिष्टेषु सादृश्यमूलकत्वाभावादावश्यकः एवं च का
रुण्यकुसुमाकाशः खल इत्यादौ वक्ष्यमाणान्योन्याश्रयोपि न· खलाकाशारूपकोपयुक्तकारु
ण्यकुसुमयोरभेदप्रत्ययस्येच्छाधीनाहार्यस्य संभवेन तावतैवोपपत्तेः न तु समर्थकारोपे सादृश्यमूल
कत्वभावश्यकमित्यनुपदमेवोक्तं एतेन स्यादेतदित्यादिना सोऽज्ञस्य चंद्रिका चंद्र इत्यत्रत्य पूर्वपक्षः स
माधानेपरास्ते· अस्मदुक्तरीत्या पूर्वपक्षस्यैवाभावादिति· समर्थकारोपेण चंद्रिकायां सोऽज्ञन्याभेदारो
पेण चंद्रिकाभेद इति· तैदात्म्यकरूपके समर्थयितुं प्रभवतीन्यस्यानुषंगः सच समतु· सोजन्यचंद्रिक
स्तत्र· अनयो अभेदयोः तत· तुल्यवित्तिवेद्यत्वं· अन्यत्रापि· उदाहृतातिरिक्तस्थलेपि· उदाहृतस्य

९७ 97 ल्लेएवशंकनेकथंवेति· चस्वर्थैःईष्टेतदभिन्नत्वमितिशेषः सुंदरीताद्रूप्यंतदभिन्नत्वंसेडुमीछेद्दत्यस्मा
नुषंगः तेषांताराादीनांसर्वमिति एवंचेत्यादिः विशेषणतायाइति· निर्वाहिकइत्यस्यानुषंगः क्वचित्स
मासगते· क्वचिच्चवाक्यगतेः एवव्यावर्त्यमाहनत्विति· इसत्रसमासगते· मुखाभेदः मुखप्रतियोगिका
भेदःनानुपपत्तिरितिरूपकत्वस्येत्यादिः सर्वेसुस्थामिति· अन्येतुतुल्यवितिवेद्यतयांचेद्राभिदस्या
पिमुखेप्रतीतेरार्थंचंद्ररूपकंशाब्दंतुव्यस्तेएवमुखाभेदस्यसमासत्वात्त्वप्रवृत्तुपयोगितयाअंगी
कारेप्यतात्पर्यविषयत्वान्नतमादायमुखरूपकव्यवहारः किंचात्रपूर्वपदार्थप्रधानमयूरव्यंसकादि
समासेनचंद्रपुंडरीकाक्षद्यभेदस्येवमुखत्राञ्यादेशभानान्नदोषः अतएवविशेष्यस्यपूर्वनिपातार्थ
मिदमितिमहाभाष्यकृतः एवंचवाच्यतापिचंद्ररूपकस्येत्याहुः अपरेतुचंद्रनिष्ठाभेदश्चंद्रप्रतियो ९७
गिकोभेदश्चरूपकंअतएवतद्रूपकमात्रेदोषामुपमानोपमेययोरित्युक्तंप्रकाशे· यद्वाविषयिनिष्ठा

भेदस्यप्रत्यापत्तिर्नोयत्रविषयस्यरंजनमित्येकलक्षणार्थः एवंचमुखप्रतियोगिकाभेदवांश्चंद्रइत्येवंबोधेपि
न क्षतिरित्याहुः तत्र· पदार्थरूपकाणांमध्ये· परस्परमित्यस्यमध्यमणिन्यायेनोभयत्रान्वयः लक्ष्यांतरदा
नेबीजमाहैकत्रेति· आद्येइत्यर्थः अयंपिशुनः अर्थावसेयः आर्थिकं· एतल्लक्ष्यमाहात्मनइति· सारसैः
सरःसंबंधिभिः· सलिलोत्करादीनांचेतिपाठः नेदमिति· किंतुनिदर्शनेत्यर्थः· वाग्र्थे· दीर्घश्रवसः
लंबकर्णस्यप्रविष्टस्यअप्पदीक्षितस्य· तयोरितितदभावेइतिशेषः सूक्त्यंतरमाहैवमिति· बालाभ्रइतिश्रो
णाभ्रइत्यर्थः विपर्ययेणः चंद्राधिकरणकाभ्ररूपोपमानस्य· इहतुकुंकुमइवेत्यत्रतु· एवनादौआ
त्मनोस्येत्यादौइवाद्यप्रयोगादाहुप्रतीयेति· अन्यथातस्यसंभाव्यमानत्वेइष्टापत्तौ· तत्रबोधविषये·
द्वयोरुपादानादाहसारोपेति उपस्थितौ· सत्यामितिशेषः विषयेतस्याभेदेनेति· विषयतावच्छेदकावच्छि
न्नविषयेपूर्वोपस्थितस्येत्यर्थः वृत्तीतिशक्तिलक्षणान्यतरेत्यर्थः वृत्त्यंतरविन्नीतिव्यंजनाख्यानेत्यर्थः

९८ 98 आहुरिति॰ एतन्मते त्वेवंरूपकलक्षणं अनिरुक्तविषयकं पुरस्कृतविषयतविच्छेदकं वा आहार्याभेद
प्रतीतिफलकोपमानबोधकपदजन्यप्रतीतिविषयीभूतं साधर्म्यमिति॰ फलस्य॰ अभेदबुद्धेः अन्यथे
वः उक्तप्रकारेण न तथा न चंद्रः स्तद्वा इति मुख पदार्थ इति शेषः नतु स्वमते बाधमत्त्वेन कथमभेदधी
रत आह नाहत्रेति॰ इदंच शाब्दे तस्याः प्रतिबंधकत्वमंगीकृत्य तस्तुतस्तदेवने त्याह यद्वेति॰ नन्वेवं सति बा
धनिश्चये तदभावो नोपपद्येतात आह सतिचेति॰ बुद्धेस्तुल्यत्वादित्यर्थः॰ इदं तु चिंत्यं॰ शाब्दबोधो हि भवत्येव
अत एव वह्निना सिंचतीति वाक्यप्रयोक्तुरद्रवेण वह्निना कथं सेकं ब्रवीषीत्युपहासः संगच्छते॰ अबाधि
हि एतदर्थकद्रविडभाषाश्रवणोत्तरं पाश्चात्यस्येव मूकत्वैव स्यात् ननु पदार्थस्मरणमेव न शाब्दबोध इ
ति चेत् किं यनेन श्रद्धाजाड्येन॰ बाधज्ञानादीनां च तद्बोधे॰ अप्रामाण्यज्ञानजनद्वारा प्रदत्तित्रिप्रतिबंधकत्वं॰
योग्यताज्ञानादीनां च तज्जनकत्वमेव नेति रमणीयः पंथाः अभेदग्रहे पीति॰ अन्ये तु चमत्कारिसाध ९८

रणधर्मरूपसादृश्यज्ञाने एवफलवत्वात्तथाशक्तिकल्पनेपायंदोषइत्याहुः सेकेकरणत्वेनेति· ननु
सदृशत्वेनेत्यर्थः ज्ञानितत्सदृशानस्कार्यासन्नेरनुभवविरुद्धत्वादितिभावः नन्वेवमेधुकवेस्तन्निमि
तिर्नस्यादतआह यद्वेतियद्वातज्जज्ञानस्यप्रयोजकत्वेपितस्यातत्वादाह यद्वेतितस्येतिज्ञानजन्य
ज्ञानंप्रकारत्वस्यान्वयः कल्पितत्वादित्यर्थः क्वचिद्विशेष्यामितिवाक्यार्थमुख्यविशेष्यमित्यर्थः आ
यातीतिसमभ्यंतवयोर्विशेषणे· नन्वासन्नावितिमध्यमणिन्यायेनान्वेतिअभीतिशक्तालक्षणया
किंचआसीदित्यस्य· ६ वेतिभावः किंचिदितिं स्थानेसंपन्नाहीतिपाठइत्यर्थः विभवेनितिप्रख्यानेहेतुः शंवररिपोः कामस्य· द्वि
तीयार्थकमेणि· विध्वभेदेतिलक्षणयेतिभावः विशेषणसमासेत्विति· चित्समिदंचंद्रमुखमित्यस्यापत्तेः
परिणामालंकारोदाहरणेतुविशेषणसमासउचितः अत्रतुमयूरव्यंसेतिसमासेत्विष्टुचितंप्रतीति· मीन
प्रतियोगिकाभेदे· निलिंपादेवाः निरयोनरकः अंवगंगे· भागीरथ्योः अनुगामीधर्मइतिशेषः समृद्धमि

९९ त्रिगंगास्तुतिरेव· सौभाग्यभागीरथ्योः सौभाग्यभागीरथीजह्नुयोः स्वपदेनविबधविधयिथामर्त्याः सुधासा
६९ माज्यमिसत्राहाप्रामेरेति· निरूपितइति· कुमद्वलिंगागः कायापवसनोयतिः कोमलातपशोणाभ्रः
संध्याकालोनसंज्ञायइ स्यादावितिभावः चंद्रिरंति चंद्र इत्यर्थः उपेति· वस्तुतोमाधुरिमातिशयस्पतत्रा
सत्वातएवमग्रेपि· अनुपात्तमिति उपचरितमितिशेषः अंकितानीतिव्याख्यातमिदं· उपात्तएवेति· एवं
चैकएवभेदोस्यतदाहलुप्तइति अनुपात्त इत्यर्थः अभग्नः पदावांतरभंगशून्यः भग्नः तद्युक्तः अस्यभेदां
तरमाहयमेवेति· केवलशब्दात्मकएवेत्यर्थः यथेति· राजानंप्रत्युक्तिः हेराजन्नेते पंचशाखः पंचांगुलि
हस्तोसौकल्पवृक्षस्यशाखैवेत्यर्थः मृगांकः चंद्रः रंसश्लेषेणविशेषणश्च· तद्गहेहेतिनिरवयवमिति·
मिथोऽवयवावयविभावाभावादितिभावः हेतुः मनोभवेत्यादिबोध्यः त्रिषु· उपमानद्वयेउपमेयेचेत्यर्थः ९९
श्लिष्टएवेति· मनसिजातमदनसंबंधिविशिष्टाधिमत्त्वंदयितायांमनोभवव्याधिरूपेक्षयमथकत्त्वंरसे

मनोभवसंबंधिराजयक्ष्मारूपव्याधिमत्त्वं चंद्रे इतिभावः उल्लासइति· तद्धेतुरित्यर्थः सूर्योदयवर्णनं· तेषां
लक्ष्मणादीनां· अस्मिन्· पिशुने· च स्त्वर्थे· ननु अन्योन्याश्रयस्यो सत्ताविवक्षाने पि प्रतिबंधकत्वात्कथं त
थात्वप्रतिभा ऽत आह श्लिष्टिभिरिति· विज्ञेति अत्र विज्ञादयः पंडितादीनामिव बुधादीनामपि वाचकाः
नानार्थत्वात्· विज्ञत्वं पंडितत्वं बुधत्वं च सुकविता· काव्यकर्तृत्वं शुक्रत्वं च· मांगल्यं शोभनत्वं अंगा
रकत्वं च· गौरवं· श्रेष्ठत्वं बृहस्पतित्वं च· दुर्वृत्ते ज्ञानिता· अज्ञानिता ज्ञानिता च वक्रत्वं मंदत्वं चेत्यर्थः रा
जत्वं नृपत्वं चंद्रत्वं च मित्रत्वं आप्तत्वं सूर्यत्वं च· नियंत्रेति प्रकरणादिति भावः धारासारे सत्र सकीच
के इति वदासारपदं संपातमात्रपरं· व्याख्यातमिदं· पूर्वविशेषणेष्वेव ध्वनिः अत्र तु विशेष्येपीति भ्वंतो
भेदः· सार्वभौमश्चक्रवर्ती दिग्गजश्च· सौधमौलिं· गृहशिखरं मुदा विकाशानां· उदारामतिश्चापितां·
हरितः दिशः· कर्म्मः· विविक्तं· भ्रांतिमद् मिश्रितं· तज्जीवातौ रूपकजीवातौ वैयधीति कं पोजलधौ आ

१०० 100 हार्यविच्छुतादात्म्यनिश्चयप्रस्तुकवावितिनतस्यतज्जनकत्वंसामानाधिकरण्याभावादितिभावः केवल
मित्यस्यैवव्याख्यानाज्ञातमेधेति· चंद्रालोके तु पत्रोपमानचित्रेणसर्वथाप्युपरज्यतेउपमेयमपीभित्तिस्त
त्ररूपकमिष्यति· समानधर्मयुक्ताध्यारोपात्मोपाद्यरूपकं· उत्तिक्रक्षितिभृल्लक्षपक्षच्छेदप्युरंदरः· सा
धारणधर्मविशिष्टोपमानस्यपत्रारोपइत्यर्थः इथक्कथितमाहद्वयंहद्वयमादद्वयरूपकं· उल्लसत्संचरा
स्त्वायंराजतेभुजभूरुहाः स्यादंगय—रिसेवंविधमाभासरूपकं· अंगपष्टिधनुर्वल्ल्यादिरूपितरूप
कमिसपिहृष्यते· इतिरूपकं· परिणाममलक्षयतिअथेति· विषयीउपमानं· विषयेतिउ
पमेयेइत्यर्थः एवंव्याचख्यमाहमस्तातंत्र्योणेतिस्वस्वरूपेणेत्यर्थः तत्रेतिशेषः सः विषयाभेदः अत्र
च· परिणामेच· नैवमितिकिंतुविपरीतमितिभावः रूपकादस्यभेदइति· वयंतुब्रूमः उपमानप्रतियो १००
गिकाभेदोरूपकंउपमेयप्रतियोगिकाभेदः परिणामः प्रतीपवत्· तत्राभेदेउपमेयप्रतियोगिकत्व

तात्पर्यग्राहकं प्रकृतकार्योपयोगः ननु तच्छरीरे ऽस्य प्रवेशः एवं च पत्रोपमानस्य स्वात्मनैव प्रकृतका
र्योपयोगः यत्र चोदासीनता तत्र रूपकमेव एवं च परिणामो विशेषणसमासायत्तः रूपकं मयूरव्यं
सकादिसमासायत्तं मुखचंद्र इत्यादौ· अत्र शोधपत्रे· यदि तु चंद्रमुखमिति विप्रयुज्यते तदा विशेष
णसमासायत्तमपि रूपकमिति· परे तु उपमानोपमेयपदानामुपमानप्रतियोगिकाभेदसंसर्गेण बो
धकानां मयूरव्यंसकादयश्चेति समासे न विशेषणसमासबाधा चंद्रमुखमिति प्रयोग एव नेत्याहुः
श्रामं श्रामं श्रांत्वा श्रांत्वा· एवमग्रेपि विगलितेति क्रियाविशेषणं· हरिरभिनवतमालः भक्तोक्तिरियं·
भगेति अत्रेत्यादिः ननु हरेर्विषयित्वेन रूपकमेवेदमत आह मार्गेति· महर्षेरिति शुकदेवस्येत्यर्थः
श्रावं श्रावं वचःसुधामिति विशिष्टं समस्तमेकं पदं मयूरव्यंसकादित्वात्· स्मालाकालकइतिव
त्प्रकृतकार्योपयोगित्वपर्यंतस्य परिणामशरीरत्वात् अत एव तिरयतु पदस्यासमस्तत्वान्मूर्वा

१०१ क्रस्यवाक्यगत्वमित्याहुः क्वचित्तु हरिरिहतमालद्रुतितत्र पाठः तत्रवाक्यगत्वंस्पष्टमेव तदा वचः सुधामि
101 त्येवंसमस्तत्वाभावश्चवमितिभिन्नपदमितिबोध्यं· उपमन्युस्तुतः परीक्षित आननेतिच्छेदः इमंकामि
नीमुक्तपक्षयामिनीत्यर्थः अत्रनअकाक्षांतक्रभ्यमर्थमाहान्येतिआरोप्येतियोयायामित्यादिः
तत्वाउद्दीपकत्वेननत्रापूजनकत्वादितिभावः नन्वेवंसमानाधिकरणएवायमितिकथंविपरीतप्र
तिज्ञातः आहसचेतिउक्तप्रधानपरिणामश्चेत्यर्थः सापेक्षत्वमृवहुपदार्थेऽवयवेन्वेतियच्चाप्यदी
क्षितैरितिः अनुक्तोपालंभोयं· नहिपरिणामेइदंपद्यंदीक्षितैरुदाहृतं किंतुपरिणामप्रकरणेइदं
वैयधिकरण्यरूपकेपिदृश्यतेइत्युक्तातारानायकशेखरायेत्याद्युदाहृतंतत्रकोदोषः किंचनघा
शेखरिणेइत्यंशेविषयात्मतयैवप्रकृतोपयोगाभावात्परिणामाभावेपिवाच्यमार्थवारूपकमपिन १०१
वाच्यं· उपमानप्रतियोगिकाभेदस्योपमेयेऽमानात्ः किंचश्टंगारितोपपादकंचशेखरादीत्यप्य

युक्तं · नारायणेनाश्रिणे इत्यस्य तदुपपादकत्वाभावात् · किंतु नमस्यतासंपादकशिवनिष्ठोत्कर्षबो
धकानीः मानि विशेषणानि तु दुपपादकता च शेखरस्य नदी तादात्म्यापत्त्येति परिणाम एवायं शेख
रस्य नीच जनसाधारणत्वात् · इत एवास्य रसात द्विर्भावः पुष्पकेतोरिति पद्यांतरमुदाहृतं तैः तस्मादुद्य
च्चैत्यादि कुत्रास्ति परिणाम इत्यंनेन चिंत्यमिति बोध्यं · तोरेति चंद्रशेखरो येत्यर्थः धाराधरेति · नील
वायेत्यर्थः न घा गंगाया या हृशा भालचक्षुषा · नगेन कैलासेन च · कोविदानां · पंडितानां · शुद्धं · परिणा
मिश्रं · तदन्वयी ति त्वती पार्थभेदा च पि त्वादित्यर्थः कथ्येते इति त्रात्रेतल इंताभ्यामिति भावः तत्र
नयोर्मध्ये द्विर्भावः पुष्पकेतोरित्यर्थमाह द्वितीयमन्मथेति · विबुधेति वाक्यार्थमाह परोपकल्पतरु
रिति · एवं च पद्ये वहुवचनं कल्पभेदाभिप्रायेण · विकल्पश्चिंतारत्नस्तत्स्यार्थमाह चिंतामणिर्द्वि
तीय इति · द्वितीय इत्यस्याग्रेप्यनुषंगो बोध्यः तपने त्यादर्थमाह कर्ण इति वाक्यवेत्स्यार्थमाहेंद्र इ

१०२ ति॰भृंगतदस्यनेनप्रसिद्धंद्राद्यतिरेकः सूचितः हेतंदेवस्येत्याद्यर्थमाहहरिपति॰प्रकरणोपेतिप्रकृतो
102 पेत्यर्थः प्रकृतोपरंजकत्वेनेतितस्यस्तोपरक्तबुद्धिविषयीकरणेनेत्यर्थः उपयोगइतिवक्ष्यमाणार्थप
दस्यात्राप्यपकर्षः दासेइतिनायिकांप्रतिसापराधस्यानुभूततत्त्वादश्राहारस्यनायकस्योक्तिरियं॰
नायकसंबंधात्सुतकोदयः पुकांकुरा एवकंटकाग्राणीत्यर्थः तदुद्देतिअलंकारसर्वस्वकृदुदाहृते
त्यर्थः एवमग्रेपिआरोप्येतिपुलकेष्वित्यादिः प्रकृतेतिः प्रकृतोयः स्वेदस्तत्संबंधिनीयाव्यथेत्य
र्थः पक्तिपतनोपकत्वं॰तत्स्वतः तदनंतरं॰राजसंघटने॰राजमेलने॰उपायनस्य॰भेटिनजरइत्यादि
भाषाप्रसिद्धस्यआरोप्येतिवचसीत्यादिः प्रस्तुतविपरीतमिति॰अत्रेदंचिंत्यंयत्किंचिद्रूपोपायन
स्यराजसंघटनानुपायत्वात्॰विलक्षणवचनतुरंगमादिरूपस्यैवचतदुपायत्वात्॰एवंचराजसंघ १०२
टनोपयोगित्वंतुरंगमादिरूपेणैवोपायनस्येत्यतदुक्तिरेवविपरीतिअग्रिमनम्रधारणमिदंत्विसा

द्युक्तंचचिंत्यमितिविवोध्यं·वदनंस्येतितस्यजलत्वभिन्नत्वादितिभावः इंदोरितितस्योद्दीपकत्वेनतज्ज
नकत्वादितिभावः तल्लक्षणेति·रूपकलक्षणेत्यर्थः तदेवाहातथवेति·उक्तंमम्मटेनेतिभावः केचि
दुदंतीत्याभ्यामरुचि·सूचितान्वमाकृतिनिदानदेनालंकारभेदइतिसिद्धंतिनान्यत्रैवानापिभेदए
वोचितइति·परिणामे·वचः सुधाभिसंश्रोइत्यर्थः सुधाभितीसत्रधीरिसस्यानुषंगः एवमितिप्रा
ग्वदित्यर्थः वोधवेलेति·अनुयोगित्वमुखत्वप्रतियोगित्वमुखत्वकृतमितिभावः एवमग्रेपीसा
हतथेति·यस्य·वागमृतस्य·स्यलांतरेवोधमाहतथेति·तावत्·आदौ·तस्यत्र·सुंदर्यांसरसीतादा
त्म्यस्य·प्रकृतस्यर्थाभेदेतिप्रकृतस्यर्थप्रतियोगिकाभेदेत्यर्थः विभक्त्यासंसर्गस्यप्रकृतस्यर्थप्रतियोगि
कस्यैवव्युत्पत्तिसिद्धत्वेनतदसंभवादाहयथाकथंचिदिति·अत्र·मीनवतीनयनाभ्यामित्यत्र·उ बोधम
क्तप्रकारेणायमेववोधोन्यत्रैत्याहेयतेवेति·उदाहरणेचवोध्येति·परेतुपूर्वपदार्थप्रधानमयू

१०३ 103 व्यंसकादिसमासेनस्तुक्षाप्रतियोगिकाभेदवद्बुद्धचद्रत्येवबोधोरूपके· मीनवतीनयनाभ्यामित्यत्रसुंद
र्यस्मसीतादात्मारूपंरूपकंमुख्यकार्थः तत्रचमीनवत्त्वादिः साधारणोधर्मः तस्यचसुंदर्यमभावात्
प्रामवाधवुद्धिस्मगनोय नयनाभ्यांमीनवतीतिवसुंदरीविशेषणंसत्स्यांचमीनवत्त्वंप्रसिद्धमेव· एवंच
सुंदर्यमीनवत्त्वसंपादनरूपप्रकृतकार्योपयोगितामीनानांनयनात्मतापत्त्येवेतितद्दंशोपरिणाम
एवेतिनयनप्रतियोगिकाभेदवन्मीनवतीत्येवबोधइतिदिक्· पादांबुजंभवतुवोविजयायमंजुद्दस्यादे
रूपकोपमयोः संदेहएवेतिप्राहुसादाहृदिगिति· हूषितामिसस्यचंद्राह्ननेतीसंतेनान्वयः अत्रः
प्रागुक्तपथे· गुणवत्तोपांतद्रूपसाधारणधर्मे· एवंचविजृंभआक्रमणयोरुक्तरूपत्त्येव· रमणी
यमेवेति· अत्रेदंचिंत्यंराजशब्दस्यानेकार्यत्वात्विजृंभतेश्चप्रागल्भ्यत्तदुक्तार्थोभयपरत्वात्प्रकर १०३
णादेश्चशक्तिसंकोचकस्याभावात्तत्रेणशक्तैवतुल्यतयाऽर्थद्वयोपस्थितौसर्वदोमाधवःपात्वि

तिवत्श्लेषएवायंकपरिणामः क्वगानृपस्यव्यज्यमानतेतिप्रकृतन्नृसिंहराजोत्कर्षस्यचंद्रकर्मकाक्र
मणेनैवेतरन्नृपाक्रमणेनापिरूपपाद्त्वात्· नचद्वयोरपिराजपदार्थयोरितरक्रियान्वयेराजानावि
तिद्विवचनंस्यादितिवाच्यंनब्राह्मणोहन्यादितिवदुपपत्तेः समाहारद्वंद्वविषयेप्येकद्रोपस्यकेश्वि
द्वैयाकरणैरंगीकाराच्च· अस्तुवारोपस्तथापिनृपस्यैवारोप्यंनृपत्वेवापिनृपस्यसंभवतिअतएववि
द्याधरेणापिनिपयिणःस्वरूपेणकार्यानुप+ माणत्वचंद्रस्यैवविषयत्वमित्यत्रनियामकाभावः
अत्रैवचदीक्षिततात्पर्यं· अपिचप्रागल्भ्यस्यापिविजृंभत्यर्थत्वेनप्रकृतकार्योपायोगिता + योगत्वे
तदुपयोगायविषयिणाविषयात्मनोपरिणसपेक्षायांमेवपरिणामइत्युक्तं· यदाह· तंपरिणामहि
विधंकथयंसारोप्यमाणविषयतया· परिणमितियत्रविषयीप्रस्तुतकार्योपयोगायेति· ननुतात्पर्य
विषयीभूतप्रकृतकार्यानुपयोगित्वमस्त्विवेतिचेत्तस्यैवतात्पर्यविषयत्वेमानेविभावयेति· तेरेव·

१०४ अथदीक्षितैरेव· परोक्तिं विद्यानाथोक्तिं· तापार्त्तं· चिन्तामिति त्रोषः वैयाकरणमते नाहत्वाक्येति· नैया
104 यिकमते नाहत्त्वाक्येति· परैरितिउपलक्षेत्यर्थः वंधुना विनेति· नाहत्त्वो नेंदुरूपेण वंधुनेत्यर्थः तेनेति· तस्या
द्दीपवत्वेन स्वरूपेण तस्य तापजनकत्वात् इति भावः अयं तु इंदुवैसुदाहृतः स्पृगिति आदो· आतपा
दिकृतसंतापशापकमेघत्वेन तस्योपस्थितिरिति भावः दोषाश्चेति· लिंगभेदादयइत्यर्थः इति
परिणामः संशयं लक्षयति अथेति धीरमणीयेतिनाहत्वाधीवृत्तिसंशयत्वप्रकारकज्ञानविषया
सालंकार इत्यर्थः उदाहरणमूलेत्यस्यभावर्त्समाहाधीति· हंतेति खेदे वांधवानां विश्वामित्रादीनां·
निरपायं निष्प्रतिबंधकं क्रियाविशेषणमेतत्· तदितिनाहत्त्वाअनेत्यर्थः मीत्रपदेनालंकारत्वव्यवच्छे
दः यद्यप्यधिरोप्येति पद्ये संशयस्य नसाहत्र्यमूलं चमितियथाश्रुते नैव वारणं संभवति तथाथन्यत्रा १०४
प्यदोषायाहसादृश्येति· तद्यावर्त्यमाहतेवेति· तर्थोर्थ विवक्षणेनेत्यर्थः प्रांतरंअरण्यं· यथाश्रुते

ऽतिप्रसंगमाहवाकारेति॰ अपिः प्रागुक्तसमुच्चायकः नेनेत्यस्यार्थमाहतस्येति उपमाविकल्पस्येत्यर्थः
मालारूपकेति॰ धर्मस्यात्मा भागधेयं क्षमायाः सारः स्वष्टेः रित्यादावित्यर्थः ननु कोद्वयोः समबलत्वविवक्षा
षणेन कथमुत्प्रेक्षायाहृत्तिः तत्रापितयोस्तुल्यबलत्वमसत्वाद् आह समानेति तत्र तु विधेयांशो भा
सकसामग्रीउत्कटेतिभावः नन्वेवं नानेतिमात्रं व्यर्थनिताआहे तदितिभासमानेति समबलेत्यतदि
त्यर्थः अनेकेति अनेकधर्मकस्य संशयस्येत्यर्थः एतदितिरमणीयत्वोपस्कारकत्वइत्येत्यर्थः ननु
संशये विरोधो नासते मानाभावात् किंतु विरोधित्वज्ञानाभाव विशिष्टनानाकोटिकज्ञानमेव संश
य इति कथमुक्तलक्षणमत आह यद्वेति॰ अन्यतरत्रोभयभेदसत्वात्तथोक्तौ तत्रातिप्रसंगापत्तेराहा
न्यतरेति॰ तथा च संभावनाभिन्नत्वेनित्यर्थलाभात् रूपकोत्प्रेक्षादावतिप्रसंगइति भावः तत्रालिर्न
त्वं वेति वाक्याद्विरोधमानवादिमने अलित्ववानयमलित्वविरुद्धनेत्रत्ववानिति विशिष्टवैशिष्ट्यया

१०५ यैनैकत्वद्वयमितिन्यायेनवाबोधः अलिशब्दस्यचवाशब्दसमभिव्याहारेउभयत्रान्वयः व्युत्पत्तिवैचि
105 त्र्यात् केचित्तुवाशब्दद्वयबलादलित्वविशिष्टनेत्रत्ववान् अयंनेत्रत्वविशिष्टालित्ववानितिबोधनादु
तदभानवादेतुआलित्वेवानयनेनेत्रत्ववानितिबोधः समुच्चयेत्वेतन्मते विरोधभानमंगीकार्यमितिदि
क् · प्रकृतेतिव्याख्यातंस्रक् · इतिपूर्वश्लोकः प्रपेदिरामः तरणीति · कालिंदीत्यर्थः सात्वतयोस्त्वा ·
द्वयंतुमधुरेतिभावः वसतिर्वासः अत्रनिश्चयस्यविनोमध्येप्रतिपादनात्रडूमत्वं अतएवतृतीयाद्वे
दः कपिः हनूमान् वियोगिनीतिश्रीरामचंद्रवियुक्तासीतेत्यर्थः नन्वेषूदाहरणेषुसंज्ञायस्यैवप्राधान्ये
नान्यानुपस्कारकत्वात्कथमलंकारत्वमतआहेष्विति · तथाचतद्वृत्तेर्योग्यतामात्रेणगौणः त
द्व्यवहारइतिभावः एवंच · उक्तरीत्यासंज्ञायलक्षणपर्यवसानेच तेश्रीरामंप्रथमेसंयोगदत्तायां · १०५
अद्भुतेतिबहुव्रीहिः अलक्षणेति · लक्ष्मणंवियुक्तासमीपप्रदेशात्जायासीतायेनेत्यर्थः अथरा

वणकृतसीतापहारोत्तरं अस्य संशयस्य विप्रलंभवीषवत्त्वादाह सत्यपीति॰ त्रिविधस्याप्यस्य द्वैविध्य
माहैवमिति॰ द्वयोरुपादानादिति भावः॰ उवाभासां निधेः सूर्यस्य॰ पूर्वातो भेदांतरमाह हो पंचेति॰ नन्व
त्र मही मंडलस्योपादानात्सारोपत्वमेवातआहात्रचेति॰ विवेकितात्मेयार्थे इत्यर्थः॰ नन्वेवमपि किरण
व्रातस्योपादानात्सारोपत्वमेवातआह विषयेति॰ तदिति आरोपेत्यर्थः॰ तथा च तत्त्वेनानुपादान
मिति भावः॰ उपसंहरति अत इति तावत् आदौ॰ इदं किरणजातं॰ अनपेक्षत्वे हेतुमाह व्यंजनेति॰ तर्हि
कुत्र तदपेक्षा तत्राहापेक्षेते चेति॰ एवं न्यारूपमूलमेवायमित्यध्यवसानमूलः संशयः स्वपुष्प्यायमा
ण इति भावः॰ तदाह कुत्रेति॰ अस्या इति॰ मालतीमाधवे मालतीवर्णनमिदं॰ मासो वसंतः॰ वनितास्त्र
ष्टुत्वे प्रजापतिशब्दवोध्यं अभावादित्यव्यामोहहेतुः संशयलक्षणमाहाविरोधेनेति॰ हियतः॰ अस्या
मालस्याः तदुपपादनं खंडयति न चात्रेति॰ एवं चेति॰ चोत्वर्थे यत एवं सतीत्यर्थः॰ विधेयस्य पाश्चात्य

मितिनियमादितिभावः तत एव अप्पदीक्षिता एव अनवधारणेतस्य तात्पर्यार्थमाह निश्चयेति नन्वेवम
न्योन्याश्रयापत्तिरत आह निश्चयत्वेत्विति कन्नयकेतोः चंद्रस्य कन्नपाः कुरंगः रुरुहे आरूढाः लेवन
तया एतद्रूपधर्मेण तीरे इति व्याख्यातं प्राक् मिलादितिसविकासमित्यर्थः इदंपदार्थेति इदंत्वे
नेदंपदार्थत्वेत्यर्थः तथा चेदमिदं वाकमूलमित्यौचित्येनानेककोटिकत्वाभावात् नायं संशय इति
भावः ननु प्रकृतस्यान्यथानुपपत्त्या तथा कल्पना चान्यथासिद्धेत्याह केति कमलेत्यर्थः अपरेति इदंप
दार्थेत्यर्थः पर्यवसितमाह कमलत्वमिति ध्वनेरुदाहरणांतरं खंडयति आहेति सममेखुर्मदनः
स्तुमं पुष्पं तदीपा मदमीया इयं सीता विषयेति आज्ञादीत्यर्थः व्यंग्येति व्यंग्यरूपोयः प्रभेदस्त
द्व्यपदेशस्येत्यर्थः प्रतिप्रकारं प्रतिसंदेह तत्रत्वाज्ञासंदेहे विलंघनीयत्वं वनदेवतासंदेहे वनस्थि
तत्वं च स्थगुपात्तमिति भावः कोचिदिति इदं च पद्यमप्पदीक्षितमलघुरुषवक्षस्थलाचार्यकृ

तवरदराजवसंतोत्सवस्थ्यं॰ वरदः काचीदेवताविष्णुः तदिति संशय्येत्यर्थः तत्र सामान्यज्ञाने॰ वेक्षणेने
तिव्यंजन्यार्थवृत्तिरपीतिभावः संशयमात्रस्यसर्वस्यसंशयस्य॰ र्थत्वेनसामेतिएतद्रूपसामान्याकारणे
त्यर्थः अवलीढेति॰ वोध्यतयेत्यर्थः तयैवशक्तै॰ कवलीतिवोधनादित्यर्थः नन्वेवमपिविशेषरूपे
णव्यंग्यत्वमेवतिआहवाच्यार्थेति॰ विशेषसंशयस्येत्यादिः तदाहकस्यापीति॰ विशेषस्यापीत्यर्थः
कुंभेतिपांथसंवोधनमितिकश्चित्तन्नाभिकादासीत्यन्यः जलाद्याहरणार्थंदासीनक्रीडादासीतितु
त्वं॰ वियोगात्साप्यत्वं॰ कतिपयेत्यनेनद्रुतमागमनाभावः सूचितः सेमयेस्कैव्याजपूर्वमित्यर्थः पूर्वो
दाहरणाशयेनाहव्यंजकेतिद्वितीयाशयेनाहव्यंग्येतितत्रतेषांधर्माणांमध्येत्र्यामेतितद्विशिष्टाभिरा
मत्वमित्यर्थः सएव॰ अनुगम्येव॰ नेत्रेतितयोरभिरामभित्यर्थः समेति॰ संशयंकृतवंतः एवमग्रेपिपृथगि
तिउपपादितामिदंश्राकू॰ सोदामिन्येति॰ सहकांतेसत्रान्वेति॰ वन्कुरीलता॰ पाणिपद्मांरस्थितेति॰

अत्रगृहप्रदेशावि
शेषे॰ एवमग्रेपि॰

पादप्रतिविंबानिर्देशान्न्यूनतात्र अत एव पाण्योनन योरित्यंग्निप्रोक्तिः संगच्छते· वस्तुतस्तु कुल्लपद्मपा
णिकपादयोरपिप्रतिविंबेइत्तिनदोषः व्याख्यानंतूपलक्षणत्वेन योज्यमितिबोध्यं· छेद्योः वल्लरी
पद्मिन्योः विंबप्रतिविंबभावापन्नस्यानिर्दिष्टस्योदाहरणंदत्ता·निर्दिष्टस्यतदामिति· चंद्रस्यत्रि
धोसत्रि· समुद्रात अत्रिनेत्रात परमेश्वरमनसश्चेतिभावः तदानी रामोत्पत्तिसमये· नीमितिप्रोति
तदानीमितिप्रतिपाद्यप्रकरणेस्यर्थः रमो· रामचंद्रो· अयंचसंज्ञायः परनिष्ठइतिस्वभिन्ननिष्ठइ
स्यर्थः क्वचिद्व्यभिचारादाहप्रायशइति· अनाहार्यत्वमुपपादयतितत्रेतिसंशयानानामितिपा
ठः भ्रमरादिविशेषणमेतत· एवेन परनिष्ठत्वरव्यवच्छेदः यत्रमुखरूपवस्तुनि· इदमेवाग्रेहृदंप
दार्थः प्रसासजिन्यायेनाहकवेरिति· परंपरितोपीति· अत्रारोपस्यारोपमात्रापायत्वेनपरंपरित
त्वंनतुसंज्ञायस्यासंज्ञायोपापत्वेन· देवादीनांतमस्त्वादिसंदेहाविषयत्वादितिबोध्यं· त्रिमूर्त्तिः

ऋग्यजुःसामात्मकाम्नविता·वेरींद्रेति·वेरिश्रेष्ठाएववंत्रारण्यमित्यर्थः जीवातुर्जीवनौषधं·अस्मेत
द्राःवहवःकल्मनाःसंशयाःस्वगतएवैतस्यवधारणमयुक्तमित्याहक्वचित्स्वरनिष्ठोपीति·यद्यपिविद्वद्दे
न्येसुदाहृतोपिपरनिष्ठोभवतितथापिकेषामितिसामान्येननिर्दिष्टत्वात्स्वनिष्ठोपिभवतीत्यतउदाहर
णांतरमाहगगनादिति·विभावसुःअग्निःमुनिःवसिष्ठःसमञ्जोत·संशयंकृतवान्अत्रमगनादिति
पद्ये·चोऽन्यसमुच्चायकः·तस्यवसिष्ठस्य·पुरोवर्तिनि·श्रीरामे·त्रिन्याभेदेनेतिचिंत्यं·तस्यैवआ
हार्यबोधस्यैव·ससंदेहइतिव्यवहारस्त्वौपचारिकोभ्रांतिमानितिवत्· इतिससंदेहः· अथ
भ्रांतिमंतलक्षयति·अथेति·अन्यत्रनैवमित्याहप्रकृतेइति·आदिनामनुष्यग्रहणंप्रतिज्ञावि
रोधाभावायाहार्येति·औपचारिकइतिभ्रांतिनिष्ठालंकारत्वस्यतद्धृतिआरोपात्भ्रांतितद्धेतो
रभेदारोपद्धितिभावः·ससंदेहइतिव्यवहारोप्येवमेवेतिप्रागुक्तं·प्रमत्तिकविभिन्नेत्यर्थःअलं

१०८ कारे॰ अलंकारिणां मध्ये॰ आद्यमिकवचनं सूत्रानुरोधेनाह कवीति॰ ननु तत्रापि चमत्कारोऽस्त्येवात
148 आह कवीति॰ उक्तौ नायकं प्रतीति शेषः॰ उन्मादयेति विप्रलंभमहापदाद्दिजन्मा अन्यस्मिन्नन्या
वभास उन्माद इति मतेनेदं नन्वत्र विप्रलंभजन्यत्वे मोन्मादस्य कथं तदुपस्कारकत्वमत आह यद्वे
ति॰ अत एवं॰ निश्चय इत्यत्रैकत्वविवक्षणादेव॰ उच्यत इति॰ अयं भावः तद्धि शेषणेनारोप्यमाणानुभ
वास्यस्वारसिकस्य कविप्रतिभयाकल्पनेविवक्षितं तस्यैव विषयविधानसामर्थ्यात् इति॰ अस्मिन्
चेति मत्रैत्वाद्युक्तामित्यर्थः॰ तत्रेति॰ तद्धाकज्ञानुभवस्य तत्रापि सत्त्वादिति भावः॰ कथमपीति ज्ञान
विषययोर्भेदेन ज्ञानवृत्तिधर्मस्य विषयेऽसत्त्वादिति भावः॰ ननु नोक्तसंशयेऽतिप्रसंगः॰ विषयस्ये
षद् इत्यनेन प्रतिपादनादत आह कमलमिति॰ अत एव वक्ष्यति भ्रान्त्यासंकीर्ण इति॰ अतिव्याप्ते
श्चेति॰ उल्लेखत्वभ्रान्तित्वयोरत्र संकीर्णत्वं बाधकाभावात् भूतत्वमूर्तत्वयोरिव॰ नरैर्धरयतिप्र १०८

देसत्रोल्लेखत्वस्यकनकद्वेत्तत्रभ्रांतित्वस्यस्यावकाशत्वादितिकश्चित्‌ वनितेतिवदंत्येतांल्लो
काइतित्वद्दाहृतापन्हुतिसंकीर्णोत्तस्यकनकोल्लेखेउपमेयतावच्छेदकनिषेधसामानाधिक
रण्यनैापार्थपद्मातिलक्षणातिव्याप्तिस्तवान्यास्तिः एवंतत्तदलंकारसंकीर्णतित्तदलंकारलक्ष
णस्यसादुर्वारेतिचिंत्यमिदमित्यपरे· तावत्‌आदौ· उपेति· वर्ण्यतेत्यर्थः ननुयथाकथंचित्साहृत्य
मप्यस्तीत्यतआहहापिचेति· धर्मिणिस्तनरूपे· मुखकमलमितिरूपकं· आमुपेत्याह प्रस्तुतेति·
एवमायेदोषमुक्त्वाद्वितीयेदोषमाहतत्रासोल्लेति· भ्रमरभयजननजातत्वेष्टाइत्यर्थः विधेयावि
मर्शादिति· विधेयस्याकथनादित्यर्थः उद्देश्यकोटिप्रविष्टंसर्वमितिभावः पाणीनुद्दिश्यविशि
ष्टस्यकीरकर्तृकदष्टत्वस्यविधेयत्वेकोदोषइतिचिंत्यमिदं· विवेति दृष्टत्वस्येत्यर्थः तृतीये
तमाहैवमिति· तल्लोपायकीरहूकरणाय· तावत्‌ आदौ· दोषमूलः संभवतीत्याह संभवन्त्वे

१०९ 109 ति॰ शाब्दप्रयोगेष्विति शाब्दे प्रयोगे इत्यर्थः आसत्त्याकांक्षयोः स्वारसिकयोरभावादाह यथाकथंचि
दिति॰ जातान्वयेति॰ नाप्यरण्यं शरण्यमिति संनिहितेनेति भावः न त्वितिविभिन्नविभक्तित्वात्त
स्मिन्नस्व भेदाभावाच्चेति भावः ननु विभक्तिविपरिणामेनाभेदान्वयः सुलभोऽत आह विभक्तीति॰
प्रक्रमेति॰ नन्वेवं दीक्षितैः कथमुदाहृतमत आह दीक्षितेत्यादिना॰ निश्चयपरत्वमिति॰ तथा॰ पसंश
यसंभावनारूपयोस्तयोर्नातिप्रसंग इति भावः विनीतत्वज्ञाने॰ अनाहार्यत्वेनेति नन्वेवमपि कथम
तिशयोक्तावतिव्याप्तिवारणं॰ तस्यामनाहार्याभेदज्ञानस्यैव सर्वसंमतत्वात्प्रागुक्तत्वाच्चेति चे
न्नचिंत्यमेतत्॰ मतुवितिभ्रांतिमानिति मतुबित्यर्थः अत्र धर्मभेदमाह तत्रेति॰ उक्तोदाहरणा
नां मध्ये इत्यर्थः धाराधरो मेघः शिखावलाः मयूराः इति भ्रांतिमान्॰ उल्लेखं लक्षयति अथो १०९
ल्लेख इति॰ ग्रहणं ज्ञानं॰ कीदृशः भृंगाः चंचरीकाः भ्रमराः नन्वेवं बहुवचनान्विप्रभृत्त्येव स्यात्तद्ध

योर्नस्यादित आह अविवक्षितेति· नृत्सदिति· राजानं प्रति कवेरुक्तिः अतुलेति· आलोकालोक
स्य किंचिदंशोप्रकाशः किंचिदंशोऽप्रकाशः धूल्याक्रांतत्वेनुस्तवीशानीप्रकाशात्वंगतुरस्य
र्थः नन्वेवंबहुवचनौचित्येन कथमेकत्वमत आह एकत्वमिति· अनेकेतियुकस्यवस्तुनोऽ
नेकप्रकारकस्येत्यादिः· बहुवचनमविवक्षितमित्युक्तस्योदाहरणद्वयोरिति नन्वेवमपिनिमित्त
वशादिलक्षिकमत आह निमित्तेति· नन्वकीर्तौ विस्फूर्तिमत्यां तेमृषालक्ष्मीत्वं किंनः इयेपिनागास्त
न्वंति जिह्वांतोल्लोलनं मुहुरिति भ्रांतिमदुदाहरणे एकस्या एव कीर्त्तेरनेकत्र कुंजरभुजंगरूपेग्रहीत्रा
मृणालक्ष्मीररूपत्वानेकप्रकारेणोल्लेखनमस्तीति तत्रातिव्याप्तिनिरासाय निमित्तभेदादित्यर्थः किं
निमित्तवशादित्यो वक्ष्यपकं तत्र कीर्त्तिगतं धावल्यमेकमेवोल्लेखद्वयेपि निमित्तमिति वाच्य· स्वस्वप्रिया
हारलिप्सारूपनिमित्तभेदस्यापि तत्र सत्वेन तस्य संग्राह्यत्वादिति भावः वरेति· ब्रह्मसुस्वामीत्यर्थः

११० स्वकीयेतिमंदाकिनीत्यर्थः उदरोति उत्कृष्टतरेत्यर्थः आतनोः राज्ञः श्रीगंगाप्रमतनोः त्वांकल्याणं
110
सपदितत्कालंतनोत्वित्यर्थः लिप्सालाभेच्छा तस्यालंकारस्त्वायाहेगंगेति कविनिष्ठेत्यादि अ
त्रेति पद्ये इत्यर्थः उक्त इति शेषः सुंदरीति आलीति च संबोधने नायिकोप्रतिसख्यानायकस्यवाउ
क्तिः चिरचकोराइति स्वस्वप्रियादारलिप्साचनिमित्तं एतां नायिकां नायको क्रियं वच्छेदकस्य
वनितात्वस्य निवेध्येति आर्थिकेत्यादि एवमपि उक्तविशेषणदानेपि गम्येति बहुव्रीहिः श्रीकं
ठेति मुहुस्येकमुदाहरणं सोपपादनमुक्तायथावाहर्षचरिते इत्यादि यत्नपोवनमित्यादिगद्यं
अन्त्यते स्यस्य सर्वत्र संबंधः यद्धद्वार्थः श्रीकंठजनपदः मुहुइति तत्र तपोवनादिभूमिषुत्वादिति
भावः यमनगरत्वादीनां ताद्रूप्यानुभवगोचरतयाऽन्वयेआह अभ्रांतीति पदितेषामुपरंजकतामा ११०
त्रेणान्वयस्तदा आह रूपकेति एवंविधेति विलक्षणेत्यर्थः त्वदुदेतित्वयाप्रथममुख्यत्वेनोदा

इतेत्यर्थः तादृशभ्रांतिविशेषस्यापि वरिणावश्यकत्वात् अन्यथासंकीर्णं तत्कथमादावुदाहृतं तं
द्विविक्तविषयस्यैवादावुदाहर्तुमौचित्यात् अन्यथा लेकारभेदो न स्यादिति भावः अनेकधेति पप
स्त्वादीत्यर्थः उपसंहरति तस्मादिति शिबिः तन्नामको राजा अत्र द्वयोरिति प्रथमपाद द्वितीयपा
दप्रतिपाद्ययोरित्यर्थः उ[illegible]स्यैवद्वैदमाहार्यं चेति उल्लेखश्चेत्यर्थः उल्लेखसतीति शेषः एवमत्रापि
अधिनश्यति राजानं प्रतिकस्युक्तिः हरीतिनंमास्तुतिः नरवरेतिनरवित्यर्थः वस्तुमाल्यादिति स्वस्वरूप
स्यैवमाहात्म्यादित्यर्थः पूर्वोदाहरणे एकस्यैव राज्ञो द्वात्रसत्रात तत्त्वह तत्त्वप्रकारेणोल्लेखः अत्र तु
एकस्य पुण्यपनमात्त्वस्य हारिपदसंगादिहेतुकत्वेनोल्लेखः प्रकारस्य फलत्वहेतुत्वाभ्यां फलोल्लेख
त्वादिव्यवहार इति बोध्यं संबंधिनामिति विषयरूप आश्रयरूप एकाधिकरणवृत्तित्वेन प्रतीय
मानरूपोल्लेखः प्रकारस्य फलत्वहेतुत्वाभ्यां फलोल्लेखत्वादिव्यवहार इति बोध्यं संबंधिनामिति

१११ विषयरूप आश्रयरूप एकाधिकरणवृत्तित्वेन प्रतीयमानरूपश्चयेसंबंधिनः विषयाश्रयसहचरादिरू
पायो संबंधिन इति यावत तेषां मध्ये यस्य कस्य चिद्यदनेकत्वं तत्प्रयुक्तमित्यर्थः व्राते समूहे मृद्वीति
काव्यानि पुकोमलेत्यर्थः व्यालायेषु उक्तिमात्रेषु मृद्वीका द्राक्षारूपो मधुरे इति यावदिति कश्चि
त तर्के इति तर्कस्य प्रतीत्यर्थः वस्तु निर्द्धये पोरेति परस्परावेत्यर्थः कांदिशीति कस्यां दिशि गंतव्य
मिति धी विशिष्टेत्यर्थः राज्ञां नं प्रति कस्य उक्तिः अस्यालंकारत्वायाह राजेति कवि निष्ठेत्यादिः नास्ती
ति तथा चैकस्य वस्तुनः संज्ञाभावान्नेदं लक्ष्यमिति भावः तथालक्षणे विवक्षाया अभावादाह यथा
वेति अत्र परदुःखादीनां विषयाणामनेकत्वात्साधूनामनेकविधत्वं सहमुपेक्ष्यालंकारत्वमु
पपादयति साधव इति एवं विषयानेकत्वप्रयुक्तमुदाहृत्याश्रयानेकत्वप्रयुक्तमुदाहरति यथा १११
वेति ताडकाशत्रोः श्रीरामचंद्रस्य समानाधिकरणानेकत्वप्रयुक्तमुदाहरति विद्वदिति यथा वेत्या

रि॰ पतिषु॰ भिक्षुषु॰ गरोद्गाराः विषोद्गाराः आदिपदार्थमाहैवमिति॰ उपमानात्स्मृत्या विधानादा
हात्रोपमेति॰ तत्रात्रास्मर्यादाह पर्यवेति॰ स्वेक्षयेति संकीर्णइतिशेषः भुजंगमेति सर्पश्रेष्ठादित्यर्थः
सप्तमीसमासः कर्मधारयोवा॰ द्राक्षेति॰ द्राक्षायायामाधुर्यंदीक्षातस्यागुरवइत्यर्थः करवालेस्
त्रोपमाः क्रूराइत्यत्रव्यतिरेकः तयोरुपमाव्यतिरेकयोः मुखइत्यत्राहो स्वेक्षयाचैति॰ द्वयोरुल्लेखयोः
संकरमादिपदग्राह्यसंबंधिभेदस्यपुनस्त्वन्यदर्शयितुमुदाहरतियमः तन्नीहृतांप्रतिपक्षिराजज
नपदानां॰ कुलिशंवज्रंराजानंप्रतिकम्बुक्तिः यमत्वादिनाभ्रांतिरपीतिः चारणेषुनंभ्रांतिवर्णने
राज्ञोत्कर्षविरोधीतिचिंत्यमिदं॰ प्रागुक्तोल्लेखेति॰ इदमपिचिंत्यं॰ ज्ञानस्यानिबंधनेनज्ञानप
र्यंतस्यएवोल्लेखस्यकथमप्यत्रासत्वात्॰ नियतव्यंजकसामग्र्यभावेनार्थस्यापितस्यासत्वाच्चे
तिदिक्॰ इतोपिभ्रांतिरपिसंभवतीतिचिंत्यमितिविबोध्यं॰ विषयाश्रयसहचराणांसंबंधिनामत्रास

११२ त्वादाह संबंधिषष्ठ्यंतेति· षष्ठ्यंतार्थसंबंधीत्यर्थः क्वचित्तथैव पाठः यं प्रकृते राज्ञानं एवमग्रेपि· अ
112
त्रापि· जनकतयेति इदं ज्ञानं च मत्कारी सत्तुभवाकारः भिन्नप्रकारेति पाठः भिन्नत्वं प्रकारविशेषणं मा
त्रमवछेद्यमाह ननु इति· अन्यतरत्वस्य गुरुत्वी हृदुर्ज्ञेयत्वाच्चाह परे त्विति· अनल्पेति· वहुलापाइत्य
र्थः गदे केति रोगप्रधाने त्यर्थः समासः प्राग्वत्· विचलदिति विवलदिति पाठां मरे अर्थस्तत्तुल्यः स्म
येति· सत्युक्तिर्नायकोक्तिर्वा· एकेकेति चंद्रस्येन पद्मत्वेन च ग्रहणे त्यर्थः ज्ञाकेति· नैवात्रो ह्लेखा
ली त्यर्थः विषयस्य च मदिति· जन्यत्वे षष्ठ्यर्थश्च मत्कृतावत्वेति· व्याप्रतिगतिकर्मकुमुदिनीः ता
श्चेत्यर्थः सगरेति सगरसुतप्रयासेति त्यर्थः सागरकार्यस्य कीर्त्यैव संपादितत्वादिति भावः रू
पकेति चंद्रसागररूपकेत्यर्थः इत्यपह्नुतिः अपह्नुतिलक्षयति अथेति· छेदकेति तत्सन्निषेधेत्य ११२
र्थः रूपकवारणायेति भ्रांत्यादिरप्युपलक्षणं· तदुपपादयति अस्यां चेति· सः विरोधः अस्माकु

त्वनम्येति· एतदंशेः तिरश्चोक्तिरिति प्रक्रमभंगे गोत्रकाम्य इति बोध्यं अत्र स्पष्टत्वांल्लक्षणम
मन्वयमुपेक्ष्य भेदमाहेयं चेति उदाहृता चेत्यर्थः वयवकेति बहुव्रीहिणा संघातविशेषणं·
रूपामिति अंशभेदेनेति भावः कश्चुक्तौ स्यं· विपक्षेबाधकमाह नो चेदिति· अनयोः द्वयोः स्त्वदे
वपातकाल एव· सदैवेति पाठांतरं· अत्र निरवयवत्वे सम्पष्टत्वात्प्राग्वदाहात्रेति किंचिदिति भो स्या
दीत्यर्थः तस्मिन्नतन्निषेधे· तस्य वाक्यस्य· निषेधयोरिति मध्ये इति शेषः अथेति कश्चिदित्यर्थः
अनुवाद्यत्वं वेति· उभयोरपि अनुवाद्यत्वं विधेयत्वं वेत्यर्थः क्वचितक्वचिद्व्यस्यानुषंगः अस
मेव निरासमाहैवमपीति· चमत्कारित्वाभावेपीत्यर्थः दर्पतेरिति उक्तप्रकारजातमिति शेषः
।तत्र तेषां मध्ये· प्रथमेति स्मितमिति पादप्रतिपाद्ये इत्यर्थः अपह्नवेति निषेधस्य प्रागल्लेखा
दिति भावः उभयोस्मादृष्यानिषेधयोः अस्यात्रिष्वन्वयः एतस्य दार्थस्योद्देश्यत्वोदाहविधेये

११३ 113 तिद्वितीयेति· मुखमितिपादप्रतिपाद्येइत्यर्थः तुरुक्तवैलक्षण्येतदेवाह वृक्षगतेति· स्तनद्वं
द्वमितिपादप्रतिपाद्यतृतीयावयवस्याद्वितीयेनतुल्यत्वान्ननुपेक्ष्याहचतुर्थेति· स्तनेतिपादप्रति
पाद्येइत्यर्थः पुनः शब्दोवैलक्षण्ये पाकेकुसुमस्यउदाहरणं सप्रकारभेदमाह वदनैरिति· अनपा
स्तनयोः अमंत्राः जीवनोपायभूताः आर्थत्वमनुवीध्य कंचेत्येवमुक्तः पाठः विधेयत्वंचेत्य
पपाठः अतएवाह निवेशनेति· आहार्यत्वनिवेशफलमाहतेनेतितैनीशितमध्यभागेनेयहि
वरंतस्मादुन्मीलनप्रकाशमाने आकाशानेल्पगुणोपमेयेत्यर्थः अंगारतीक्ष्णकिरणेरित्यर्थः
छायामात्रंसादृश्यमात्रं· निश्चयत्वनिवेशफलमाहालिरिति· व्याख्यातमिदं· अपदार्थत्वं
कथमपिपदाप्रतिपाद्यत्वं· वाशब्देति· विकल्पद्वाएवोशब्दव्यंग्यत्वातइत्यर्थः एवंचार्थि ११३
कोनिषेधइतिभावः एकारिकायाः स्वीयव्याख्यानेमाहोपमेयमसत्यमिति· अत्रत्युपमेयपदे

पदार्थोपलक्षणमात्ररूपकमित्येतद्विरोधश्चिंत्यइत्यग्रेस्फुटं निरूपयिष्यते· प्रतीताविति तत्रै
वप्रस्यासत्तेरिति भावः एवं पूर्वत्रापि बोध्यं· साम्यात सादृश्यमूलकं· तथैव न प्रवर्त्तते· उपसंहर
तितस्मादिति दृढारोपं आरोपदार्ढ्यसंपादकं न विषमिति· अत्रेदं चिंत्यं नेदं मुखं चंद्र इति प्रसि
द्धापह्नुत्युदाहरणेपि मुखनिषेधस्य चंद्रारोपदार्ढ्यसंपादकत्वस्य वक्तुमशक्यत्वेनानुभवसिद्ध
त्वेन चोपह्नुतिमात्रस्योच्छेदापत्तेः· यदि तु निषेधपूर्वकारोपे चमत्कारविशेषस्य चंद्रारोपे शेषस्या
नुभवसिद्धत्वादलंकारांतरत्वं तर्हि प्रकृतेपि तुल्यं इति· प्राचीनेति प्रकाशकारादीत्यर्थः एवमग्रे
पि दृष्टांतोल्लेखेन तदनुरोधेनाग्रे गाणितरतिस्तुचितं· अपह्नुतिः तत्तावच्छिन्नं· ननु निषेधपूर्वका
रोपे चमत्कारविशेषस्यानुभवसिद्धत्वेन कथमपलापोऽतो दोषांतरमाहेवमपीति· उक्तरीसा
नथांगीकारेपदोषांतरमाहापि चेति· तस्यामेव· पर्यस्तापह्नुतावेव· रत्नाकरादिति आदिनादं

११५ ग्रहणं इत्थं हि काव्यादर्शे इति नोक्तं अपह्नुतिरपह्नुत्य किंचिदन्यार्थसूचनमिति यथा कथंचित्सा
115 मंजस्यमिति· एतदनंतरमत्र किंचित्स्यादिति तत्तत्सर्वं पुस्तके दुर्लभमेव अनंतरं विधेयमिति दिगिति
ग्रंथः अवयवरूपकसंकीर्णमुदाहरति अनल्पेति दानवर्षयोरूपकं· दारिद्र्यरूपस्योष्मणो ना
शने समर्थ इत्यर्थः सानुपवीरोपेति अवयवारोपसहिते इत्यर्थः तद्रूपकसहितेति यावत्· आरो
पेति· आरोपस्येत्यादिः दयिते इति व्याख्यातमिदं प्राक् तावत् आदौ· अप्राधान्ये ध्वनित्वाभा
वादाह प्राधान्येनेति· तदिति अवयवीत्यर्थः न भुविलासस्य हृयालुत्वरूपक्रियागुणरूपधर्मस्य प्र
कृतयोः सत्वेन तुल्ययोगिते वेयमत आह तुल्येति· त्वदालेख्ये इति त्वत्प्रतिकृतिभूतचित्रे इत्यर्थः ना
यकं प्रति सखं सख्युक्तिः एका तन्वी सखी· चक्रं सुदर्शनं सुपर्णो सुतं गरुडं· अपि अथ काचित्तथैव ११५
पाठः अपमार्जनयोग्यत्वापहेतुगर्भविशेषणं स्विद्यत्पाणिरिति· अपरा तत्सखी· तस्यापि पुंडरीका

क्षस्यापि· तदुभयं चक्र सुपर्णद्वयं· इत्यादिन्यायेन तथालेखनेनेति व्यंजितमित्यन्वयः तत्रेति उच्यतेइ
तिशेषः ननु विनिगमनाविरहो· त आह नापतिएवमग्रेपि भागोपि व्यंउं· नाकाइत्यनुषज्यते· व्यंजकेति चक्रसु
पर्णलेखनस्येत्यर्थः ननु कथं तदनुभवो· त आह नापति· सः तादृशनिषेधभागः उक्तपद्योरिति शेषः ग
वेष्येत अन्वेष्येत ननु विनिगमनाविरहो· त आह नापति उपलभ्यते इति· प्रकृतपद्ये इति शेषः दुर्घट
इति· तज्ज्ञानस्य तत्र प्रतिबंधकत्वादिति भावः सोपि निषेधभागोपि अन्यथानुपपत्त्येति भावः ननु
तत्रापि पतत्स्वीकारो· त आह तत्रापीति· रूपकयोरित्यर्थः एवं च तदुच्छेदापत्तिरिति भावः बाधज्ञानमाहा
र्यज्ञानेन प्रतिबंधकमित्यादिन्यायेनाहार्येति· सामेति नत्वबच्छेदकावच्छेदेनेति भावः आरोप्येति आहा
र्यज्ञानविषयीक्रियमाणतयेत्यर्थः तदाकारमाहासाविति· चस्त्वर्थे· द्वितीयपक्षो व्यंग्यत्वे समुच्चाय
कः अपि नाप्रकारान्तरादि लक्षणसमुच्चयः ननु निषेधसामानाधिकरण्येनोपमानतादात्म्यारोपसत्त्वा

११५ त्कथं तदभावोऽत आहात्रहीति· ननु सर्वमारोपितत्वात्स्वकृत एव सोऽत आह नहीति· निषिध्यवि
षयतिस्यादिनेति· निषिध्यविषयं सामान्यादन्यारोप इति तु त्वया प्रत्ययेन लक्षणेनोक्तं वक्ष्यमाणो
115 दाहरणे आरोपपूर्वकापन्हवे व्याप्तिप्रसंगाविति तैरुक्तं· फलं क्वचिद्व्याप्तिरूपमनिष्टं फलं·
तत्र चित्रमीमांसायां· अपि सूचितदोषांतरमाहकाव्येति· पुंडरीकाक्षस्तूपमानमितिभावः प्राची
नेति प्रागुक्त ए दंडिमतेत्यर्थः इह चित्रमीमांसायां· कुत्रोतिसमासारकाव्योचवलंबनमेवोचितं न कुर्व्वां
देरिति यथा तथा सर्वसिद्धसामारमतावलंबनमेवोचितं नैकदेशिमतस्येत्यर्थः तदेवाह प्रकृतेति· ए
वः प्रत्यासन्निबोधकः अन्यलक्षणवहिर्भावोपिबोध्यः विच्छित्तिश्चमत्कृतिः· अतिरिक्तोऽपह्नुत्यन्यो
रूपकाख्यः अन्यथा तु· विच्छित्तिविशेषाभावे· ननु प्रागुक्तसर्वमतसिद्धापह्नुतिसामान्यलक्षणा ११५
नाक्रांतत्वात्तापेक्षेति भावः अस्तु तदस्याभ्यां स्तानोभिमतत्वं सूचितमतः स्वसिद्धांतरीत्या पसंहरति·

तस्मादिति॰ सर्वमेवेति दीक्षितोक्तं यथा कथं चिन्नस्सामर्थ्यं नं चेत्यर्थः अहृदयंगममिति॰ अत्रेदं चिं
त्यं दीक्षितोर्हि दक्षिणांयतः चंदनं चंद्रिका मंदो गंधवाहश्च दक्षिण इत्यद्युपक्रम्य लवदालेख्येइत्या
द्युक्तमिति तदनुसारेणैव तत्रापह्नुतिध्वनिरुदाहृतः तेन किंचिदहृदयंगमं प्रकाशविरोधोपिनः
तत्रोपमेयपदस्य पदार्थोपलक्षणत्वात॰ अन्यथा केसरस्तवलामोऽद्य इ सत्रत्ययंनप्रपलाय्य
गतास्तद्वैरिणोऽपि तु ततः पराभवं संभाव्य तान्केदारान संजातीस्य यह्नुतिर्व्यज्यत इति प्रकाशायं
था संगतिः स्यादिति बोध्यं॰ इत्यपह्नुतिः॰ उत्प्रेक्षां लक्षयति अथोत्प्रेक्षेति॰ विनिगमनाविरहा
दन्योन्याभावासंताभावघटितं लक्षणद्वयं युगपदाहृतद्भिन्नत्वेनेति॰ लोकोत्तरेति॰ राजानं प्रस्तुक्ति॰
तोदृश्येति लोकोत्तरेत्यर्थः सामग्री निश्चयरूपव्याप्तिनादिरूपानुमितिसामग्रीत्यर्थः ननु कथमे
तावतावारणमतः अहि संभावनेति इदं चेत्यादिः संभावनायां लक्षणघटकीभूतायां॰ तथा चोक्तं

११६ संभावनाऽनाहार्येतिनातिप्रसंगइतिपूर्वान्वयि·दशेतिपंचवाणेनमदनेनेत्यर्थः जगज्जयेति जगति
य जसंभावनायामित्यर्थः तद्धर्मेतितद्धर्मसंबंधेत्यर्थः ननुस्मितरूपधर्मनिमित्तकत्वमस्त्वेवात आ
116 हस्मितेति·हास्यस्यतत्सहकारित्वादितिभावः जगदितिजगतविजितरूपोयोविषयविषयिणोत
न्निष्ठत्वाभावादित्यर्थः अस्यप्रत्युदाहरणांतरमाहैतेनेति·· ग्लौश्चंद्रः गौः पृथ्वी· मृतत्वंकेशग्र
हणादिविशेषणं·पापस्यघोः पतेदित्यादिविषयविषयिसाधारणत्वाभावादितिभावः स्थाणुना
वृक्षेण·यथाक्रमेणधर्मानाह निश्चलेतिआदिना विलक्षणाकामत्वपरिग्रहः रमणीयत्वमितितत्वे
चकविप्रतिभानिर्वर्त्तितत्वमितिभावः ननुज्ञानमित्येवास्तुअतआहरूपकेति·नन्वेवमपितद्भावव
त्वेनेत्याद्यधिकमतआहात्रचेति·उक्तलक्षणवाक्येइत्यर्थः अलंकारसर्वस्वरीत्याइमांविभजतेसा
चोत्प्रेक्षेति·यत्रोत्प्रेक्षासामग्रीतिः साचरमणीयतद्धर्मसंबंधादिरूपा·सापीति·एवंचद्वादशांभेदाः ११६

संपन्ना इतिभावः ननु ज्ञानमित्येवास्तु अतः आह रूपकेति· नन्वेवमपि तद्भाववलेनेत्याद्यधिकम
त आह अत्र चेति· उक्तलक्षणवाक्ये इत्यर्थः अलंकारसर्वस्वरीत्या इमां विभजन्ते साचोत्प्रेक्षेति·
यत्रोत्प्रेक्षासामग्रीति· सा च रमणीयेतद्धर्मसंबंधादिरूपा· सापीति· एवं च द्वादश भेदाः संपन्ना
इतिभावः तत्र तासां तिसृणां मध्ये· द्रव्येति· संज्ञाशब्दाभिप्रायमिदं· एवमग्रेपि उक्तमेव विशद
यति तत्रेति· तासां स्वरूपोत्प्रेक्षाणां मध्ये इत्यर्थः हेतूत्प्रेक्षा फलोत्प्रेक्षे आह होक्तेति· ज्ञाभ्यादि
ष्वित्यर्थः एवमग्रेपि· अनलेति वह्निरित्यर्थः तनयेति हिमगिरेरित्यादिः लंबत्व प्रविष्टत्वे भुजवि
शेषणे· द्रव्ये जातौ पीति· संज्ञाशब्दवाच्यायां वा तिशब्दवाच्यायां वेत्यर्थः तेषां च· उक्तधर्माणा·
इतरयोरपि· उपात्तयोर्लंबत्व तत्प्रविष्टत्वयोरपि· तत्साधनेनेति गवेषणसाधनेनेत्यर्थः यत्नेति
अन्यथा गवेषणासंभवादिति भावः विषयिणेति विषयिहिमगिरिभुजगताभ्यामित्यर्थः ताद

११७ ज्ञातितनयमैनाकेत्यर्थः विषयेतिभागीरथीत्यर्थः विनिगमनाविरहादाहोस्वित्क्षेति प्रत्ययस्यकाउः
117 उपसंहरतियतयैवेति एवंचेत्यादिः स्वरूपोत्प्रेक्षयैवेत्यर्थः क्वचित्तथैवेतिपाठः सोप्युक्तार्थकए
व अत्रभेदानुपपादयतिअनिगीर्णेति भोगीरथ्याउपादानात्तउपान्नेति इदंचयथासंभवंबोध्यंन
तुयथासंत्वनिष्पाद्यत्वेहेतुमाह हिमेति एवंचैकदेशास्यासिद्धत्वेपिविशिष्टस्यनिष्पाद्यत्वंस्पष्ट
मेवेतिभावः अंभोजिनीतिसूर्यकन्यायांयमुनायामित्यर्थः समन्ततः सघः रूपांतरेतिनीलादीत्यर्थः ऐका
धिकरण्यापत्तेइतिसमुदायापत्तेरित्यर्थः तत्रतयोर्मध्ये तत्सिद्धये शुक्लगुणगतत्वसिद्धयेतेषां
उक्तधर्माणांविषयीतिशुक्लगुणेत्यर्थः यथाकथंचिदितिँ नन्वेवंहेतूत्प्रेक्षैवेयंकुतोनातआह प्रवर्ही
ति हतभरीति यो निमज्जतिसब्दादंकरोतीतिलौकिकं वादिनामित्यस्यधर्मउत्प्रेक्ष्यतेइत्यत्रान्व ११७
यः ज्ञानजत्वर्थमाह केमितितदभिन्नत्वेनोत्प्रेक्षितेत्यर्थः तत्तत्तत्समत्काराभावादाहानुवाद्येति उत्प्रे

क्ष्यतेवकेष्वितिशेषः नन्वेवमपिसाधारणधर्माभावात्कथंप्रधानोत्प्रेक्षानिर्वाहोऽतआहतत्रेति·
तस्मिन्सतीत्यर्थः मूलोत्प्रेक्षेति· मूलोत्प्रेक्षायाविषयीयः शशिकिशोरइत्याद्यर्थः क्रियोत्प्रेक्षोपपा
दकत्वात्तस्याः मूलोत्प्रेक्षोत्व· सिद्धेरितिवकानामित्यादिः मुख्योऽत्प्रेक्षेतिक्रियोत्प्रेक्षेत्यर्थः प्रकारां
तरेणापिसाधारण्येधर्मस्याह क्रोडानेति· माण शशिकिशोराभायानुकूलक्रोडेति· माणाभिन्न
शशिकिशोराभिन्नाः क्रोडानक्रियानुकूलेतिप्रयुक्तः पाठः एवंनैयायिकमतेनबोधमुक्त्वावैयाक
रणमतेनाहाख्यातइति· ननुअभेदेनवकेतदुत्प्रेक्षाबाधितात आहतत्रेति· उत्प्रेक्ष्यमाण क्रोडान
क्रियायामित्यर्थः इत्थंबोधे· विष्पन्नेवा· अध्यवसानेति· अध्यवसानंचमंचाक्रोडेतीत्यादिवद्वि
षयिवाचकशब्देनेतिबोध्यंताहृशेतिविशेषणद्वयविशिष्टेत्यर्थः एवमग्रेपि· ताहृशेतिएकविशेष
णविशिष्टेत्यर्थः क्रियायांक्रोडान इत्यादिः एवंच· एवंसति· एवंचताहृशशशिकिशोराभिन्नताहृशा

११८ 118 वकाभिन्नकर्तृकं क्रोशनमितिबोधः अस्याउदाहरणांतरमाहतथेति· शंवरेतिमदनस्येत्यर्थः प्रा
ग्वदृशापिमतभेदमाहात्म्यापीति· तादृक्षेति सुधाकरणकजगन्मेध्यकर्मकेत्यर्थः· द्रेतितदभिन्ने
त्यर्थः करणकेतिजगन्मध्यकर्मकेत्यपिबोध्यं· विषयस्यचंद्रस्य· तस्यैवधावलीकारकत्वस्यैव· वि
षयस्य किरणव्यापनस्य निगीर्णत्वि सुधाभिलिंपतीत्यनेनेतिभावः कलिंदेतितदाख्यपर्वतादि
त्यर्थः इयं दृश्यागर्भरूपा· आप्रयागं प्रयागमभिव्याप्य· असांपारिस्वायां इदं दृश्यं यमुनारूपं· न
नु प्रागवतृजातुस्वक्षेपं कुतोनात आहाकारेति इदं वनंजूषायां मतंस्पष्टं· नेन्वाकाशस्यशब्दा
श्रयत्वादिरूपमितिकुतः स्वरूपात्मकमतआहातरवति· तस्य स्वरूपात्मकत्वादेवेत्यर्थः आ
दिनाशब्दसमवायिकारणत्वपरिग्रहः विषयिणि आकाशे· तृतीयेति· तलस्पर्शे सतिप्रतिवि ११८
वासंभवइतिभावः स्निग्धेत्यर्थेचेति· आकाशएवेति शेषः गर्तोपरितनांकाशस्ततदीर्घत्वारोपा

पादिति भावः वा दुर्जानां क्षत्रियाणां जामदग्न्यः परशुरामः नातीति क्षत्रियत्वेत्यर्थः विरोधित्वे
ति जातस्यवच्छिन्नेत्यादिः अभावो ऽसंताभावः अभावपदत्यागेनाह विनेति क्रियाभावोत्प्रेक्षोदा
हरणमाह द्यौरिति कज्जलवत्तस्यामममेघपंक्तिभिस्तया आच्छादितोपयर्थः भिरिति नेत्रशून्य
जनसमूहस्य दृष्टिरवेत्यर्थः निमिन्नेनेति अनुपात्तेनेति भावः पार्यतिकरति यद्यपि सर्गमिति
नपुंसकोक्त्यात कं जगदंतरमिवेतज्जगदिति सर्वबोधस्तथापि ताहृशजगदंतराप्रसिध्या अभा
वोत्प्रेक्षाबाधायत्स्यात्वं ऽत्रैव धर्मिणि जगति लोचनवर्गस्य सर्गो दानं संसर्गः प्रसरणं वा यत्र दर्शी
नेतदभावो निरवोध्यत इति दर्शनक्रियाभावरूपो धर्म उत्प्रेक्ष्यते पश्चादित्यर्थस्तदाह क्रियाभावो
धर्म इति एषा उत्प्रेक्षा कोपि गोभुजहृदयः क्ष्मां भूमिं घ्ययारोपेणेति पाठः आरोपेणेति तदर्थः
अपियुक्तपाठे तु एवार्थः स आरोपणो ऽस्य ग्रे योज्यः नन्रूपमेवात्रास्ति त्वारोपकेनेन चेति सा

११९ धेति· उक्तरीत्येतिभावः तस्या उपमायाः ननूपात्तधर्माभावे प्रतीयमानादर्शेऽतआहहासुंदेति· वि
119 च्छित्स्यजनकत्वादित्यर्थः उक्तधर्मस्येतिभावः उक्तमेवविशदयति· एवमिति· राजसहत्वस्य द्वि
तीयस्यसत्वाद्भ्रान्तिस्यारोपितंकं द्वितीयत्वमित्यान्नयेनाह चंद्रादीति· ननूत्क्षेपितदुक्तिवैयर्थ्य
मतआहभेदेति· वासवादीत्यादिः· करेणक्रिमेन· तेवतेने· वासवादिना· अस्यराज्ञः उभया
भावस्यैकस्मिन्नपिसत्त्वादाहैकतरेति· उपसंहरतिएवमिति· त्वदिति राजानंप्रतिकवेरुक्तिः
उत्प्रेक्षितस्य· कज्जलस्य· हेतुत्वेनेति· नूतनीकरणे इतिभावः हेतूत्प्रेक्षेति· नीलिम्नः प्रतिदि
नोपचीयमानत्वंनिमित्तं· अंचतिगच्छति· अपरार्धे इतिअत्रराधेरूपस्यार्थः क्वचित्तथैवपाठः आ
र्थत्वेहेतुगर्भविशेषणमाह धर्मातिमध्येत्यर्थः गुणाभावस्य· मर्षणाभावस्यभोक्तृत्वेत्वत्रका ११९
लसामान्यप्रतीतेविशेषोदाहरणमाहभुंजानोवेतिनैयायिकोक्तगुणस्यैवग्रहणमितिभ्रम

निरासायउदाहरणांतरमाहयथावेति·उदयदि·उदयंती आविर्भवंती बालज्ज्ञातस्याः संबं
धात्आधिक्याद्वेत्यर्थः भूमिमभिव्याप्यनम्राः कंचरोरुगारवयेवांतानिवृक्षाणां समूहरूपा
णीत्यग्रिमार्थः अत्रापिलज्जारूपगुणसाहित्यत्वंस्पष्टमेव·वेल्लुनातत्तत्संबंधात·अत्रवेल्लु
नेक्रियेतिस्पष्टमेवज्ञामल्लिता·संजातदयामा·वराकाः कृपणाः पंचेंद्रं·लसदमृतमिति·मि
लदमृतमितिपाठांतेसंभवभुजांदेवानां·अतुष्मिन्सरसि· इयंद्युतिर्नैल्यरूपा·मिषतांपश्य
तां·उपरिवर्त्तमानादितिशेषः निरपायादनश्वरात·नीलत्वेनेति·द्युतिरित्यनेनेतिभावः एषामि
बज्ञात्यादीनामेवं·करुणोऽस्मिन्तेइतिसकरुकरुणः आहितात्म्यादित्वान्निष्ठांतस्यपरनिपा
तः इदंजात्यवच्छिन्नाभावाहेतुत्वोत्प्रेक्षोदाहरणं·गुणाभावहेतुत्वोत्प्रेक्षोदाहरणमाहानिःसी
येति·गुणेति आनंदरूपेत्यर्थः हेतुत्वेनोत्प्रेक्षितेतिशेषः एवमग्रेपि। क्रियाभावहेतुत्वोत्प्रेक्षोदा

तव१

१२० हरणमाहजनेति· हेकुरंगांगि आलि इह हे चिकुरमुखचंद्रकांती नामसंबंधादिवेदंहत्त्वंपंकेरुहास

120 मूहरूपं चिकुरवदाकारो यस्य ताहत्त्वंजनमोहकरनिविडांधकारकमन्ये इत्यर्थः यदाचार्येनोदा

हृतं तमाहहहेति प्रचारस्य क्रियात्वादितिभावः तुरुष्कवैलक्षण्यमेतेनप्रासंगिकत्वमस्य सूचि

तं अतएव व्युत्क्रमेणोक्तिः अंधकारोऽतिरिक्तः पदार्थ इतिमतेनाहजात्यवच्छिन्नेति· तेजोभाव

एवसइतिमतेनाहजात्यवच्छिन्नाभावेतिक्वचिद्वैपरीत्येनपाठः द्रव्याभावहेतुत्वात्प्रेक्षोदाहर

णमाहनेनगाइति· नगाः पर्वताः दरयश्चभूत्त्याश्चसुदत्त्यश्च· अथान्नेषामेवदह्यंतासइत्यर्थः

त्वदारंभूपसुदतीष्विति पाठांतरं· कर्णशष्कुल्यवच्छिन्ननभसःश्रोत्रत्वादाहविवेकेइतिभावः

स्यात्यक्तात्वाद्द्रव्याभावस्येति· तस्यतत्वेनोत्प्रेक्षणेनिमित्तमाहनिमित्तमिति· क्रियेतिशाकली १२०

भवनरूपेत्यर्थः उपसंहरतिएवमितिउक्तप्रकारेणेत्यर्थः दिगितिउपदर्शितेतिशेषः अथयत्र

मप्राप्तांफलेत्युपेक्षामाहाथेति· तत्रादौजातिफलोपेक्षामाहदिवेति· कंठदघ्नेकंठप्रमाणे· अ
वयवेतिस्तनेत्यर्थः सएवेति· जातिरूपतल र्थएवेत्यर्थः अफलत्वादिति तस्यानित्यत्वादिति भा
वः क्रियायाः प्राप्तेः संसर्गतयेतितथाचलक्षणानेतिभावः अन्यथायथाकथंचितफलत्वा
नंगीकारे· उक्तार्थंद्रढयति अतएवेति· वियोगेति अत्रस्तुस्वरूपगुणस्यफलत्वेनोपेक्षणंस्प
ष्टमेव· हालेतिविषमालनेत्रसर्पाणांसंगतिमित्यर्थः तदीयांविषादीयां· प्राचांअलंकारसर्व
स्वकारादीनां· मेवेतीसत्यंवाध्यमितिशेषः एवंवाच्याप्रपंचमुक्त्वाप्रतीयमानामाहप्रागाति·
एवंधर्मिस्वरूपोपेक्षात्मुक्त्वाधर्मस्वरूपोपेक्षामाहधर्मेति· सरसिरुहसूनोः ब्राह्मणः इहजा
गति· कलाहीनंक्षीणकलं· विकलइवेत्यंशेउपमा· पूर्वार्धोत्प्रेक्षितेतिप्रस्तस्वरूपेधर्मिणी
तिभावः उपात्तमिति· अकस्मादित्यनोतेतिभावः मितिज्ञांशेप्रागनुक्तंविशेषमाहस्यांचेतिउ

त्प्रेक्षत्वावच्छिन्नायामित्यर्थः स्वरूपस्य धर्मिस्वरूपस्य धर्मस्वरूपस्य वा· भावादिभिरिति आदिना
अनुगामित्वादिपरिग्रहः एवं च चतुर्विध इत्यर्थ स्तदाहमिन्न इति· अपिः स्वाभाविकस्यामुच्चाय
कः अत्र च· उत्प्रेक्षाविषये· अर्वाचामधुनिकानां दर्शनं मतं· तत्र तयोर्मध्ये· विषये इति एतौ च ध
र्मस्वरूपो धर्मिस्वरूपो वेति भावः तावदादौ· असांप्रदायं त्वां न्धर्मस्वरूपोत्प्रेक्षायामपि तत्वेना
भिमतायामपि धर्मांतरे· दर्शनादिरूपेण न्वेवं कथं विषयस्यानुपादानमत आहोत्प्रेक्षेति· एवं ध
र्मिस्वरूपोत्प्रेक्षायां तत्वमुक्त्वा धर्मस्वरूपेत्प्रेक्षायामप्युपपादयति एवं मितिकस्यापथ्ये इत्यनेन न
स्वीयत्वं निरस्तं· वैयाकरणरीत्या आह तस्येति अथ मांतार्थकर्तुरित्यर्थः तथा च पदार्थः पदार्थेन
ति न्यायप्रसर इति भावः एवमग्रेपि· अभेदेनेति प्रथमांतार्थे उत्प्रेक्षणे मित्यास्यानुषंगः यद्यपि पूर्व
युक्त्या चारणं संभवति तथा सुक्तं नरमाहतस्येति· लेपनादिकर्तुरित्यर्थः वर्षणं चेत्यस्योत्प्रेक्ष्यत इति 

त्रोषः ननु कुत्रस्य ऽ त आहोस्विदेस्येति · अत एव निगीर्णत्वादनुपादानदेव · एवमादौ इत्याद्युदाहरणे ·
अत्र संमतिं प्रकाशकृत आहात एवेति · हेवंमिति · उन्मेषमितिविकसनमित्यर्थः नायिकाप्रतिनायको
प्र क्तिः पश्चैंद्रः मम पश्चैस्य · हेतुत्प्रेक्षायामपि तत्त्वेनाभिमतायामपि · इदं च तादात्म्यं परमते तथावश्यकमित्या
ह कार्यस्येति लक्ष्मीरूपविषये हर्षरूपे हेतुमात्रोत्प्रेक्षायां कार्यमेव निमित्तं वाच्यं तस्य तत्त्वसिद्धिरुभय
साधारण्यं विना अनुपपन्नेति अभेदाध्यवसानमावश्यकमिति भावः समानजातीयेन साहजिकलगने
न तद्व्यतिरेकमुखेनोपपादयति अन्यथेति · हेतुरूपेति हर्षरूपेत्यादिः धर्मस्य कार्यरूपस्येति · वास्त
व हर्षाधिकरणचेतनवृत्तित्वात्कार्यस्य लगनादेः पद्मलक्ष्म्यामवृत्तेरिति भावः · फलोत्प्रेक्षायां तत्त्वमा
हेवमिति · चोलस्येति · वास्तवहर्षाधिकरणचेतनवृत्तित्वात्कार्यस्य लगनादेः पद्मलक्ष्म्यामवृत्तेरिति
भावः · · फलोत्प्रेक्षायां तत्त्वमाहैवमिति · चोलस्येति चोरस्येत्यर्थः वनांताः वनप्रदेशाः अनुभविष्य

१२२ तीतिपलायितचोरइतिभावः अक्षराणिभालस्थानि॰ फलोत्संक्षायांतत्त्रेमाहैवमिति॰ चोलसे
122 तिचोरस्योऽस्यर्थः वर्नांता: नाभिमतायां॰ निपाटनेतितस्यतत्कर्तृकत्वादितिभावः दर्शनातस्वर
सतयाप्रतीतेः प्रागुक्तंतदीयप्रकारिंखंडयतिनचेतिननुलक्षणानुरोधेनतथोच्यतेऽत आह
लक्षणेति॰ नन्वेवमपिलिंपतीवेत्यादौनान्यथानिर्वाह इतिप्रागुक्तमतआह लिंपतीवेति
फलेमात्रस्यधात्वर्थत्वादाहानुकूलव्यापारेतियतइत्यादिः अन्यथाकृतौ येवोक्तंस्यात्॰ ए
वेनधर्मिव्यवच्छेदः आख्यातेतितिङित्यर्थः प्रथमांतेतदर्थेनन्वेवंयास्कोक्तिविरोधोऽत आहभा
वेति॰ नाम्नः प्रातिपदिकस्यद्रव्यमात्रार्थत्वेनतत्प्राधान्यमुक्तमनुपपन्नमर्थद्वयसत्त्वेएवंत
थोक्तेदोषिचित्यादित्यादतस्तत्रार्थांतरभावरूपकमित्याशयेनाहसत्त्वेति॰ ननुधातोर्व्यापारवाच १२२
कत्वसकर्मकत्वाकर्मकेत्वविभागोच्छेदापत्तिरतआहफलेति॰ व्यापारस्योभयत्रान्वयः अर्थ

गताभ्यामितिधात्वर्थफलगताभ्यामित्यर्थः ननु आख्याते तथान्वयस्वीकारे पाको देवदत्त इत्याद्यपि त
थान्वयेन स्यादत आह नामार्थेति· चस्त्वर्थे· आश्रयतासंसर्गेणेति भावः ननु कर्त्तरि कृदित्यतः कर्त्त
रीति लः कर्मणीत्यत्रानुवर्त्तते तत्र तस्यानुकूलव्यापारार्थकत्वे कृद्विधायकेऽपि तथैव स्यात्तथा च
को देवदत्त इत्यादौ सामानाधिकरण्यनिर्वाहस्तु लक्षणयेत्याशंकापनोदायाह तत एवेति· तथा स
ति भावे इति पदं घञ् आदिविधायकस्य व्यर्थं स्यात् अधिकारसूत्रस्य कर्त्तरीत्यनेनैव सिद्धेरिति भा
वः नन्वेवं लकारविधायकेऽपि तदर्थकत्वापत्तिरत आह शब्दानुवृत्तीति· वस्त्वर्थः शब्दाधिकारस्वीका
रजगौरवादाह यद्वेति· तिङर्थस्य· कर्त्तुः अभेदेनेति सामान्यविशेषयोरभेदान्वयादिति भावः भंगा
पत्तेरिति· एकपदोपस्थाप्ययोस्तत्त्वे एकप्रसरताभंगापत्तेरिति भावः युक्त्यंतरमाह सत्याहीविवि
शेयणमिति· प्रकृतिप्रत्यययोः सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यमिति व्युत्पत्तेरिति भावः प्रा

१२३ एवदत्रापि मते निरुक्तविरोधं प्रकारान्तरेण परिहरन्निभावेति · पूर्वमाख्यातपदेन तिङ् गृहीतः इदानीं
123 धातुरिति विशेषः ननु वैयाकरणमतरीत्या तथा प्रायुक्तमिति तद्विरोधोऽत आह नचेति · पूर्वमते
नाहमेदेनेति · द्वितीयमते नाहाभेदेनेति · क्रमेणैव वृद्धयव्यवच्छेद्यमाह नत्विति · इमर्थस्य विधे
यतायाइति · विषयनिष्ठोद्देश्यतानिरूपितनिवार्थसंभावनाविषयस्य विषयिणो लेपनादेः प्रती
यमानं यद्विधेयत्वं तस्य भंगापत्तेरित्यर्थः विषयस्य विषयिवाचकेन तव मते निगीर्णत्वादिति
भावः ननु निगीर्णमेव स्वरहीत्यात तदभंगोऽत आह तमइति · अनुवादपुरः सरं दोषान्तरमाह य
द्वेति विषयीति विषयिणा तमभ्यं वंधिनेत्यर्थः एवं विषयसंवंधिनेइत्यपि व्याख्येयं · स्वेति
लेपनेत्यर्थः रूपकेपीति प्रसिद्धरूपके मुखं चंद्र इत्यादावपि इत्यर्थः विषयीनुपादानेनेति १२३
भावः मूलत्वचल्लोकानिति · इत्यादौ तन्मूलत्वं चोच्यतामित्यर्थः अत्र हेतुमाह खल्वेति · उ

पसंहरतितस्मादिति· हेतूत्प्रेक्षायामाहैवमिति· तत्र· तस्यानुत्प्रेक्षायां· संबंधेऽशोभासंबंधे· लगनमि
हर्षहेतुकलगनमित्यर्थः उदाहरणांतरमाह तथेति· सैषेति लंकातअयोध्यागमनावसरे सीतांप्रति
श्रीरामचंद्रोक्तिः अष्टमितिपतितमित्यर्थः तवेति शोषः मोनंद्विविधं निश्चलत्वहेतुकंदुःखहेतुकं
चतयोरभेदमाह तत्रेति· निःशब्दत्वाध्यवसितमिति· निःशब्दत्वेनातादात्म्येनाध्यवसितमित्यर्थः
तस्योभयनिष्ठत्वमाह विश्लेषेति· मन्वाकांक्षादिनातत्रैवान्वयोऽस्यतेआह विषेति· ननुनिगीर्ण
मादायैवतदतः आह निमित्तांतरेति· उत्प्रेक्षेतीत्यस्यपदद्वक्तमित्यत्रान्वयः इविडेति द्राविडेति
द्रविडश्चैषेनोप्पदीक्षितेनेत्यर्थः अर्वाचांमतमाहालंकारेति· तत्रतयोर्मध्ये एवमग्रेपिपि· तत्र·
दुःखरूपगुणोत्प्रेक्षायां अध्यवसायइति निःशब्दत्वाभेदेत्यादिः अध्यवसायोपीति· सिद्धत्वा
दित्याद्यहेतीत्यंतानुषंगः प्राग्वदाह तस्यापीति· रवुमेयातथोक्तमपिनेदंरवंडितमित्युपलक्ष

१२४ 124 णत्वेनोत्प्रेक्षम आह व्यापनात्विति· इदमन्यत्रापिद्रष्टमित्याह भिन्नत्वं चेति लक्षणाभेद इति· साध्यवसानासा
रोपाचेति भेदकरणादिति भावः अत्र· उत्प्रेक्षायाः पारीक्षेति विचार इत्यर्थः उत्प्रेक्ष्यतावच्छेदकसंबंधेनेति
स च प्रयोज्यत्वादिः आदिनानिः शब्दत्वपरिग्रहः तृतीयार्थेपीति· हेताविति शेषः प्राग्वत्· प्रागुक्त
प्रथमपक्षवत्· तच्च फलं च· तथाभूते च· विषयतावच्छेदकधर्माभिन्नत्वेनाध्यवसिते च· तद्धिशेष
ति विषयतावच्छेदकधर्म इत्यर्थः समासेति· समासप्रत्ययाभ्यां गुणीभूत इत्यर्थः यथा कथं त्विद्धे
तु फलयोरिति· स्वर्गी ध्वस्त इत्यदाविवनीलरूपवान् जात इत्यादावपि चेति भावः तस्य· तयोरुद्देश्य
विधेयभावप्रत्ययस्य· ननु तल्लोटि प्रविष्टत्वेपि तस्य मतत्र साक्षाद्विशेषणत्वमत आह उत्प्रेक्ष्य इति·
यस्य विषयिण इति पाठः तस्याः नपुरगतदुःखोत्प्रेक्षायाः स्पर्थोत्प्रेक्षयेति· व्यपदेशाद् इत्यस्यानु १२४
षंगः एवमग्रेपि· प्रागुक्तदेवेति अंगत्वेनानुवाद्यत्वादित्यस्मादेवेत्यर्थः द्विविधा हीति· द्वियतः स्वत

एवेत्यादिद्वैविध्यंप्राप्तोऽनस्त्यावद्दर्मोपिद्विविधइत्यर्थः इं दिराग्नमराः इंद्विरांक्षोभाः प्रथमइ
तिनयनेंदिंदिरानंदमंदिरत्वरूपइत्सर्थः द्वितीयश्चेतिमिलिंदिंदिरत्वरूपइत्यर्थः सायेनेतिविषये
साधत्तुयज्यते· अयं· केवलशोव्दात्मा अयमिति प्रागुक्तोर्थमयइत्यर्थः नन्वेवंतस्यसाधारणत्व
करणंव्यर्थमतआहसाधारणीति· निरासार्थमिति· इवशब्दस्यसंभावनार्थकत्वायचेत्वापि
बोध्यं· श्लेषोदाहरणमाहदृष्टिरितिराजानंप्रतिकव्युक्तिः मंगलपदेनभूमिजः शुभेचबुधः पंडि
तस्सौम्यश्च· काव्ये· पद्ये शुक्रश्च· अरुणः सूर्यः आरुणंमच· शनिरक्षानिश्चधिषणोगुरुर्धिषणा
बुद्धिश्च· सोमास्पदमिति· उमयासहितः सोमोश्चंद्रश्च· यद्वा चंद्रमा मनसोजातइतिश्रुतेर्जनक
तासंबंधेनमनसिसोमास्पदत्वमुत्प्रेक्ष्यते· तेनचेश्वरत्वमपिव्यंग्यमित्याहुः पूर्वमुपात्तोदाह
णेपश्चादनुपात्तोदाहरणमित्यत्रविशेषः उत्प्रेक्ष्येति विषयिणइतिशेषः कल्याणितिकल्याणा

१२५ श्रितांगकत्वादिष्वित्यर्थः श्लेषस्यैवोदाहरणांतरमाह यथावेति· अलकः अलकाच· श्रवणाः कर्णाः वै
125 श्रवणः कुवेरस्य· राजकन्यां प्रति कस्युक्तिरियं· प्रागेवोदाहृ यथावेति· राजानं प्रस्तुक्तिरियं· नासत्यौ
नकुलसहदेवौ असत्याभावश्च· अर्जुनः किरीटी श्वेतं च· धर्मो युधिष्ठिरो विध्यर्थश्च· जगदितिवायु
पुत्रो भीमो हेतूमांश्च यद्वा पंचम्यर्थवहुव्रीहिणा वायुजनकः परमेश्वरः राजवंशावदेति विषयिणोवर्ण
नीयराजवंशं वदाये राजानस्तत्ता दात्म्येत्यर्थः विषयाणां पांडुपुत्राणां तदाश्रितानां चेति राज्ञाश्रि
तानां चेत्यर्थः विषयेति पांडुपुत्रेत्यर्थः अपह्नवोदाहरणमाहस्तनेति· स्तनमध्यगतमाणिक्य
स्वरूपेण वहिरागतमित्यर्थः नायिकाप्रतिसख्युक्तिः विंवप्रतिविंवोदाहरणेमाह विवेति उपचारो
दाहरणमाहस्तनेति· स्तनमध्यगतमाणिक्यमाधुर्येति· राज्ञानं प्रस्तुक्तिः यामाधुर्यस्य परमसीमाधा १२५
रभूतामास्वतरूपसमुद्रमथनजातां वहुसुखदां सुधारूपकविंतां ननु निश्चयेन पिवेत्यर्थः उपचा

रेण· लक्षणया मुख्याभ्यामिति· भुवि सह अभेदसंपादनद्वारा तयोर्धर्मयोरिति शेषः ननु उपचारे ऽमुख्यस्यैव प्रतीत्या मुख्याप्रतीत्या दोषस्तदेवस्य एवातु आह लक्षणयेति· मात्रपदेन पौनरुक्त्यं परिहृतं· पूर्वरूपकमित्र उक्त इतिभावः साधारण्य सत्वेप्याह्लादसुंदरेति· उपपुज्यते इति एवं च तदानर्थक्यं नेति भावः तत्राथोदाहरणमाह यथेति· तयाविधोत्प्रेक्षितिजगतो निर्लोचने वर्गस्वर्गलोकत्र इत्यर्थः अयं विषयः जगदंतरं जगन्मध्यं राजा चंद्र इ विषया पङ्कवश्चात्र राजता दात्म्यां संभावना दात्म्यायेति बोध्यं· [illegible] अथातिशयोक्तिं निरूपयति अथेति योगरूढं तदित्याह विषयीति· निगरणं पदार्थमाह तच्च स्ववाचकपदेनेति· लक्ष्यतावच्छेदकं च मुख्यत्त्वमेवेति भागेव निरूपितं मूले· ननु रूपकादभेदस्तत्राह तत्रेति· अतिशयोक्तावित्यर्थः एतावानेव विशेष इति भावः अनंतरं च लक्ष्यार्थबोधोत्तरं च· व्यापारेति व्यंजनयेत्यर्थः एतानि मता

१२६ निपूर्वं निरूपितानि· ननु बाधज्ञानसत्त्वात्कथं व्यंजनया तथा बोधो ऽत आह बाधज्ञाने ति· एवं चाहा
126 र्याभेदबुद्धिः बाधककालिकस्यैवाहार्यत्वादिति भावः श्रीचरणकमले मनं भ्रमतीत्यादावाङ्को
दकत्वादिकं लक्ष्यतावच्छेदकं तेन रूपेण प्रथमतो बोधे तद्धर्मावच्छिन्ने कमलाभेदप्रत्ययो व्यंजनया
ऽनाहार्यः तद्धर्मावच्छिन्नकमलाभेदबाधबुद्धेरभावात् अत एव गौणसाध्यवसानापां सर्वथैवा
भेदावगम इति प्रकाशकृतः रूपके त्वाहार्य एव· अयमेव रूपकादस्या विशेष इत्याहुः वनांतरं वन
मध्यं· गतागतेति गमनागमनक्लेशे इत्यर्थः तदनुग्रहार्थं· तेन तन्निगरणानुग्रहार्थे· दर्शनि इति· तद
र्थं तयोस्तत्वेन साक्षादुपात्तमिति शेषः तैः प्रथमं तार्थविशेष्यकबोधांगीकारादिति भावः करणा
नो विति दर्शने इत्यनुषज्यते· तथा तदर्थं तयोस्तत्वेन साक्षात्तथा अनुपात्तं· उच्चेति· हीनोत्तम १२६
यो निजन्मेत्यर्थः तस्मिन्नेवानुग्राहकमयेति· भगवतो निगरणे तदावेदनकमत्र तद्धरणकर्त्त

त्वस्वरूपे साधारणधर्मौ साधारणत्वसंपादनमेवानुग्राहिकत्वं इति भावः यत्र च यत्र तु रूपकं ततोऽभेदां
तरमाहनामार्थेति· एवेन विषयिव्यावृत्तिः विषयीति तमोलत्वादेरित्यर्थः भेदाभावरूपतयेति· आ
स्यपूर्णेन्दुर्शांकतेत्यादौ अन्योन्याभावस्य प्रतियोगितावच्छेदकधर्मरूपतायाः सर्वतंत्रसिद्धत्वादि
ति भावः स्वेति· विषयमात्रवृत्तिधर्मेत्यर्थः धर्मशून्यत्वमप्रामितिः धर्मद्वयशून्यत्वं चन्द्रशांकतेत्यादौ
अन्योन्याभावस्य प्रतियोगितविच्छेदकधर्मरूपतायाः सर्वतंत्रसिद्धत्वादिति भावः च सामानाधि
करण्यसंबंधावच्छिन्नप्रतियोगिताकं· नवीनो जलधरः सत्त्व च भगवद्धृत्रिलोकोन्नरत्वेतत्समा
नाधिकरणनवसुधाकरणकव्याप्तिकन्नत्वेजलधरत्वेन समानाधिकरणे· सामानाधिकरण्यसं
बंधेन तदुभयविशिष्टजलधरत्वं कविकल्पितं· क्वचिदप्रसिद्धमपीति सामानाधिकरण्यसंबं
धेन माहेन्द्रो धर्मद्वयविशिष्टतयाऽप्रसिद्धमपी। पर्थः अपूर्वश्चंद्रस्त्यादावपवेवं· मुखमपूर्वश्चंद्र

इत्यादौकविकल्पितविशिष्टचंद्रेणाहार्याभेदप्रतीतेरूपकं·केचित्तुकविकल्पितत्वात्तत्राचंद्रत्वस्य
मुखत्वेनविरोधाभावादनाहार्यैवविषयितावच्छेदकप्रकारकधीः·रूपकलक्षणेचाहार्यत्वंनदेयं
अतिशयोक्तिरनाहार्यैवरूपकेत्वाहार्याअनाहार्याचधीरित्याहुः·अन्येतुप्रस्तुतस्यपदन्यत्व
मित्यतिशयोक्तिरेषुप्रकृतस्यविविक्तोकारवस्त्वंतरत्वेनान्यवस्तुत्वेनवाऽध्यवसानमितित
दर्थः·अस्तिहिप्रकृतस्यमुखस्यस्यचंद्रत्वेनाध्यवसानं·आहार्यत्वाभावाच्चनरूपकमित्याहुः
विषयधर्मेति·लोकोत्तरत्वेत्यर्थः·सामानाधिकरण्यसंबंधेनतद्वैशिष्ट्यंबोध्यं·एवंचेत्यस्यनि
रस्तमित्यत्रान्वयः·विधानांप्रकाराणां·अतिदेशेनेति·अन्यत्रान्यशब्दप्रयोगइति·पापादिति
भावः·अत्रापिअतिशयोक्तावपि·तन्निरस्तमित्यत्रेदंचिंत्यंकाव्यप्रकाशादेरीत्यातदुक्तेः·
निर्बाधकत्वात्·किंचत्वयापिभेदप्रधानातिशयोक्तिरितिप्राचीनव्यवहारसंगमनायविषयि

तावच्छेदकमेवाभिन्नइत्यवश्यंवक्तव्यं·एवंचतथैवभेदातिशयोक्तिरितिव्यवहारोमयापिसमुपपादः·को
यंगलितहरिणइत्यादौप्रसिद्धविषयितावच्छेदकप्रकारकबोधस्यबाधबुद्धिपराहतत्वात्कोयमि
त्यनेनतिरस्कृतत्वाच्चावश्यंचंद्रकार्यकारित्वप्रकारकबोधोऽंगीकार्यः·एषैवचताद्रूप्यातिशयोक्तिः
अत्रापिविषयितावच्छेदकप्रकारकधीराहार्यैव·तद्धर्मविशिष्टत्वस्यसंबंधस्याहार्योपितथैवतद्धर्मवै
शिष्ट्यमपिलक्ष्यस्यारोपितमेवेतीतिबोध्यं·अस्याविशेषवशति·आहार्यत्वानाहार्यत्वकृतोविशे
षइत्यर्थः·उत्प्रेक्षातोत्रवैलक्षण्यमाहीध्यवेति·इदमिति·यतेइत्यादिः·अतएव·सर्वथाविषयानुपा
दानेऽस्याअंगीकारादेव·एवमितिउक्तप्रकारेणेत्यर्थः·निरूपितइतिशेषः·इदमेव·प्रकारांतरमेव·
उक्तमितिप्रकारान्तरकृतेतिशेषः·अन्याजगदिति·विद्वद्वर्णनमिदंकृतिश्चेष्टाआर्यहृद्याआकृ
तिःशारीरावयवसंस्थाचलोकोत्तरेत्यर्थः·चरित्रंव्यवहारः·मध्येजठरमितिपारेमध्येषष्ठ्यावेतिसमा

सः पदीयामितिव्रक्तनवर्णनीयराजकीयामित्यर्थः नभस्वदितिनभस्वतावायुनाआत्मानंविभ्रातियेस
र्पास्तेषांवंशस्यकुलस्यनेतानायकः शेषइत्यर्थः अत्रतदीकर्णनसमीहासंबंधेपितदुक्तिस्तैर्दुव्या
तिशायिकाः चंद्रिरेतिचंद्रैरित्यर्थः मिलंति· एकत्रतिष्ठंति· तदाननंतस्याः वेण्यायानायिकायामुखं· क
लया· नतुसर्वांशेन· पूर्वत्रपूर्वयोः इह त्वितिपदीयस्य संभावनाबोधकत्वादितिभावः यथेति· पीयूष
ममृतमेवपूषोमंडविशेषस्तनेषन्न्यूनो· तेवर्णनीयस्यराज्ञः समुच्छलनेतिविस्फुलिंगानामित्यादिः
सहोस्सत्तिरितिश्रुतप्रत्ययेनैभावः शात्रासमुच्छलनेतिपाठेतुतत्रः प्रागत्रेतिशेषः वस्तुतः समुच्छल
नंतत्रैहेतुरितिबोध्यं· पुरइतिराज्ञवर्णनमिदंहेभस्वल्लपुरः पुरस्तात्पूर्वंपूर्वशत्रूरूपाणांराज्ञां
भस्मरूपाः शेषाअवशेषाभवंति· पश्चात्तत्वभ्रूकुट्यवविटंकंकपोतपालिकातस्मात्क्रोधरूपा
न्नेर्विस्फुलिंगाः स्फुरंतीत्यर्थः अत्रभेदद्वयेबाधितत्त्वंपरिहरतिअत्रेति· स्वभावोक्तौसर्वथातदस

त्वादाह स्वभावोक्तीति अन्यत्रापि क्वचिदसत्त्वादाह प्रायश इति· सत्त्वादिति तथा च तेषामप्यतिव्या
योक्तित्वोपपत्तेरिति भेदेन तत्कथनासंगत्यापत्तिरिति भावः ननु तर्हि तत्र कोऽलंकारः तत्राह नहीति· अप्यु
पेक्ष्याप्याह कार्येति· तेनैव· प्राचीनोक्तोक्तभेदद्वये नैवं अभेदस्येत्यादिषष्ठ्यन्तानां वक्ष्यमाणनिगरणेऽ
न्वयः विपर्यये च· विपर्यय इति भेदद्वये च· तेनैव· कार्यकारणपौर्वापर्यविपर्ययेणैव· न तु नन्यत्वादिभि
रिति· तथा च तेन रूपेण कदापि विरोधाभावेन तद्रूपस्याभेदस्य भेदेन तत्तदुक्तेनिगरणमसंगतमिति भावः
तेषामनुगतत्वादिति निगीर्यप्रकृतस्य समेनाध्यवसानं भेदेनाभेदस्य संबंधेनासंबंधस्येत्यादि सकल
साधारणस्यैकस्य धर्मस्याभावादतिव्याप्त्युक्तिलक्षणस्याननुगतत्वापत्तिरिति भावः वैलक्षण्यं संतीति·
तथा च भिन्नभिन्न एवालंकार इति भावः अप्रस्तुप्रेत्याथाह अन्यथोपपत्तेति· प्रागुक्तरीत्या आह कतिपयेति·
यस्य कस्यचिदतिव्याप्तस्य सर्वत्र प्रसक्तत्वादाह सकलेति तल्लक्षणं अतिव्या ˋ योक्तिलक्षणं· तद्भेदाः अ

तिन्न्यायोक्तिभेदाः ननुगौरवादाधिक्यंनातआहालंकारांतरेति· ऊक्तप्रपंचमेवाहप्रधानोत्कर्षेतिननुसामा
न्यतोलंकारत्वसत्वेपितद्विभाजकोपाधिमध्ये॰ पाठादाधिक्येनगौरवंतत्रत्वस्थमेवातआहालंकारे
ति· ह्टांध्यवसानातिशयोक्त्युदाहरणमाहगगनेति· गगनगामीत्यर्थः जलबिंबं· चंद्ररूपं· बिंबस्तुश्री
रामचंद्रस्तु· स्वाभाविकेति· गगनरूपेत्यर्थः निष्कृवेनेतिकथमिवेत्यनेनेमेतिभावः मूलेएवकुठारेत्या
हपर्यस्तेति· नैवअप्पदीक्षितैरेवतदपिनेतिसिद्धांतविरोधादितिदोषः तमेवाहीत्रैवेत्यादिना· ननु
अन्यसंमतत्वेपितथानममसंमतमतआहत्वत्कीर्तिंति· ऽत्रसस्यचेति· उत्प्रेक्षापाइतिषष्ठीतिभावः न
नुतस्याभूमंडलेवहुहरगमनेपिस्वर्गगाप्रवेशानादात्म्योत्प्रेक्षातत्रानसंभवतीसतआहस्वर्गेति· वि
त्रूपेतिकीर्त्यापित्यादिः ताहृत्येतिस्वर्गगमनेत्यर्थः परमोर्ध्वेतिगृहाग्रामित्यादिः इयमपिगम्योत्प्रेक्षैवे
ति· अत्रेदंचिंत्यंनूनंमुखंचंद्रइत्यादौनूनंपदाभावेप्रतीयमानस्यरूपकस्यानापत्तेः उत्प्रेक्षायाआ

पत्तेश्च· तत्कीर्त्तिर्भ्रमणश्रांतेस्तत्र तु बहुद्वारगमने स्वर्गगमने वा स्वर्गगाप्रवेशतादात्म्ये त्वेक्षाकीर्त्तौ
स्वर्गगाप्रवेशकर्तृत्वे त्वेसोत्प्रेक्षा वाऽवश्यं स्वीकार्या अन्यथा भ्रमणश्रांततत्स्वरूपविशेषणवैयर्थ्यापत्तेः
तद्रूपत्वकल्पने· त्वेक्षासाधकं नास्ति येन तथा स्यात्· भ्रमणश्रांतत्वरूपहेतूत्प्रेक्षायां तु न कश्चिद्दोषः स्व
र्गसंबंधित्वं स्वर्गगमनं स्वर्गगाप्रवेशरूपोपात्तोबाधमोनिमित्तमिति बोध्यम्· उदाहरणमिति संबंधा
तिशयोक्तेरिति भावः दुःखयोरित्यत्राक्षेपादित्यजान्वयः तयोरेव सुखदुःखयोरेव· अग्निमाभ्यां पू
र्वयोरिति· जन्मशतोपभोग्यसुखदुःखाभ्यां देवदर्शनाजन्यसुखदुःखयोरित्यर्थः न च पूर्वाभ्यामिति·
दर्शनादर्शनजन्यसुखदुःखाभ्यामेव जन्मशतोपभोग्यसुखदुःखयोरित्यर्थः नाशकतावच्छेदकेति·
पुण्यराशिनाशत्वपापराशिनाशत्वरूपकार्यतावच्छेदकावच्छिन्नकारणतावच्छेदकं सकलजन्मोप
भोग्यसुखत्वादिकमेव न तु दर्शनजन्यसुखत्वादिकं तन्मसुखानां स्वस्वफलोपहितपुण्यनाशक

१३० तायाएव तल्लमत्वादितिभावः उपेति जन्मज्ञानोपभोग्यसुखदुःखेउपमानं पहस्त्वात् दर्शनादर्शनजन्ये च
नेउपमेयं स्फुटत्वात् ध्वनित्वं चात्र प्राचीनरीत्यवबोध्यं स्यानिसायोक्तिः तुल्ययोगित्वं नि
रूपयति अथेति विनिगमनाविरहादाहा प्रकृतेति न तु नार्यं नियमो ऽत आह वाचकेति अत एव औ
पम्यस्यात्र गम्यत्वादेव अपिनाविद्याकरणादि समुच्चयः निरूपितं चैतत् कुवलयानंदव्याख्यायां मेऽनु
षायां च साहृश्यभावः साहश्यपत्वं स च साहश्यभावश्च केचिदित्यरुचिबीजं तु अंतरंग इति न्यायविरोधा
पत्तिरिति वदंतीति सम्मतं प्रियायाया नेत्राभ्यां हृदश्च जलानां वर्द्धी धाराः मानश्च च्युत इत्यर्थः विलो
चनेतिउक्रीत्याप्रकृतयोरित्यादिः दानयोश्चेति विगलनेत्यानुषज्यते ननु कर्त्रोः क्रियान्वयात्त
थासंभवेपि कथमपादानयोस्तथा तत्रान्वयस्यैवाभावादत आह कारकेति द्वयोर्द्वयोरेवोपमंप्र
तीयत इति तत्प्रतीतावपिनात्र तन्मात्रकृतश्चमत्कारोऽनुभवसिद्धः किंतु तत्तत्कृतकधर्मान्वय १३०

कृत एवेति पृथगलंकारता न च गम्योपमयैव निर्वाहः विद्यमानस्यापि सादृश्यस्यासुंदरसीधारण
धर्मकत्वेनासुंदरत्वादिति बोध्यं· स्वामा· यस्य क्रियान्वयित्वरूपकारकत्वस्य· प्राचां मते नेदं·
क्रियोदाहरणमुक्त्वा गुणोदाहरणमाह न्यंचतीति· तिरोभूते सतीत्यर्थः गुणश्च निश्शोभारूपइस
र्थः आदिपदग्राह्योदाहरणमाह यदीति ननु केवलस्यैव तत्त्वं कुतो नात आह केवलेति· कारका
णां मिथः क्रियाद्वारकसंबंधाद्वाह साक्षादिति· लयलिः हरफारेवऊीगुणः मालिन्यरूपः धर्मि
भिनवद्व्यादिभिस्तेषामकारकत्वात्· पुरटं सुवर्णं· आदिसंग्राह्योदाहरणमाह त्वयीति· पाके नि
ईदृत्तुल्ये इत्यर्थः वर्षति वर्षणं कुर्वंति संवत्सरवदाचरतीत्यर्थः उभयेति नेत्रादिने त्यर्थः शब्दमा
त्रमिति वर्षतीति शब्दमात्रमित्यर्थः तस्य तदुभयस्य वृत्तित्वाभावादाह श्लेषेति· पिंडीकृतः एकीकृतेः
यथाक्रममाह गुणेति· आदिपदं ताभ्यां नद्यन्तेमिति भावः मनागपि ईषदपि· अभावेतिचिंतेत्यादिः

१३१ 131 तद्ग्रंथंयोजयतिगुणेति·यद्धिजातिक्रियाद्रव्यव्यतिरिक्तंधर्ममात्रंगुणइतिवैयाकरणमतेतेनेदं·किंच
नमनागपिनिश्चिंतेइस्यत्रचिंताभावबद्धेइदस्यचिंतानतिरिक्ततयागुणस्यैवसाधारणधर्मत्वमित्यपि
वक्तुंशक्यं·दानेतिद्रव्यस्यपराभवस्यैवेतिभावः एतेनैतस्यस्वार्थमाहात्म्यमपीति·पूर्वलक्षणाक्रांत
त्वादिति·अत्रेदंचिंत्यंहिताहितविषयकतुल्यव्यवहारकर्तृत्वप्रतीतिकृतचमत्कारएषायथोक्त
धर्मिणामेकधर्मान्वयकृतएवयत्रचमत्कारस्तत्राद्यविभेदात्·प्रदीयतेपराभूतिर्यैश्चनिंबमित्यन
योःपद्ययोर्नताहृशैकधर्मान्वयकृतश्चमत्कारःकिंतुराजनिंबयोर्हिताहितविषयकश्शुभाशुभान्य
तरैकजातीयकर्तृत्वव्यवहारकृतएवेतिसमहृदयहृदयमेवात्रप्रमाणंअतएवजगालमानोहृदयाद
पुष्पाविलोचनाभ्यामिववारिधारेत्यत्रनतुल्ययोगिताचंद्रइवसुंदरंमुखंइत्यत्रनदीपकंतत्रसादृ १३१
श्यप्रतीतिकृतचमत्कारस्यैवसत्त्वातनन्वयमलंकारांतरत्वमेववक्तुमुचितंइतिचेत्सत्यंअतएवास्य

रसात्कुवलयानंदकृताप्ययंसरस्वतीकंठाभरणोक्तेयुक्तेनचतुल्ययोगितायांसादृश्यस्यगम्यत
यागम्यापमयैवनिर्वाहः तावन्मात्रकृतचमत्काराभावात् एकधर्मान्वयकृतस्यापिसत्वात् प्रतीय
मानस्यापिसादृश्यस्यासुंदरसाधारणधर्मकत्वेनासुंदरत्वादितिबोध्यं पौर्वापर्याच्छेदकेति स्व
कर्मकक्रियाश्रयत्वरूपयेत्यर्थः वक्ष्यमाणकारकेति वसुदानुर्यज्ञोधातुमतीवनिपुणोभवा
नित्यादावित्यर्थः वक्ष्यमाणदीपकेतिप्रकृताप्रकृतत्वसत्वादितिभावः इवस्यसत्वान्नोक्तदो
षद्रुपमित्याद्येनाहनचेति चंद्रांशुनिर्मलमिति अत्रद्वितीयचरणेमतेनाहसमासस्येतिनैय्या
यिकमतेनाहपूर्वेति यथोक्तानामितिप्रकृतानामेवाप्रकृतानामेववाप्रकृताप्रकृतानांवेत्यर्थः
यथोक्तेतिगुणादीत्यर्थः इत्यसकृदितिइत्यस्यासकृदित्यर्थः अन्यथाः उक्तव्यवस्थानंगीकारे
अत्रतुल्ययोगितायांप्रत्ययात् गम्यमानत्वात् अपिनासांकूर्यमुचितं एवंच अस्याअतिरिक्त

त्वेच·रसनारूपैषतिदर्वीचिरिववलिर्वलिरिवकर्णइत्यादिप्रतीतेरितिभावः यथासंख्येति·वल्यादि
षुअस्रात्तत्वेहिमादिषुअधैर्यमितिभावः राजवर्णनमिदं दृष्टइति·इदमपिराजवर्णनं·हेराजन्
त्वसभायांदृष्टश्चेचंद्रादयः उग्राः दृश्यंते·अथत्वरणेदृष्टश्चेतशेषादयःसौम्यादृश्यंतेइत्यर्थः
स्वरूपयैद्दे ने तिशांतोग्ररूपेणेत्यर्थः रतीतिकविनिष्ठेत्यादिः धातुं·संपादयितुं·विधातुंकर्तुंचुल
कीकरोति·नाशयति· न्यासोन्वितेतिकारकतुल्ययोगितेतिशेषः विशेषस्यसामान्येनसमर्थनात्त
न्मिश्रत्वमितिभावः अंबुजमाध्वि·कमलमकरंदरूपे·अयइतिश्रीरामवर्यनमिदं अतएवतयोरप्र
कृतत्वं हेरामपत्रस्यत्वेतवकृथानिः सरतितत्रशेषः कूर्मश्चभूधारकः कोवाननोपीत्यर्थः इत्यने
नेतिव्यज्यमानस्येतिशेषः तेअेएवाहवाच्येति· इतितुल्ययोगिता· अथदीपकंनिरूपयति १३२
अथेतिअत्राप्यौपम्यस्येति· परंतुप्रकृतमुपमेयमप्रकृतमुपमानमितिवोध्यं·योगरूढदीपक

पदमित्याह प्रकृतेति· प्रकृतेप्रकाशानासंभवादाह सुंदरीति· नन्वेवमत्राभाव्यमत आह यद्वेति·
संज्ञायां कनितिकन्· अमृतस्येति अत्र प्रकृताप्रकृतत्वमुपपादयति अत्रेति ललितोयाः प्रकृ
तत्वं बोध्यं· इदं गुणस्योदाहरणं क्रियोदाहरणमाह सुधायाइति· अत्र राजवर्णनेन दयाद्दृष्टेरेव
प्रकृतत्वं· अभावोदाहरणमाह मृतस्येति· विमार्गेति परपुरुषगामिन्याइत्यर्थः अत्राह कस्यचि
दिति प्रकरणादिनेति भावः कत्रादीति आदिना कर्मकरणाधिकरणानि ग्राह्याणि· मंदाक्षं ल
ज्जा· प्रकृताप्रकृतत्वमुपपादयति अत्रेति हृन्नीति जीवनेत्यर्थः पद्यक्रमेणोक्तिक्रमनाहात्रेति·
अप्रस्तुतप्रशंसायाः अनेकविधत्वादाह सामान्येति· पूर्वार्द्धेन सामान्यतो राजस्तुतिरुत्तरार्धे
न विशेषत इति भावः एकस्याइति यदीयोक्तिस्तदीयायाइत्यर्थः ततकर्तृकारकं· नीतिनिमम
ग्रणीरित्युक्तत्वादाह नीतीति· धर्मस्य क्रियादेः तन्नांकारकाणां· सेवसहद्दन्तिरेव· कूणतिसंकु

चति॰वेल्लतिम्लिष्यति॰क्रियाभिन्नानामित्तियुणिनांकारकाणांचेत्यर्थः॥धर्मस्येतिसङ्कहन्तेदीपक
त्वामित्यर्थः॥तन्वगत्यागौरवसीकार उच्छेदापत्तेरितित्वद्रीत्याकारकदीपकेनैवतत्रप्राप्यमितिभावः॥इष्टा
पत्त्याहसकृत्तेति॰तत्रापीष्टापत्त्याबाहलक्षणेति॰अनुगमसत्याल्लाघवंदोषोऽतआहतादृशेति॰नन्व
गत्यागौरवस्वीकारोऽतआहोपलम्बेति॰प्राथुक्तरीत्याऽन्यतमवत्त्वेनसर्वेषामेकैकउपमाद्युच्छेदापत्ते
रित्यर्थः॥एवंच॰उक्तभेदानंगीकारेच॰सकृत्ताश्रकृतत्वेएवतदंगीकारादाहक्रियाणामिति॰कविसं
रंभगोचरइति॰केवलंतादृशनायिकास्वभाववर्णनस्यैवतत्त्वादितिभावः॥चकाराभावादाहच्छाये
ति॰अत्रस्विधतीत्यादौ॰नन्ववृत्तदुदाहरणेप्योपम्यस्यतदविषयत्वात्कथमेतदुदाहरणत्वमतआ
हास्मद्दितिआलिंगितुमितिरीश्वरंप्रतिभंक्तोक्तिः॥इदंसर्वकर्तृयोमंदादरस्तेजनेमहेपश्चमेवमन्वे
इत्यर्थः॥आवश्यकत्वेपीतिमंदादरत्वस्यसर्वत्रविशेषणत्वादितिभावः॥नन्वेवमेवंपिकेस्यसकृद्दृत्ते

न्नेरभावात्कथं तत्त्वमत आह कारकस्येवेति· कारकशब्द उभयपर इति भावः तर्हि कारकदीपकस्य किमु
दाहरणमत आह कारकेति क्रमेणाह प्रकृतत्वेति· न केवलमत्रैव दोषो ऽपि तु अन्यत्रापीत्याह श्लेषेपी
ति· भंगाभंगभेदादिति भावः न केवलमेतावदित्याह सर्वेषामिति· नापत्ते श्चेति वैपरीत्यादिति भावः वक्रेउ
पमापि कारकस्य मह्यत्वात त्वेन निष्टत्वेन· रमणीयोपि श्रुताचारसंपन्नोपि यतिः संन्यासी· राजवर्णनमिदं एव
मग्रेपि· मदेति मदोत्कर्षेणेत्यर्थः वारणेति गजेन्द्र इत्यर्थः भवकानिति अकन्नूप्रत्ययः भवानित्यर्थः भग
वानित्यपपाठः कुंडलीति सर्पस्सम्यक् कुंडलेनेत्यर्थः नरेत्यादिसंबोधनद्वयं आमनंतीति सूचितामरु चिमा
हवस्तुतत्त्विति· अन्यथा वै लक्षण्याभावे पि भेदांगीकारे· उपादीत्यादीति आदिसमीपे स्याद्यर्थः उपसं
हरति एवमिति· इदमेव उदाहरणं द्वयमेव· विंवेति विलक्षणत्वोऽश्रपणानामित्यादिः तुल्ययोगितायां
चैतस्याग्रे अन्वयः वस्त्रादीनां चेति चेन मृतादीनां समुच्चयः उपमायामिवस्यादेवेति· तेन धर्मेणोपमा

१३४ गम्यमानस्यादिति भावः लिंगभेदोपीति धर्मिणामिति शेषः एवमग्रेपि· जगतीति· अत्र दुष्प्रापइतिनामार्थो
134 धर्मः स च जहल्लिंगः न स सर्वलिंगत्वात्· न दूषणमिति तस्य तत्रान्वयसंभवादिति भावः एवमग्रेपि बोध्यं·
एवंउक्तप्रकारेण· एवं लिंगभेददोषवत्· एवंउक्तप्रकारेण· अन्याशेपि दोषस्य प्रागुक्तत्वादाहापी
ति· इति दीपकं· प्रतिवस्तूपमां निरूपयति अथेति· अथात्र विशेषं वक्तुं प्रागुक्तं सर्वसंग्रहेणा
नुवदति· तत्रेति निरूपणीयायां तस्यामित्यर्थः अलंकारश्चेति निरूपितोऽस्त्वनुषज्यते भिन्नेति
असाइत्यादिः अत एव तस्या मि र्थमाह प्रकृतेइति· प्रागुक्तोऽइति द्विविभातीत्यादानित्यर्थः तत्रवा
क्यार्थगतोपमात्वे एवमग्रेपि तथापि· यथा तथा शब्दस्य तद्वाचकस्य सत्त्वात्तत्र दोषाभावेपि· तथापि·
दृष्टांते बिंबप्रतिबिंबभावापन्नसाधारणधर्मकत्वेन दोषाभावेपि यापय· अतिक्रमय· एवं च अ १३४
प्रस्तुतप्रशंसास्तेनेव कारणे च· वस्तुप्रतिवस्तुभावापन्नेति तत्तद्विशेषणानां बिंबप्रतिबिंबभावे
तापचापादीनां१

नापेनभ्राजतेइत्यादौक्वचित्सत्यपिसाक्षात्उपमानोपमेयवृत्तिधर्मोवस्तुप्रतिवस्तुभावापन्नएवःदृष्टांते
तुसाक्षात्तद्वृत्तिधर्मस्यापिबिंबप्रतिबिंबभावइतिदृष्टांताद्विशेषः अतएवब्रह्मत्वादिनादृष्टांतवारणं
एकस्यैवधर्मस्यपृथक्शब्दाभ्यामुपादानंवस्तुप्रतिवस्तुभावः द्विविभातियथाभानुस्तेथात्वंभासिवैभु
वीत्यादौवाक्यार्थोपमायामतिव्याप्तिवारणायार्थमितितद्ध्वनयन्नुक्ष्यतिपदांतरेति· स्मरणस्यतद
संपर्कीदिति· यथावाक्यार्थोपमायांगगनाधिकरणकभानुकर्तृकशोभाविशिष्टभूम्यधिकरण
कत्वत्कर्तृकशोभेति बोधः वैशिष्ट्यनियामकसंबंधश्चस्वकर्तृसदृशकर्तृकत्वमेवसंबंधविशेषता
त्पर्यग्राहकौचयथातथाशब्दौ· नैवंप्रकृतेस्मरणातभावेनोपमानोपमेयभावः किंतुतादृशापप्र
सदृशांतादृशमानन्नमिस्सेववचेवाक्यार्थोपमायांतादृशसंबंधद्योतकपदाभावात्गम्यतेवौपम्य
स्य·तिविशेषः यद्वावाक्यार्थोपमायांतादृशसंबंधोपियथातथापदद्योत्यत्वात्स्वकारएव·यत्र

१३५ 135 वाक्यद्वयगतानां पदार्थानां सर्वेषां परस्परसाम्यं तत्र प्रतिवस्तूपमेति ज्ञारद्यागमकृतः आपद्गतः इति · अ
त्रोदाहरणे आपद्गतः सत्त्वुरुषो ऽपूर्वौदार्यवान् स्वकीर्त्तिलतादिसर्थे विशेषरूपेन कालागुरोर्दृष्टां
तता · यदापर्वतरतद्वृक्षिमाने तद्रूपादिस्तत्र महानसस्य · तस्मात्कालागुरुरूपदृष्टांतेन तद्वृत्तिसाम
न्यधर्मावच्छिन्नयोर्व्याप्तिसिद्धौ यत्सामान्ययोर्व्याप्तिस्तद्विशेषयोरितिन्यायेन पूर्वोक्तविशेषनि
यमसिद्धिः उपमाचापद्गतः सत्त्वुरुषो दहनमध्यगकालागुरुसदृशः इति · साधारणधर्मश्च विंवप्र
तिविंवभावापन्ना पूर्वौदार्यलोकोत्तरपरिमलविशेषणके विस्तारणं · नतु वस्तुप्रतिवस्तुभावाप
न्नं · एवं वैयधिकरणेपि व्यतिरेक आक्षिप्यते · तत्र च पूर्वोक्तरीत्या एकविशेषे परविशेषस्य दृष्टांतता
भावात्तद्वृत्तिसामान्यावच्छिन्नव्यतिरेक आक्षिप्यते · सिद्धे च तस्मिन्तद्विपरीतदृष्टांतेन तादृशसा १३५
मान्यावच्छिन्नान्वयनियमसिद्धौ यत्सामान्ययोरितिन्यायेन तादृशविशेषावच्छिन्नकार्याक्रान्त

यन्नियमसिद्धिरितिबोध्यं· विम्बाभिरामेतिजगद्रमणीयेत्यर्थः गुंफितानांरचितानां· लोकंपृणैः क्वो
कपूरकैवं त्राविशेषावच्छिन्नकाव्योक्त्यभवदिति· महिमाभावव्याप्यत्तुंबीफलराहित्यवीणादंडसदृशाः
संगविशेषाभावव्याप्यपूज्यत्वाभावद्रासुरुषदृत्तुपमाकारोत्रबोध्यः एवमग्रेपि· अत्रउदाहरणद्व
ये प्रतिपादितमिदंसर्वमनुपदमेव· भेर्नैस्त्रैः वाक्यार्थयोः विधिनिषेधयोः नचेत्तस्यैवमितिश्लो
कः वेद्यस्यैवेति· यथाकथंचिद्दृष्ट्वाज्ञन्यप्रतीतिविषयस्यैवेत्यर्थः तत्त्वमिति· अत्रापिमधुव्रताति
रिक्तज्ञानाविषयतत्कमकरंदसदृशंसम्बारणसकलपुरुषज्ञानाविषयतत्कमकाव्यमित्युपमा
कारोबोध्यः इयंच· प्रतिवस्तूपमाच· यथाकथंचिद्धर्मस्येति अत्रेदंचिंत्यं यद्यपिविदुषैवेत्यस्यै
वकारबलेनाविद्वान्नजानातीत्यप्यर्थः तत्रमचोक्तरवाक्यार्थः सधर्मएवतथापिभूतलेएवंबंध्या
पुत्रइत्यादिप्रयोगपारणाय्यभावान्वयस्यापिविवक्षितत्त्वमस्त्येव· नहिवंध्येत्यस्याप्यर्थः तस्य

१३६ चोक्तरवाक्यार्थः सधर्म्म एव तथापि भूतलेएवं वंध्यापुत्र इत्यादिप्रयोगपारणायभावान्वयस्यापि वि
136 वक्षितत्वमस्त्वेवेति न दोषः नहि वंधनेवैधर्म्यस्यैवोपात्तस्य स्वव्यतिरेकयोः स्वव्यतिरेकस्तज्जातीया
र्थस्यैव निबंधनेन दाक्षिमतद्व्यतिरेकेणोपात्तस्योपमायागम्यत्वेपि तत्त्वोचित्यावतत्राप्युपात्तभाव
रूपार्थस्य न हि न हि वंध्ये स्याक्षिमेनोपमाप्रतीतेः सत्त्वात यदि संती स्तत्रापि गुणाः स्वयमेव प्रका
शंते इति भावान्वयविधर्मभूतकस्तूरिकामोदः ज्ञापयेनन ज्ञायते इति वाक्यार्थस्तदाक्षिमेन स्व
यमेव प्रकाशंते प्रतिवाक्यार्थेन भावान्वयवाक्यार्थयवौपम्यं बोध्यं · यद्वा यदि संती स्तत्रैव कारस्य
क्रियासमभिव्याहृतत्वाद त्यंतायोगव्यवच्छेद एवार्थः परतो न प्रकाशंत इत्येतदाक्षेपलभ्यमे
व · तत्र हि द्वितीयार्थेन स्वतः प्रकाशंत एवेत्येतत्समानजातीयार्थवर्णनं · किं तु परतो नेत्येतत्समा १३६
नजातीयस्यैव यत्नज्ञापयेनेन न प्रकाशंते किं तु स्वत एवेत्यर्थवर्णनं तत्र स्वत एवेत्यंशो न वाच्यः

किंत्वाक्षेपलभ्यः आक्षेपेण च मार्मिकः को मरंदानामिति भवदुदाहृतेपि मधुव्रतं विना को जानाति
मधुव्रत एव जानातीत्यर्थप्रतीतेर्वैयधिकरण्योदाहरणत्वं न स्यात् अस्तु वा एवकारापकर्णणेन
न परइति प्रस्तुतवाक्यार्थस्तथापि व्यतिरेकसजातीयार्थनिबंधनदिन्वयसजातीयार्थानिबंध
नाच्च विद्वानेवेति वदस्यापि वैधर्म्योदाहरणपरता नत्वाक्षिप्तव्यतिरेकसजातीयार्थनिबंधनेए
ववैधर्म्योदाहरणात्वमिति राजा ज्ञाऽसि तस्माद्युक्तमित्यंतेसर्वमप्युन्नेमिति बोध्यं अमुक्तत्वम्
वापपादयति वैधर्म्योदाहरणे हीति जातुचित् कदाचित् नन्वेवं कारस्यात्यंतायोगव्यवच्छेदार्थ
कत्वेन कथयाकर्षणमत आहास्यंतेति साधर्म्येण षेदमुदाहयमि सुकृंद स्यात पर्वंद्ध यति
सं तद इति विद्यमाना इत्यर्थः कथं तर्हि ते स्तथो क्रमत आह नत्रिति जगदे कथितवानः स्त्रायुष्म
ता अय्यंदीक्षितेन वाचेति इह स्मते रुन्मामीत्यर्थः। स्वसिद्धांते आक्षिपति अथेति स्त्रीयाह

१३७ तेति· स्वीयानांयान्निहितानितत्प्रतिबंधकर्मणी त्यर्थः नापीत्यस्य वाच्यपि सत्रान्वयः तन्नतथेति औप
137 म्यंगगम्यमित्यर्थः तयोरपि विशिष्टवाक्यार्थयोरपि तस्येति औपम्यस्यगम्यत्वादित्यर्थः स्वभावसि
द्धत्वेनानुपात्तेति· एतद्रूपानुपात्तधर्मेणेत्यर्थः तादृशौपम्यस्य एकधर्मस्यसंबंधिभेदेन हि रूपादानरू
पवस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकत्वाभावात्प्रतिवस्तूपमोपयोगित्वेति चिंत्यमिदम्· विव
क्षितं अत्रेति शेषः ननु तयोरभावत्वेनानुरूप्यादस्त्येव बिंबप्रतिबिंबभावो ऽ तआह यद्वेति घटना
अननुरूपेति भावः असंष्ठुलतारूपस्येति· पूर्ववाक्यार्थघटकहितप्रत्यूहकर्मणीति नामार्थविभ
क्तार्थादीनामुक्तवाक्यार्थघटकेष्वाणानपहन्तुमित्यत्राभावादसंष्ठुलतेति भावः क्रमेलकवत्तु
च्छवत्· तद्वेति शिवं प्रतिभक्तोक्तिः इक्षुरकं तालमखाणेति प्रसिद्धौपधीपुष्पं· काशापुष्पमिति केचि १३७
त्· गोक्षुरमित्यन्ये· आलुवंदारुस्तोत्रेति· अवर्जनीयेति अनिष्टेपि स्वसामग्रीवशाज्जायमानस्य

त्यर्थः धातोरिच्छापूर्वकवीक्षणे लक्षणया आदेच्छापूर्वकेति· सुसंपादमिति तत्राप्याधारसप्तमी सं
पन्नेरिति भावः घटनाया आनुरूप्यं सर्वथा अपेक्षितमित्युपसंहरति· तस्मादिति· मालारूपप्रति
वस्तूपमामुदाहरति वहतीति· पटीरजन्मेति मालारूपेति· पटीरजन्मेव दीप इत्यादिप्रतीतेरित्य
र्थः इति प्रतिवस्तूपमा· दृष्टान्तं निरूपयति अथेति· बिंबप्रतिबिंबभावापन्नसाधारणधर्मादिकं
वाक्यार्थयोरार्थमौपम्यं दृष्टान्तः इति निष्कर्षो बोध्यः करैः किरणैः कुलानि समूहान् अपिनेद्
घुरुषादिसंग्रहः प्रतिबिंबितइत्यस्य सुष्ठु इतीति शेषः तदुपेति अप्रकृतार्थोपादानमित्यर्थः स्थितइति
त्यस्य विशदीकरणेऽन्वयः स्पष्टार्थमात्रपदव्यवच्छेद्यमाह नत्विति· अभ्युपेत्याप्याह वैपरीत्येति·
इष्टापत्तावाह तादृशा रति· अतएव उक्तरीत्या दृष्टान्तेत्यादिः भवदुक्तमपीति धर्मस्य प्रतिबिंबित
त्वाप्रतिबिंबितत्वकृतमिति भावः एकालंकारेति· उपमालंकारस्येत्यर्थः एकभेदत्वेति· एकालंकार

यद्यपि एकत्र ज्ञानं एकत्र संस्कार इति भेदस्तथापि बिंबप्रतिबिंबभावोस्तीति भावः ×३

१३८ त्वेत्यर्थः अलंकारभेदो न स्यादिति यावत् सैव च इष्टापत्तिरेव न नन्वेवं प्राचीनविभागोच्छेदापत्तिरत आह
138 प्राचीनेति· दीपकतुल्ययोगितास्थल इति भावः एवं प्रतिवेदीमुक्तादोषमाहोपम्येति· बहूनां· अ
नन्वयादीनां· तत्रापौर्वापर्याभावाहार्य इति· ज्ञानार्थ इति· ज्ञानरूपोर्थ इत्यर्थः पन्निवंधनमिति अ
धिलंघनादिप्रयुक्तमित्यर्थः औपम्यमित्यस्यानुषंगः त्वन्मूलेति अलंकारसर्वस्येत्यर्थः तवानिष्ट
या कुत्र हेतुमाह न चैत्रार्थमिति असंगतेरिति कव्यभिप्रायाप्रतिपादनादिति भावः उपसंहरतितस्मा
दिति· पथा मार्गेण तेषां प्राचीनानां एकस्येवेति उपमारूपस्येवेत्यर्थः प्रभेदेति उपमाप्रभेदतावा
एवेत्यर्थः परप्रीतिपरेषांप्रीति· कारस्कर इति तापत्रयं आध्यात्मिकादिदुःखत्रयं· वलतिप्रविशति·
वैधर्म्येणेति· उपपादितमिदमधस्तात्· इति दृष्टांतः अथ निदर्शनां लक्षयति अथेति· १३८
औपम्यपर्यवसायी· औपम्यमूलः नन्वतिशयोक्त्यादौ नार्थद्वयमतं आह ध्वन्यमानेति· नन्वार्थत

मर्थसंबंधित्वं तथात्वं वाच्यरूपके दोषस्तु द्वयस्योऽत आहार्यत्वं चेति । प्रतीयते इति तथा च तत्रातिव्या
प्तिरिति भावः प्रधानविशेषणमिति तद्विशेषणो नां तु प्रधानविशेषणानां तु : त्वामितिईश्वं प्रतिभ
क्तोक्तिः एवमग्रेऽपि कंठ एव तटं तन्मध्ये लसंतमित्यर्थः तव शिवस्य विवरे तितद्रूपे रंतराले रित्यर्थः एक
वाक्येति क्रियाया ऐक्यात् भिन्नेति तद्भेदात् भेदांतरमाह सर्वत्रेति इह त्वौपम्ययोरिति तज्ज्ञानयो
रित्यर्थः सः अभेदः परिचितः अनुभूतः जगदितिजगदुत्पत्तिस्थितिसंहारकारक इत्यर्थः अत्र दृगंतो
वुधीति दृगंतसमुद्रेलहर्यपरिलीलेनयो रित्यर्थः सः अभेदः परिचितः अनुभूतः जगदितिजगदुत्प
त्तिस्थितिसंहारकारक इत्यर्थः अत्र दृगंतांवुधीति द्वयं दृगंतलीलाप्रतिपादकशब्दाभावेन तथा दु
र्वचमत आहारोपेणेवेति पाणौकृत इति सीताविवाहवर्णनं श्रीरामचंद्रेण स्वहस्ते कृतः स्वेदकंपाभ्यां
युक्तो भूत् तस्याः सीतायाः पाणिर्हि मांबु मंदवायुभ्यां विह्वलस्य कमलस्य शोभां दधावित्यर्थः विधु

तिरूपाकं परूपा· चस्त्वर्थे· तत्सिद्धिः ईषद्धिकासमुद्रणयोः सिद्धिः अस्यांच पदार्थनिदर्शनात्वेनोदा
हृतायांच· शोभादरिस्यादिनीलीलापरिग्रहः पमेयतावच्छेदकेति· तद्विशेषणतयेत्यर्थः तथाविव
क्षायामाहृयद्वेति· अस्यास्तु पदार्थनिदर्शनायास्तु· उपमानोपमेयेति· आस्येपूर्णशशांकतेतिभव
दुक्तरूपकोदाहरणे इदं मतिव्याप्तमितितित्विंस्यं रूपकस्यगुणीभूतत्वेनेति· कश्चभेदरूपवाच्यसिध्यं
गत्वेनेत्यर्थः तदध्वनित्वेति रूपकध्वनित्वेत्यर्थः द्वितीयशंकायां समाधत्ते किंचेति· अस्याश्चपदा
र्थनिदर्शनायाश्च· ताहृश्येति· उपमानोपमेयेत्यर्थः अतिशयोक्तेश्चेति उपमेयगत उपमानाभेदः
शरीरमित्यर्थः नन्वेवं रूपकातिशयोक्तावैकापत्तिरतः आहारनगरणेति तयोर्विशेष इति·
रूपकातिशयोक्त्योर्विशेष इत्यर्थः उपसंहरति एवं चेति अस्या निदर्शनत्वायदिन्नाया· अत १३९
एव· तत्करीत्वाताभ्यांवेलक्ष्यायसत्वादेव· अर्धयोः पूर्वार्धोत्तरार्धयोः रूपकादेशोथितत्व्यमाने

इति असामंजस्यापत्तेरित्यनेनान्वयः आदिनातिशयोक्तिपरिग्रहः उच्यमाने इत्यस्य तथेत्यादिः
असामंजस्यापत्तौ हेतुर्व्यंग्यस्यादित्यतीयांतः — पमेयाभेदसिद्धविति· निदर्शनायां तथाभावे तु वीजं
विंबं· पर्यनुयोगस्य· आक्षेपस्य· कल्पनापाद्यति· वाक्यार्थरूपकस्थले इति भावः ननु तस्या निदर्श
नावीजत्वमेव कुतो नात आह हेतुत्वाभावमिति· तज्जीवातुत्वेति निदर्शनाजीवातुत्वेत्यर्थः ननु निद
र्शनायां विंबप्रतिविंबभावो न रूपके इति थ कथं तेनास्या निरासोऽत आह रूपके इति· अस्मदुक्तोदे
ति· त्वामंतरात्मनीत्यत्रेत्यर्थः रूपकस्यैतत्र विषयाभावात्· वाक्यार्थद्वयाभावात् एवं न रूपके इति क
थं तेनास्या निरासोऽत आह रूपके इति· अस्मदुक्तोदेति· त्वामंतरात्मनीत्यत्रेत्यत्रेत्यर्थः रूपकस्य
तत्र विषयाभावात्· वाक्यार्थद्वयाभावात् एवं च रूपकविषयभूतं वाक्यार्थनिदर्शनायां यदुदाहृतं य२
यच्चोपपादितं तदसंगतं तद्विविक्तोदाहरणसंभवादेति भावः तेनैव· अलंकारसर्वस्वकारेणे

१५० वृ॰ अतिव्याप्तनादितिप्रागुक्तरीत्येतिभावः ननु तत्र तद्दूषणेनैवेति॰ अत्रेदं चिंत्यामंतरात्मनि लसंत
मितिभवदुदाहृतोपिगम्यरूपकेणैव निर्वाहे निदर्शनायाउच्छेदापत्तिः अन्यथा वाक्यार्थरूपकोच्छेद
वहम्यवाक्यार्थरूपकोच्छेदापत्तिश्च॰ न चैवं मुखमिव चंद्र इतिवाच्योपमामुखं चंद्र इति गम्योपमैव स्या
दितिरूपकोच्छेद इतिवाच्यं॰ तत्राभेदप्रतीतिकृतचमत्कारस्यैव सत्त्वात् सादृश्यकृतस्य तस्याभावा
च्च किंच त्वदुदाहृते केत्रो रूपकमेवास्तु प्रतीयमानोपि क्रिययोरभेदो विशिष्टरूपकोविशेषणाभेद
वन्नालंकारांतरं अन्यथा अलकाहृतकामिनीमुखं भ्रमद्भ्रमरसंभारं पद्ममित्यादौ अलकभ्रम
रयोरभेदस्यापि अलंकारांतरत्वं स्यात्॰ तस्मात् गम्यतामात्रेणालंकारांतरत्वेति रिक्तं वचः ननु प्रा
चीनैरलंकारांतरत्वेन परिगणनाद्गम्यत्वेऽपि वाच्यस्येव रूपकमित्युच्यते तर्हि प्राचीनमते तु विघट १५०
नं व्यर्थयेवेतिबोध्यमिति॰ पावकैः अलक्तकैः प्रतीयमानेति॰ उपमेयस्यानुषं॰ उपसंहरति

एवं चेति· अत एव· अस्यास्तदुभयबहिर्भूतनिमित्तकत्वेन प्रागुक्तभवदीयोदाहरणासंभवादे
व· तत्र· निदर्शनायां· अत्रेति पाठ उचितः पदे स्याने· यः उदयाचलः अत्रेति बोधयन्तीत्यत्रेति
शेषः ननु गिरेरानुकूल्याचरणं कथमत आह गिरेश्चेति देशेति सूर्योदयप्रदेशावच्छिन्नशि
खरेत्यर्थः नन्वेवमौपम्याभावोऽत आह मयैवेति· तस्याः प्रतीयमानोपेक्षायाः वैयाकरण
मतमाहेदं चेति नित्यमित्यस्य कर्तरीत्यत्रान्वयः कर्तरीत्येवेति तदर्थः कृताकृतेति नैयायिक
मतमिदं· नन्वेवं रथो गच्छतीत्यादौ दोषोऽत आह चेतनत्वेति· भास्तः गौणः बोधयन्तीत्य
त्रे प्रतीयमानोपेक्षेति· स्वस्वार्थविषया· तत्रापि मते लाक्षणिकार्थपरत्वे तत्त्रियमेवेति बोध्यं·
अभूतेवेति नैयायिकरीत्या प्रतीयमानोपेक्षायास्तत्र तत्त्वेन संभवरूपमित्यर्थः अन्यथा वै
याकरणरीत्या तत्सत्वेपि तदप्रसक्त्या तथोक्तासंगतिः स्यादिति भावः क्वांतयोरुदाहृतेरस्यत्रा

१५१ न्वयः प्रकाशं अन्यं तं· प्रक्षेपेति प्रक्षेपस्य पूर्वकमित्यर्थः तत्फलकं तिथावृतः· कृत्रो द्वितीयेति उ च्·
१५१ भेदांतरमाहेदं चेति· सः क्रियायोर्भेदः पत्रे एहिस्येति स्वार्थे व्यञ्जवहुव्रीहिर्वा पत्ररहितकरण
मित्यर्थः सपत्रेति उ च प्रत्ययः इति निदर्शना व्यतिरेकं निरूपयति अथेति· ननु गुणविशेष
वत्वेनेत्युक्तावपि तत्रातिप्रसंग एव· उपमेयस्योपमानत्वरूपगुणविशेषवत्वेनोत्कर्षस्य म
त्वादेत आह वैधर्म्येति तथा च तत्तस्य वैधर्म्यणोत्कर्षः स इति लब्धं· नैवमतिप्रसंग इत्याह तत्र
चेति प्रतीपादौ चेत्यर्थः उपमेयस्य विशेषः मात्रपदेनोत्कर्षव्यावृत्तिः तयोः अधिके गुणव
त्वोपमानगतापकर्षयोः मात्रं न व्यतिरेक इत्यनुषज्यते· एवेत्यस्यार्थमाहोपमानादिति न त्वसंभवा
त साहृदय भावासंभवात्· इष्टापत्तावाह तस्य चेति· वास्तवत्वेनेति· हीनगुणस्योपमेयत्वादिति
भावः विशेषणे· तस्य विशेष्यत्वीकरणेतस्येव· उपमेयोत्कर्षस्येव· अधिकनिवेशप्रयोजनाभा १५१

वादितिभावः संमदिनइतिसर्वदानेत्रयोरमणीययाशोभयाहेतुनाहर्षयुक्तस्पतवमुखस्यरात्रौ
निःशोभंकमलंअंशेनापिकथंतुल्यंकुर्यादित्यर्थः नायकंप्रतितद्वयस्योक्तिः अत्रसर्वदासश्री
भत्वेनदृष्टत्वंवैधर्म्यं तत्ररात्रौतभावइतिभावः सोपिचतुर्विधोपिकरितिनायिकांप्रतिनायको
क्तिः चेद्वद शंकायांईदृश्यंतवाननंमिंदुतुल्यमित्येवंरूपंअत्रः उक्तभायणविषये विदग्धाःक
मः सरंदः एततआननं उभयोः सकलंकत्वतद्धीनत्वरूपवैधर्म्ययोस्ताहृशायोः साचश्रौतीच
एवमग्रेपि ननुभवानुपादानेउत्कर्षाप्रतीत्याकथमयंतद्भेदोक्तआहहेतुद्वयेहीति नयोर्म
ध्येइत्यर्थः हियतः तत्रेत्यमतउभयोरुपादानेपितथैवेत्यर्थः सर्वथाअवोधानेस्याहनत्विति
उत्कर्षेति अपकर्षनिरूपितोत्कर्षरूपत्वादित्यर्थः प्रयोजकेतिवैधवेत्यर्थः श्रौतीमुदा
हृत्यार्थामुदाहरतिएवमिति इहभूवलयेनायिकोनांनयनानिखंजरीटाणामनेकप्रकारमं

१४२ गसंबंधिशोटनसंबंधिरचनाप्रकारं वहंतु परंतु अस्याः सुदृशो नाधिकायार समीचीनशोभं मुखं अ
नियतशोभेन कमलेन कथं सदृशमित्यर्थः भंगीत्सुचितः पाठ इति केचित् आर्थीति· इवादेरभा
वादिति भावः म्नाम्धतेति आननविशेषणमिदं· सा च आर्थी च· एवमग्रेपि· आर्थीमुक्त्वा आक्षि
प्तामाहकनीति इदस्वर्णासविशेषणं देवनदी गंगा तीरस्थितिविशेषणमाह निस्त्यति· श्रुत
र्थेति· श्रुत्यर्थयोर्यो मार्गो तद्लंघिनीत्यर्थः यथा सख्येनात्र पूर्वयोरन्वयः तदनुपेतिउभयानु
पादानमित्यर्थः आक्षिप्ता चेत्सेपि बोध्यं· इति रेतद्वेद समाप्तौः श्लेषमुदाहरति क्रूरेति· सत्वानि
जलजंतवः दोषाकरश्चंद्रः हे भूप त्वं तथा दोषस्यान क्रूरप्राणि व्याप्ता च न यत इत्याद्यर्थः अंत
सत्त्वेति पाठः क्वचित्· नत्रांतः अभ्यंतरे सत्वेपि दोषैरनाकुलः तत्र सत्वं गुणस्तेनाकुलश्चेत्यर्थः श्री १४२
तीनादृक्ष यथा शब्दसत्वात्· प्रचंडसूर्यमंडलवद प्रतिहताज्ञ· यतः सोमवंशाद्धि विषभागित्यर्थः

यद्गणयतीयं सविषं क्रूरत्वं अतितथेत्यर्थः एकतरेति उपमाश्लेषेतीत्यादि तु प्राग्वत् आर्थ्युपमामाक
स्याश्लेषमुदाहरति महेन्द्र इति परमैश्वर्यवत्तुल्यमित्यर्थः सहस्रैर्जनैः त्रिदशोत्तितं इन्द्रेणेत्यर्थः आर्थी
तुल्यशब्दप्रयोगात् त्रिदशाः देवाः श्लेषेण द्वितीयार्थमाहश्रारिति तत्सुरुष इति तेषामधिप इत्यक्त
रूप इति भावः स्रुजर्थान्तर्भाविणा वहुव्रीस्वर्गीकारेदाहरन्नाविति दन्तभावजलाद्यवादाहत्रयो
वाद्दशावेति प्रक्रिया पूर्ववत् अत्रेतत्सुरुषेपि प्राग्वत् आद्यगोत्रपक्षेः स्ववंशपक्षः द्वितीयेगोत्रप
क्षाः पर्वतपक्षाः श्रोंच इत्यनेन सूचित्तामरू चिमाह इदं तु बाध्यमिति इह प्रागुक्तभेदानां मध्ये नु
पादानभेदेति अनुपादानरूपभेदत्रयमित्यर्थः तन्निषेधेति साधर्म्यनिषेधेत्यर्थः गुणांतरेण सादृश्य
प्रत्ययस्य दूरीकरत्वादिति अत्र दं चिंत्यं कथमिंदुखिाननं त्वदीयमिति पद्य सकलंकत्वेन तद्ग्राहि सेनवासा
दृश्याधिकन्यूनत्वप्रतिपादनद्वारा ऽभावः प्रतिपाद्यते ऽपकर्षो वा सचा॥ विशेषात्सर्वधर्मप्रयुक्तसे

१५३ वेतिगुणांतरेण साहृश्यप्रत्ययइतिरिक्तंवचः कथंतुलयामः कलयापिपंकजमित्यादौ सर्वथैवसाहृ
143 श्यनिषेधप्रतीतेश्च· तस्माद्वयोरेतादृशान्यूनत्वाधिक्यवर्णनाभावेसादृश्यप्रत्ययइतिरिक्तंवचः कथंतु
लयामः कलयापिपंकजमित्यादौ सर्वथैवसादृश्यनिषेधप्रतीतेश्च· तस्माद्वयोरेतादृशान्यूनत्वाधिक्य
वर्णनाभावेसादृश्यंपर्यवस्यतीत्येतावतैवोपमागर्भत्वव्यवहारः सोपिपंकजमित्यादौ सर्वथैवसादृ
श्यनिषेधप्रतीतेश्च· तस्माद्वयोरेतादृशान्यूनत्वाधिक्यवर्णनाभावेसादृकुमुदादतिरिच्यतेमुखमि
त्यादौ व्यतिरेकस्यालंकारत्वाभावाय· किंचव्यतिरेकेगुणांतरेकथितेगुणांतरसादृश्यमपिचमत्का
रियथादेवदत्तेनसदृशोयज्ञदत्तः धनयस्याधिकंइत्यादौ· तत्रविद्यादिकृतसादृश्यस्यापिचम
त्कारित्वात· उत्कृष्टविद्यत्वेनदेवदत्तस्यप्रसिद्धत्वादितिबोध्यं· गुणांतरकृतनिषेधोत्यापीति·
गुणांतरकृतसादृश्यनिषेधोत्यापीत्यर्थः अत्रचालंकारेइतिव्यतिरेकालंकारेइत्यर्थः तादृशो १५३

न· शब्देन· तदभावो· सादृश्याभावो· तथा· चमत्कृतिजनको· तत्र· तेषांमध्ये· तावद्भेदावेव· चतु
र्विंशतिभेदावेव· केषांचिदसंभवादुक्तंप्रायशइति· तत्रतयोर्विषये· आलीतिसंबोधनेनायिकां
प्रतिवयस्योक्तिः गुरुरसाः कवीनामिमागिरः तेबहुमाधुर्यवर्षकादधराअधराअपकृष्टाइत्यर्थः
शब्दइतिगुणाधिकमित्युक्तेरितिभावः शब्दइतिअधराइत्युक्तेरितिभावः एवंउक्तप्रकारेण
त्रयमोपिउपमेयोत्कर्षोपमानापकर्षसादृश्याभावरूपं· अर्जुनाः श्वेताः उग्रशीतइति· यथासं
ख्यमन्वयः उदाराशयेतिसंबोधनं· कुहूरजरीअमारात्रिः एवव्यावर्त्यमाहनत्विति· व्यंग्यइति
तुकदापिनभ्रमितव्यमित्यर्थः मात्रपदेनविशिष्यप्रतियोग्यनुयोगिनिवेशव्यवच्छेदः यासं·
गतं· सिद्धांतमाहासदेतदिति· अत्रहेतुमाहयतइतितततदायुज्यतेति· कालांतरेपियौवनसु
प्रियावलोकनादिनासफलीकारः स्यादितिभावः हतेतिदुर्भाग्येत्यर्थः उक्तहेतोरितिभावः गु

१४४ णत्वेन तत्त्वेनैव गमयितुं यौवनमित्यस्यानुषंगः असांप्रतं न सूक्तं निदानत्वाद्यनुपात्तेति निदानत्वादि
रूपो योऽनुपात्तो गुणस्तत्कृत इत्यर्थः अन्यथेति उपात्तानुपात्तगुणकृतोत्कर्षानंगीकारे इत्य
र्थः अस्यापुष्टत्वापत्तेरित्यत्रान्वयः सतस्येति उपमेयस्योत्कर्ष इत्यर्थः वाक्यार्थपरिपोषकतयो
त्कर्षात्मनेति पाठः अयं द्रोहः सः हालाहलः हालाहलोऽस्त्रीति कोशात्तु त्वमपि तद्धर्मस्य
यौवनधर्मस्य रक्त इति सीतापहारोत्तरं श्रीरामस्याशोकतरुं प्रतीयमुक्तिः रक्तो रक्तवर्णः
अनुरक्तश्च शिलीमुखाः बाणाः भ्रमराश्च कांतापादेति कामिनीपादाघातेनाशोकस्य पुष्पो
द्गम इति कविप्रसिद्धिः नायके तु पक्षाख्यबंधाभिप्रायेण तदुक्तं धृतैकपादाजघने कुर्वीतस्यन्य
हृदाहतिं शनैः शनैर्निधुवने पदाबंधस्तदा मत इति इत्याद्यनुकूलतयेति अत्रेदं चिंत्यं उ १४४
पमानादुपमेये वर्ण्यमाने वैलक्षण्यमेव गुणाधिक्यकृतं व्यतिरेकः तच्च क्वचिदुपमेयोत्कर्ष

पर्यवसायिकचित्रत्वदपकर्षपर्यवसायिकचित्रत्वदनुभयपर्यवसायिआधिक्यन्यूनत्वशब्दावुत्कर्षा
पकर्षपराएव· तत्रापकर्षपर्यवसायिरुक्तस्त्वमित्यत्र अत्रोपमेयेसत्त्रोकत्वादिगम्यचेतनत्वस
हृदयत्वादिभिः शोकरहितत्वच्छोकसहितत्वाभ्यांचतत्तद्गुणाधिक्यप्रतीतावपिशोकस्यस्व
रूपेणापकृष्टस्याद्रिहिवाकमलाच्चवरमचेतनत्वमेवसम्यक्नपुनः प्रियावियोगादिजन्यशो
कास्यदचैतन्यादीतिप्रतीतिपर्यवसानात्तद्विरहानुगुणकविनिबद्धतात्पर्यविषयोऽपकर्षः
पर्यवस्यतिअतएवप्रियावियोगाथपितुल्यमित्यर्थकमावयोः सर्वतुल्यमितिवाक्यंचरितार्थं·
एतेनरत्याद्यनुकूलत्वादिउदाजड्डेरित्यंतमपास्तम्· सशोकत्ववर्णनेपिरुकत्वादिधर्तैः सा
दृश्यस्यविप्रलंभपरिपोषकतयाचमत्कारिणः सत्त्वेनतदपह्नवस्यकर्तुमशक्यत्वात्अन्यथो
त्त्वत्यादिकृतसादृश्यस्यापिप्रतीत्यनापत्तेः अलंकारवियोगोदाहरणेतुभुवनत्रितयेपीत्या

१४५ दिवोध्यमितिवोध्यं· अन्यथाउपमाहूरीकरणस्याहृद्यत्वे· एवंजातीयः धर्मांतरकृतसाम्यसमाना
145 धिकरणः नतुप्रागुक्तः साधारणइतिभावः हृदन्तरैतिकृपणस्यदानकथाशून्यस्यकृपाणस्यच
खड्गस्य आकारतःतद्रूपदीर्घवर्णात आकृतेश्चकेवलंभेदोवैलक्षण्यप्रकारांतरेणतुसाम्यमे
वतदेवाह हृदन्तरेत्यादिविशेषणत्रयेणधनव्ययवैमुख्येनहृदन्तरंनिवद्धातुष्टिर्येन· मुष्टिग्रासो
भागोयस्येतिच· कोशोभांडागारंविधानंचतत्रनिषस्यउपविष्टस्यस्थितस्यचसहजेनस्वभा
वेनमलिनस्यमलिनवेषस्यअनुज्ज्वलस्येतियावतकृष्णवर्णस्यच· अत्रदैवैलक्षण्यंनतत्वपर्य
वसायिनाव्याधिकपर्यवसायिकिंतुस्ववैचित्र्यमात्रविश्रांतमितिभावः आयुष्मतेति· अत्रेदं
चिंत्यंश्लेषेपिनात्राभेदाध्यवसायः सर्वदोमाधवइतिवत· किंतुपरस्परान्वितयेदीर्घाक्ष १४५
रादवयवसेस्यानाच्चभेदइत्यर्थद्वयामितरान्वयि· किंवाभेदाध्यवसायेपिनास्यसाधारण्य

भेदग्रावेनतस्यतिरस्कारेणोपमानिष्पादकत्वाभावेनसकलकलमित्यादिवैलक्षण्यात्यद
पितस्योपमानरूप्तित्वेनेत्यादि·तदपिनदुपमानत्वंहिसादृश्यप्रतियोगित्वंतच्चप्रतीपालं
कारविधयाकल्पनस्यास्त्वेवदीर्घाक्षरत्वरूपगुणस्याधिकस्यतदन्यस्मिन्कल्पाणेसत्वाच्च·
अकलंकमुखसदृशोनसकलंकश्चंद्रइत्यादौव्यतिरेकस्यैवमेवनिर्वाह्यत्वात्·यदप्यनुभ
यपर्यवसायिनोव्यतिरेकस्योदाहरणमित्यादि·तदपिन·उत्कर्षापकर्षोभयापर्यवसायीत्य
र्थकानुभयपर्यवसायीतितदंथपाठात्अनुभयपर्यवसायित्वेनचैतदेवोच्यते·यत्सकतां
तुमुणोत्कर्षापकर्षपर्यवसायित्वाभावेनविद्यमानस्यापिव्यतिरेकस्यनालंकारत्वंकिंतु
वस्तुतामात्रमिति॰अलंकारश्चात्रगम्योपमैवकल्पनकल्पाणयोःश्लेषलब्धाकृतेदीर्घा
क्षराच्चभेदोपेऽइतरत्सर्वंतुल्यमेवेतिपर्यवसानात्·ततस्तत्चमत्कारस्यैवसत्वाच्चेतिबोध्यं

१५६ 146 उपमेयानुत्कर्षयेति· उपमेयोत्कर्षप्रयोजकत्वाभावादित्यर्थः अर्थांतरेणोन्नतस्येत्यस्यानुषं
गः सः निर्भरः उपमायामिति· अत्रेत्यस्यानुषंगः कूटेति मिथ्याकार्षापणेत्यर्थः अलंकारांतरो
त्थापीति· श्लेषान्यालंकारोत्थापितोपीत्यर्थः अयंव्यतिरेकः अत्रेति रूपकोपमा आद्यर्धे उप
मेयस्यापि तुरुत्कर्षिका· द्वितीयार्धे· नन्वयोपमाता दृशामातुस्तथा· तृतीयार्धेस्तु उपमेवता
दृशस्य पितुः स्वस्य चापकर्षिकेत्यर्थः उपमा एवेति एवेन रूपकादिव्यावृत्तिः त्रिविधेति अ
नुगामिबिंबप्रतिबिंबभावापन्नशुद्धसामान्यरूपेत्यर्थः तृतीयस्यापीदमेवोदाहरणमित्याह
लालित्येति· स्वाश्रयेति कमलेत्यर्थः अभेदनिषेधालीढेपीति पाठः यथेति चेद्वस्तु सकलंकः उ
परागिसातंकः षोडशकलः सदा न पूर्ण इति व्यतिरेकः इति व्यतिरेकः ॥ सहोक्तं लक्षय
ति अथेति· गुणेति गुणप्रधानभावावच्छिन्नयोरर्थयोः सहार्थसंबंध इत्यर्थः तच्च हृद्यलंच· श्ले १५६

षतिश्लेषमूलकेत्यर्थः केवलेतिनिगीर्याध्यवसानरूपयेत्यर्थः अतिशयोक्त्यात्तत्सहकारेण·
अन्वयानुयोगिनइतिशेषः अनुप्राणने पोषणे· अन्योन्येतिअन्योन्यं विदितमैत्रीविचायाभ्यां
तौअदृष्टदिल्लीशाविस्यर्थः अत्रतादृशसहार्थसंबंधसत्त्वेपितयोः समप्राधान्येनगुणप्रधा
नभावाभावइतिभावः प्रतिभूपतीनामित्यस्यत्रिषुसंबंधः जीवाप्रसंचो· ननुविपर्ययएवकथ
मतआहनिष्केति· क्रुधाविष्टइतिपाठः क्रोधाविष्टइत्यपाठः तेषु·रिपुषु· क्षितिशापनेति·
द्वितीयभेदोदाहरणमाहत्वमिति· कृतिं क्रियां· अत्रशत्रूणांविपदमित्राणां संपदितिबोध्यं·
तृतीयभेदोदाहरणमाहपद्मेति· कच्चः किरणाः प्रकटेतिउन्मीलमपदार्थप्रकटत्वादिरूपे
कोपाधिवैशिष्ट्येनामिलीकृतयोरित्यर्थः आदिनानिमीलनपदार्थाप्रकटत्वपरिग्रहः अ
तएवेत्यस्यार्थमाहतस्येतिश्लेषस्येत्यर्थः एवंचनिगीर्याध्यवसानरूपातिशयोक्तेरयं विष

पदार्थान्तरेति अखंडेत्वर्थः अन्वेत्वेति·
तथानंगीकारादितिशेषः तमेवाहास्तीत्यादि
ना·३

१५७ 147 यद्वतिभावः प्राधान्येनेति द्वयोरित्यादिः यथायथमिति प्रकृतत्वमाश्चाद्यौ प्रकृताप्रकृतत्वेवेत्यर्थः ए
षा सहोक्तिः निर्देशेति· अर्थयोगे तृतीया न तु शब्दयोगे इत्यनेन ज्ञापनादिभावः गमोति सहो
क्तिरितिशेषः शाब्द एवेति· तत्प्रयोगाभावेपीति भावः यावतो यस्मात् सः अप्रधानभावः सखंड
मितिविशेष्यतारव्यविषयतया प्रतीयमानत्वरूपं स्येति तत्से त्यर्थ अप्रधानत्वस्येति तदर्थः शा
ब्दक्रियान्वयित्वरूपं वेत्यर्थः तदभावेपि तत्प्रतीतेरहाखंडं वेति· अभुभवनलोटद्ववे परीत्यं नेति
भावः तदाह यद्वश्यादिति· अप्रधानत्वनन्वेवमपि प्रथमाया अविषये दोष एवात आह पुत्रेणेति· का
रकेति· षष्ठ्या इत्यर्थः नन्वेवमप्युक्तार्थतात्पर्यग्राहकत्वेन तदावश्यकेमतेआहान्यथेति· एवम
पितदंगीकारे· आपन्नेरिति· विशेष्ये षष्ठीवारणतां सर्वग्राहकत्वेनेति भावः उपसंहरति तस्माद् १५७
ति· तत्र हेतुतृतीयायां· नान्वप्रधाने इत्युक्तेः र्थमप्रधानत्वशक्तिरिति धर्मिणः शब्दत्वं नं तस्येति

प्रागुक्तंविरुध्येतातआहधर्मातिः·अव्याहतमेवेति· तत्रहेतुतृतीयाविशेष्यत्वेनतत्त्वाभावेपिप्रका
रतयातत्त्वमस्त्येवेतिभावः नन्वेवंषष्ठीसत्त्वेपितथापत्तिरतआहषष्ठीतिःएतेनेत्यस्यार्थमाहोक्तेति·
कृतमिति·अत्रेदंसर्वंचिंत्यं· अप्रधानग्रहणमस्याख्यानपरभाष्यविरोधापत्तेः·अप्रधानेतत्स
म्भिन्नस्येः सहतोराजेत्यत्रतृतीयानापत्तेश्च॰शिशासहसेनागच्छतीत्यादौतृतीयानापत्तेश्च·अंत
रंगत्वस्यदुर्वचत्वेनतथोक्तेरसांगत्वाच्च·बोधस्यान्यथाद्रक्ष्यमाणत्वाच्च·सहोक्तिलक्षणंच
यत्रैकस्यशाब्दः क्रियान्वयोऽपरस्यसहार्थबलादार्थःसाकसहोक्तिरितिकाव्यप्रकाशकृताप्ये
वमेवोक्तिः स्पष्टंचैदंसर्वमंनूयासविति· संभवादिति·अतएवप्रायोगेत्युक्तं·किंतुप्राधान्येति·
प्रधानमुपमेयमप्रधानमुपमानमितिबोध्यं· इतीत्यस्यबोध्यमितिशेषः·अस्याःसहोक्तेःसाअति
शयोक्तिःअतिशयोक्तेरिति·उक्तरूपेत्यादिःएवमग्रेपि·विच्छित्तेः चमत्कृतेः तस्यैव·विच्छित्ति

१५८ विशेषस्यैव· अपृथगिति उपमातइत्यादिः इहाद्याविति मिथइति शेषः अन्यथा तु हि लक्षणेप्यपृ
1458 थग्भावे· तत्प्रयुक्तस्येति· निशाकरसमानत्वेनैव वर्णितापेक्षया साक्षान्निशाकरत्वेन वर्णिते मा
समानस्य प्राक्साक्षान्निशाकरत्ववर्णनप्रयुक्तस्य व्यतिरेकस्येत्यर्थः सहभावो क्वाविरिति· अनेना
स्यागुणत्वं दर्शितं अभेदाध्यवसानेतीदमुपलक्षणं श्लेषमूलाभेदाध्यवसानस्यापि हि· यतः
उपस्क्रियते· संस्क्रियते· ननु स्यादेवं यदि सहोक्ते· प्राधान्यमतिशयोक्तेश्च गुणत्वं निश्चितं स्यात्तदे
वतु नवैपरीत्यस्यापि संभवादत आह गुणेति· श्लेषमनाभेदाध्यवसानमूलायामपि सावकाशा
त्वमाह तस्य अध्यो· भेदाध्यवसानस्य· सातु· अतिशयोक्तिस्तु· श्लेषोदाहरणमाह वर्षतीति· के
वलाभेदाध्यवसानोदाहरणमाहोन्मीलंनइति एकेनेति उपमानेनोपमेयस्येत्यर्थः गंधोपि· लेशो १५८
पि· नैवमत्रैव किंतु अन्यत्रापीत्याहातीति क्वचित् अनुगामित्वभावादाह प्रायश इति· उपसंहरति

तस्मादिति· निर्विषयत्वं परिहरति अभेदेति· इदमुपलक्षणं प्राग्वत· इहतु सहोक्तौ तु तद्वांतरेति
अलंकारान्तरे इत्यर्थः निरस्यत· त्यज्यते· दाक्षिण्यं संकोचः इयमपि अवच्छिष्टेति विधापि· किंचि
दिति· उक्तरीत्याऽन्वयत इत्यर्थः वचनभंगीनां· वैचयरचनानात्रापीना एवेति· एवं चेत्तदनुनवत्वे
नैव गुणप्रधानभावकृतविच्छित्तिविशेषमाश्रित्य सर्वस्वकारायुक्तः कार्यकारणपौर्वापर्यवि
पर्ययमूलोपि सहोक्तेः प्रकार आश्रयणीय इति तत्त्वं उक्तं प्रागुक्तं किंचित्यमिति वोध्यं· अन्यथा·
तदनुभवप्रामाण्यानंगीकारे· व्याकुलीति प्रोगुपपादितमिदं तमाले· साधारणधर्मत्वे· मांथर्य
मंदत्वं· क्रियापीति· प्राप्यादिरित्यर्थः एवं च गुणस्य तथात्वे दहिरणत्वाक्तिरयुक्तेति भावः नां
तरीयकत्वेनेतितं विनावाक्यार्थासमाप्तेति भावः समग्रेति· विच्छित्याधायकत्वेत्यादिः श्रोणत्वे
ति· अधरे श्रोणत्वं मनस्या+ ननेव पिमांथर्यं श्रोत थात्वे परिस्फाघं ग्रे धर्मयोर्भेदात्स्क थं नत्व मत आह + २

१४९ ज्ञाणत्वेति॰ अधरेक्षोणत्वं मुनस्यासक्तत्वं नितंवेऽधिकभारत्वं कामे उपदेशाकर्तृत्वमितिबोध्यं॰ तृतीयभे
149 दं प्रवमेवापिंडीकरणमित्याहैवमिति॰ ननु प्रागुक्तसहोक्त्यपेक्षया न वैलक्षण्यमत आह वैलक्षण्यं चेति॰
तथा च विलक्षणत्वस्य मिथो भिन्नेत्यर्थः सूचितः नन्वेवं केशोरिस्तत्रापीयंभेदत आह केशोरीति॰ न
नु धर्मैक्योपितद्भेदेनेयं स्यादेकं त आह सतिवेति सत्यपीत्यर्थः यथाकथंचिदिति॰ धर्मोपमानान्यतररूपेणे
त्यर्थः प्रकृताभिप्रायेणाह धर्मैक्यादिति॰ अत्र मालासहोक्तिलक्षणे॰ क्वचित धर्मवैलक्षण्यमप्युपना
मेदान्तेयनित्यादौ न्मीलमिति॰ नन्वेवं तर्हि किमस्या उदाहरणमत आह भाग्येनेति॰ तत्र धर्मोपमान
योर्भेदादितिभावः उन्मूलितः समूलं खंडितः वलारिः इंद्रस्य॰ एवं नश्लेषादिप्रकारद्वयव्यावृत्तिः नि
दर्शनेति सह वावाकार्थयोरैक्यानोपादितिभावः गतेतु सहोक्तौ इति शेषः प्रकारद्वयेनेति श्लेषभिन्न १४९
प्रकारद्वयेनेत्यर्थः इतिसहोक्तिः विनोक्तिं लक्षयति अथेति॰ चिनार्थसंबंध एवेति पाठः न

त्व· हृद्यत्वंच· उद्देशक्रमवैपरीत्येनारमणीयत्वेतावदुदाहरतियथेति· सद्यः संभा· मानसंअंतः क
रणं· पूर्वौ अरमणीयत्वोदाहृतत्वावच्छिन्ना· तयोर्नैराजेयोर्वर्णनेननदीयत्वेनसर्वेषांप्रकृत
त्वात्· इयंरमणीयत्वादाहृता· मिश्रितापथेति· विनाकृतस्यवस्तुनोरमेणीये त्वारमणीयत्वा
भ्यांमिश्रितेत्यर्थः रागमनुरागंत्वोहित्यंचकौटिल्येन· वक्रांतःकरणेनवक्रतयाच· त्रासोभयं
दोषश्च· दानंवितरणंमहज्जलंच· द्विपाः गजाः अतएवाहात्रेति· इदं पूर्वोदाहरणेपिबोध्यं· नालः सं
गीतशास्त्रप्रसिद्धोध्वनिविशेषः दीपकासंसृष्टंविषयंप्रदर्शयन् अरमणीयत्वेउदाहरतिय
थेति· नशोभतेइतिसर्वत्रबोध्यं· यतिः संन्यासी· स· क्रियादिसंबंधः नतथेति· नावश्यकेइस
र्थः अयमेवसर्वतोविशेषइतिभावः इयंचविनोक्तिश्च· आदिनेनादिसंग्रहः वनिर्गुणइति· वक्रो
ऽवरोपिनापुरुष· निर्गुणः सन्निवशोभेइत्यर्थः चेतनाबुद्धिः तस्याभेत्यं विनैवतेषांप्रती

१५० तिर्भवतीत्यर्थः शोभस्येति मृणालादिभिः सहेति शेषः एवं रमणीयत्वे उदाहरणं दत्वाऽरमणीयत्वे उदाहर
150 ति· यथावेति आलीराहृष्टा न्यक्कारः तिरस्कारः यदंतरिति· श्रवणयुगलांतरित्यर्थः त्वद्दर्शनं भागीरथीद
र्शनं· तस्य च व्यज्यमानारमणीयत्वस्य· भावेति कविनिष्ठगंगाविषयकेत्यादिः अन्यथा· अनुग्राहकत्वा
त्तद्व्यपदेशानंगीकारे· एवं च तस्य तद्व्यपदेश्यत्वे च· वैलक्षण्येनेति पूर्वोदाहरणापेक्षयेति भावः इति
विनोक्तिः समासोक्तिं निरूपयति अथेति· वाक्येनोक्तमर्थं सामस्त्येनाह समाधारणेति· मात्रपददान
फलमाह शब्देति तत्र· शब्दशक्तिमूलध्वनौ· अपिना विशेषणसमुच्चयः ताद्दशेति अप्रकृतेत्यर्थः
अलकाः केशाः अलका कुबेरपुरी· चोलः कंचुकं देशश्च· रसाकांक्षेयेति पूर्वान्वयि· रसः शृंगारो वीरश्च
अलंकायस्याववशातांलंकायाः वशातां च लंघाललाटसमाहारस्तनं· जंघाललाटदेशयोर्नाशं चेत्यर्थः
अहो इत्याश्चर्ये हे नृपेंद्र भवतः परिमर्दनिर्दयं चेतः प्रसर्गं प्रत्यवयवं अंगं अंगं देशं समालंबते चामानोत्सुर १५०

दरीणां वक्राणां शत्रूणां च प्रकृतेतिराजेस्यर्थः तयोः प्रस्तुताप्रस्तुतत्वयोः तत्संग्रामादौ राजसंग्रामादौ मात्र
वर्णनेतिवर्णनमात्रेस्यर्थः क्वचित्तथैव पाठः मलिनेपीत्यादि समन्तम्यं तानि त्वमीत्यस्य विशेषणानि
उपात्तत्वं विशेष्ये अन्वेति· विशेष्येणापीति अपितविशेषण परिग्रहः तथा च विशेषणमात्रोप
स्थापितत्वाभावान्नातिप्रसंग इति मात्रपदस्यैवं कृत्यमिति भावः ननु तर्हि किमिति द्वितीयमिदं द
त्तमत आह यदि त्विति· समासोक्तौ यप्रस्तुतदृष्टान्तं तत्समारोप एव चारुताहेतुरिति प्राचः तेषामयमा
शयः अयमैन्द्रीत्यादौ श्लिष्टविशेषणप्रतीतप्रस्तुताप्रस्तुतदृष्टान्तं तयोः श्लेषभित्तिकाभेदाध्यव
सायेनाभिन्नयोः प्रस्तुतचन्द्रादिदृष्टान्तिता· तत्र तयोर्दृष्टान्तयोः परस्परं विशेष्यविशेषभावे कामचारे पि
प्रस्तुतदृष्टान्तं तविशेष्यः तद्बोधकवोध्या प्रस्तुतस्तु अभेदेन तद्विशेषणं एवं चाप्रस्तुताभिन्नप्रस्तुत
स्य चन्द्रेणान्वयः तत्र यद्यपि प्रस्तुतस्य स्वासाधारणधर्मेण चन्द्रेऽन्वययोग्यताऽस्ति· तथाप्यप्रस्तु

१५१ तामेदमापन्नस्यनमाअस्तीतितद्रूपावच्छिन्नस्यतस्याप्रकृतेधर्मिण्यारोपः एवंचाप्रस्तुतव्यवहारसमा
151 रोपपदेनप्रस्तुतव्यवहारतादात्म्यापन्नसमारोपेणतरान्वयायोग्यस्येतरतादात्म्यापत्त्यातद्योग्यत्व
वत्त्वतोऽन्वयायोग्यस्यापीतरतादात्म्यापत्त्यातद्योग्यत्वस्यापिसत्वात्· नचरूपकवत्समासोक्ता
वपिप्रस्तुतेऽप्रस्तुतरूपसमारोपएवचारुताहेतुरस्तु· तद्वाचकपदसमभिव्याहाराभावेनतस्यासं
भवात्· नचाक्षिप्तनायकादिनाआक्षिप्तरूपकेभवतु· निरीक्ष्यविद्युन्नयनैः पयोदस्त्वत्रपयोदद्र
ष्टृपुरुषरूपकाक्षेपकनिरीक्षणवदाक्षेपकाभावात्तनचविशेषणसाम्यप्रतीताप्रकृतवृत्तांत
एवाक्षेपकोऽस्तुअप्रस्तुतस्यप्रस्तुतविशेषणतयातस्यप्राधान्याभावेनानाक्षेपकत्वात्· नचतत्ता
दात्म्यापन्नस्यप्रकृतेचंद्रेऽन्वयायोग्यतयातस्याक्षेपः आरोपेणाप्युपपत्तेः एतेनाक्षेपासंभवेपि १५१
परनायिकामुखचुंबनस्यश्लेषमर्यादयाप्रतीतस्यप्रकृतधर्मिणिचंद्रे आरोप्यमाणस्यजारासा

धारणधर्मत्वेन प्रकृतधर्मिणि जारत्वव्यंजकता सुवचा· नच चंद्रे जारत्वारोपमंतरेणापि जारव्यव
हारारोपसिद्धेरनुपपत्त्यभावान्न जारत्वं गमयेदिति वाच्यं व्यंजनाया अनुपपत्तिं विनापि प्रसरा
त्· गतोऽस्तमर्क इत्यादौ तथैव दर्शनात् तादृशनायकनायिकासंबंधविशिष्टव्यवहारज्ञाना
त् एवंच वाच्यार्थबोधकालिकचमत्कारबीजमात्रमत्र निरूप्यत इत्यदोषः· अपिच तादृशो व्यं
ग्यस्याधिकचमत्कारित्वेन ध्वनिव्यवहारयोग्यतायां नालंकारशरीरघटकता· एवंच समासोक्ते
स्तादृशध्वन्युपस्कारकतयाऽधिकचमत्कारकारित्वं अलंकारत्वंच· नचैवं समासोक्तौ रूपकध्व
निनैव निर्वाहे पृथगलंकारत्वं नस्यादिति वाच्यम् वाच्यार्थबोधकालिकचमत्कारस्यापह्नो
तुमशक्यत्वेनालंकारत्वस्य दुरपह्नवत्वात्· विपरीतं नायकत्वारोपव्यंजनस्य समासोक्तौ
नर्भविवदतो ध्वनित्वस्य दुर्वारत्वाच्च न तद्व्यंग्यस्याधिकचमत्कारकारित्वेन प्रधानत्वात्· नच

१५२ श्लिष्टशब्दोपस्थापितयोर्वृत्तान्तयोः परस्परमभेदेनान्वये मानाभावः सहृदयहृदयस्यैव प्रमाणत्वा
त्। अत एवागस्त्ये संप्रति वियोगविसंष्ठुलांगीमित्यत्रार्थशक्तिमूलो नायकनायिकावृत्तान्तो वाच्यर
विकमलिनीवृत्तान्ताध्यारोपेणैवस्थित इति प्रदीपकृतः। प्राचीनास्तु भवमपलप्यापि यद्येकत्र यद्व
मितिरीत्या प्रस्तुताप्रस्तुतवृत्तान्तयोर्विशेष्यविशेषणभावेनान्वयः स्वीक्रियते एवमपि वाच्यार्थबोधकाले
प्रस्तुते धर्मिणि अप्रस्तुतजारत्वारोपप्रसक्त्या। तथाहि यद्यप्यनयोर्भिन्नपदोपात्तविशेषण
योरिव विशेष्येणैव साक्षादन्वयात्समप्राधान्यमस्तीति स्वीक्रियते तथाप्यप्रस्तुतवृत्तान्तान्व
यानुरोधात्प्रस्तुतेऽप्रस्तुतरूपसमारोपः प्रस्तुतेऽप्रस्तुतवृत्तान्तारोपेणैव सिद्धः। अप्रस्तुतरू
पसमारोपेऽपि प्रस्तुतवृत्तान्तान्वयायोग्यतायास्तदवस्थत्वाच्च। नन्वेवं सति विशेषणसाम्यादप्र १५२
स्तुतस्यागमात्त्वसमासोक्तिरिति प्राचीनलक्षणासंगतिः। अप्रस्तुतधर्मव्यंजनस्यत्वयाऽनपे

क्षणादितिचेन्न· स्वरूपतोऽप्रस्तुतवृत्तांतारोपस्याचमत्कारित्वं किं त्वप्रस्तुतकामुकादिसंबं
धित्वेनावगम्यमानस्यैतस्यारोपः अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितन
चुंबनादिनायं द्वाचंद्र इत्येतद्धृत स्त्रीलिंगपुंलिंगसहकृतेन तत्संबंधिनिकामुकादौ अभि
व्यक्तेः पुनस्तदीयत्वानुसंधानात् विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापे
क्षणात् अप्रस्तुतस्येत्यस्याप्रस्तुतव्यवहारस्येत्यर्थो वा· एतेन वदनचुंबनस्य पुत्रादिसाधारण्या
त्कथं कामुकाभिव्यंजकत्वं · किं चाहमुखं चुंबति भानुबिंबमित्यत्रापि नायकाद्यभिव्यक्त्याप
त्तिरित्यपास्तम्· यत्तु चंद्र ऐंद्रीपदगतलिंगाभ्यां अभिव्यक्तनायकयोः स्वव्यंजकपदोपस्थ
पिताभ्यामभेदेनैवान्वय उचितः समानपदोपात्तत्वप्रत्यासत्तेरिति तन्न· एवं हि वदतो व्यवहा
रावच्छेदकत्वं तयोः स्वीक्रियते न वा आद्ये एकस्यार्थस्योभयत्रान्वयोऽव्युत्पत्तिप्रसक्तेः अंत्ये

१५३ 153 रसाननुगुणत्वंमरपिऐंद्र्यादेर्नायिकात्वाभावेनकेवलंव्यवहारावच्छेदकत्वमात्रस्वीकारेबाधः
नायिकात्वानालीढकेवलैंद्रीमुखचुंबनरूपस्यव्यवहारस्यनायिकासंबंधित्वात्ःनहिहादिकृता
दात्म्यंविनानायिकायाःपृथक्मुखविशेषयितुंसामर्थ्यमस्तीतितदपिनमुखशब्दश्लेषसा
मर्थ्येनैंद्रीमुखमित्यस्यसमस्तस्यापिऐंद्र्यंशोमोयेणकेवलमुखचुंबनस्योपस्थितेःतदेत
दुक्तंकुवलयानंदेश्लेषादिमहिम्नास्वरूपतःसमर्पितेनवदनचुंबनादिनेतिनत्वैंद्रीपदश
क्त्यार्थेनदिग्रूपेणवदनरूपमुखपदार्थस्यान्वयोवक्तुंशक्यःसहृदयैःनन्वेतादृशकुत्सापिक
ल्पनापक्षयाविशेषणसाम्यमहिम्नाप्रतीतोःप्रकृतवाक्यार्थःपुंलिंगास्त्रीलिंगाभ्यामभिव्यक्त
नायकाद्यभिन्नचंद्रादिघटितप्रकृतवाक्यार्थस्यावयवतादात्म्यापन्नतदवयवोःवातिष्ठतेऽस्ये १५३
वकल्पयितुंयुक्तं·एवंचनायिकाभिन्नऐंद्रदिशासंबंधिवदनाभिन्नप्रारंभेकर्मकचुंबनरूपसं

वंधाश्रयोनायकाभिन्नश्चेद्इतिवो भइतिचेन्नएवहिसैंद्यांनायिकाभेदप्रतीतौमुखचुंवनादौवदन
चुंवनाद्यभेदप्रतीतावपिवदनचुंवनेसाक्षान्नायिकासंवंधाप्रतीत्यारसोद्बोधानापत्तेः नचव्यंज
नयातत्प्रतीतिरस्त्येवयस्मिन्यदभेदस्तत्संवंधिनितत्संवंध्यभेदइतिन्यायेनवामानसिकीतत्प्रती
तिस्ततएवचमत्कारइतिवाच्यंतदपेक्षयासाक्षाच्चमत्कारोपपादकवाच्यार्थवोधप्रसादनस्य
वोचित्स्यात्· ननुव्यंजनयाअप्रकृतार्थवोधः शक्तेः प्रकरणादिनानियंत्रणात् ततोव्यंजनमा
हात्म्यादेवप्रकृतवाक्यार्थतादात्म्येनावतिष्ठतेइतिचेत्तर्हिवैयंजनिकोऽप्रकृतार्थवोधोना
यिकाद्यविशेषितोविशेषितोवा· नाद्यः रसाननुगुणत्वात्· अंत्येएवपदोपस्थापिताभ्यां
लिंगाभ्यांनायिकाद्यभेदवोधोव्यर्थोऽसंभवीच नायिकाविशेषणकव्यवहारवोधनेनकृता
र्थत्वात्· अपिचतथासतिजारकर्तृकसानुरागपरनायिकाद्यभेदवोधोव्यर्थोऽसंभवीच·

१५४ नायिकाविशेषणकव्यवहारबोधनेनकृतार्थत्वात्ः अपिचतथासतिजारकर्तृकसानुरागपरना
157 यिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयोगाश्रयोजाराभिन्नश्चंद्र इतिबोधकादर्थनेमेवस्यातः
तस्माद्व्यंजनयाप्रस्तावोपस्थितप्रस्तुतवृत्तांतेनव्यंजनयोपस्थितनायकादिसंबंधित्वेन
गृहीतेनाभेदमापन्नप्रस्तुतवृत्तांतारोपः प्रकृतविशेष्यनव्यमतेश्लेषस्थलेऽप्रकृतोपस्थितेः
शक्त्यैवव्यवस्थापयिष्यमाणत्वेनचनव्यमतेनाभेदमापन्नप्रस्तुतवृत्तांतेवाप्रकृतार्थोपस्थितिः
प्राचांतुव्यंजनयेत्येतावान्विशेषः एवंचवाच्यार्थबोधोत्तरंयदिचंद्रादौनायकत्वादिप्रतीति
रपिसहृदयानुभवसाक्षिकीतदाऽस्त्वित्युपपादितमेवप्राक् एतेनमानिलक्ष्मीकाभवत्प्राचीप्र
तीचीयातिभास्करे·प्रियेविपक्षरमणीरक्तेकामुदमंचतीत्यत्रपूर्वार्धगतायांसमासोक्तौना १५४
यकत्वाप्रतीतावुत्तरार्धेप्रियत्वादिनासमर्थनायाः सर्वथैवानुपपत्तिरितिपरास्तंप्रस्तुतप्राची

वृत्तांते आरोप्यमाणाप्रस्तुतखंडितनायिकाविशेषवृत्तांतसमर्थनाय तस्यावश्यकत्वाच्च· एवंच सा
नुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयोगाश्रयश्चंद्र इत्येव बोधः एतेनायमैंद्री त्या
देशः शक्तिव्यंजनाभ्यां प्राचीप्रारंभसंबंधाश्रयश्चंद्रो जारसंबंधिसानुरागपरनायिकामुखचुंबना
श्रय इति बोधः अप्रस्तुतवृत्तांताभिन्नत्वेनाध्यवसितस्य प्रस्तुतवृत्तांतस्य तादात्म्येनाप्रस्तुतारो
पविषये प्रस्तुतधर्मिण्यन्वय इति मते तु सानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयो
गाश्रयो जाराभिन्नश्चंद्र इति बोध इत्यपास्तं· समासोक्तिर्गुणीभूतव्यंग्येति व्यवहारस्तु प्रकृ
तव्यवहारभेदस्य व्यंजनया प्रतीतेर्निर्वाध एवेति इति दिक्· तत्र उदाहरणीयसमासोक्तौ
तावत् आदौ असौ सत्रे स्वत्वे नान्वयः नैयायिकमते नाहं किरणेति· तावत्प्रतीयते आक्षेप्रती
यते· नायिकाविशेषेति खंडितेत्यर्थः आदिना नायकपरिग्रहः अनुषक्तया संवद्ध्यात

१५५ 155 येव· पूर्वोर्थवोधिकयेवतस्मान्नियंत्रणादाहशक्त्यंतरेणेति· अस्यापिदुर्वचत्वादाहव्यक्त्याविति व्यं
जनयेत्यर्थः एवंचउभयप्रतीतौच· वैयाकरणमतेनाहद्विप्रधानेति· वाक्यभेदमुद्धरतियद्विचेति·
वाधः स्यादिति· तथाचनवाक्यभेदइतिभावः एवमपिप्रथमदोषानुद्धारएवेत्याहनत्विति तिनमप्यु
द्धरतियद्विचेति· अश्लिष्टेतिभास्करेतीत्यर्थः भगवान्सूर्यः दोषांतरमाहपद्मिनीति· पद्मिनीश्ला
ष्टवन्नलिनीशब्दस्याश्लिष्टत्वादितिभावः तदेति आक्षिप्तनायकाद्यर्थेन· यतापरिपूर्णअत
एवविशिष्टंशरीरंयस्येत्यर्थः त्विति अप्रकृतवाक्यार्थे इत्यर्थः तदिति प्रकृतवाक्यार्थ इत्यर्थः
सच· अप्रकृतवाक्यार्थश्च· स्वात्मनांचेतिचस्त्वर्थः रूपकाद्भेदकमाहात्रचेति· समासोक्तौ
चेत्यर्थः स्फुटमेवेति· अस्यावाक्यार्थनिष्ठत्वादितिभावः वैलक्षण्यमित्यस्यानुषंगः एवम १५५
ग्रपि· उपसंहरतिएवंचेति उक्तदोषेचेत्यर्थः क्वचित्श्लेषाभावेनविशेषणसाम्यात्तदर्थप्र

नीतितिनञाक्षेपाभावेनानिर्वाहो भामहादीनां मते इति सूचयितुमाह निशेति· कादाचित्कसंभवादा
हनियतेति· ननु कादाचित्क एवेत्यर्थः तयोः निशाचंद्रयोः नायकेति स्त्रीपुंवच्चेत्येकशेषः एवम
ग्रेसर्वत्र· व्यतिरेकं दर्शयति निशामुखेति· स्त्रीधीति स्त्रीत्वस्यत्साधिकरणे एवेत्यमि· नन्वेवं क्व
चिदाक्षेपेण क्वचिद्व्यंजनया निर्वाह इति वैरूप्यं स्यादत आह श्लिष्टेति· तैरपीत्यर्थः एवेनाक्षे
पव्यावृत्तिः ननु शक्त्यैव कुतो नात आह शक्तेरिति शक्त्यंतरं तु दुर्वचमिति भावः इदं मतमुपसंह
रति तदिति एवः प्रागवत् व्यंग्याप्रकृतवाक्यार्थस्य प्रकृतपरिपोषकत्वादाह गुणीति तु भामहादि
मतवैलक्षण्यसूचकः त्वेति अप्रकृतव्यवहारेत्यर्थः चोत्यर्थः पत इति तदर्थः व्यवहाराश्रयत्वे
नेति· व्यवहारसजातीयव्यवहाराश्रयत्वेनेत्यर्थः तदाश्रयत्वस्य व्यंजनापि दुर्वचत्वादिति भावः
अत एवाह नायकसाम्यमिति· तच्च· साम्यं च· विशेषणत्वे· सतीति शेषः एवं सति व्यवहार

१५६ समारोपः क्वचिद्वार्थः स्यादित्याह किंचेति· व्यवहारासरोपएवेतित्त्वयावाच्य इतिशेषः एवव्याव
150 र्त्यमाह ननायेति रूपसमारोपस्यैतेनोनंगीकारादितिभावः तथासति दोषमाहैवं चेति· व्यवहार
मात्रारोपेचेत्यर्थः नायिकेतिनायिकासंबद्धस्येत्यर्थः नायकः साधारणेतिमुखचुंबनस्य पुत्रा
दिसाधारण्यादितिभावः इयंदोषमुद्धरतियदिचेति· निरीक्ष्येति· तथाचरूपसमारोपोनेतित्व
दुक्तिरसंगतेतिभावः अस्मदुक्तेति अत्रचाप्रकृतेत्यादिनोक्तेत्यर्थः अत्रसमासोक्तौच· वि
शेष्यराजादौ· सर्वथैव· आरोपानारोपान्यतरविधयाः कविसंरंभेति· सप्रतीत्युद्देश्यकत्वा
द्संदर्भरूपकविध्यापारेत्यर्थः फलितमाह ततश्चेति· अप्रस्तुतेति अप्रस्तुतसंबंधिव्य
वहारेत्यर्थः अप्रस्तुतेति अप्रस्तुतरूपेत्यर्थः तद्वाचकेति जारवाचकेत्यर्थः एतेन शाब्द आ १५६
रोपोनसंभवतीत्युक्तं नत्वाक्षिप्तेनायकादिना आक्षिप्तरूपकंभवत्वत आह नचेति अस्तीस

त्रान्वयः इह रक्तः इत्युदाहरणे· जारत्वस्य संगमकमित्यस्यानुषंगः एवमग्रेपि· विनिगमकमाहश्रु
त इति· तथाच श्रुतप्रस्तुतार्थोपस्कारकतया विच्छित्तिविशेषशालित्वमिति भावः स्वरूपतः अप्रकृत
व्यवहारत्वेन· चंद्रविशेषणस्येति· तादात्म्येन चंद्रारोपे तादात्म्यस्यापि संबंधविधया आरोपविषय
त्वात्तस्य चंद्रत्वानतिरेकाच्चंद्रत्वारोपे त्युक्तं न तु प्रकारतया चंद्रत्वारोपः अन्यत्र विशेषणत्वेनोपस्थि
तस्यान्यत्र प्रकारतया आरोपायोगादिति तदाशयाच्चिंत्यमिदं· भामहादिमते नाहश्लेषेति स्वमते
नाह व्यंजनेति· इदं सर्वं पूर्वमेव दूषितम्· जारेति· मिथुनजारव्यवहारारोपे इत्यर्थः दर्शनादिति· अ
नुपपत्तिं विनापि नानार्थव्यंजनदर्शनादित्यर्थः अन्यथा· अनुपपन्नत्वहेतुत्वे· अन्यथा· तदप्रती
त्या तद्विशेषणत्वानंगीकारे· एवं च· तदर्थे तत्प्रतीतौ च· सचिवाभ्यां सहिताभ्यां अन्यथा ताभ्यां न
व्यंजनं किंतु केवलचुंबनेन तदंगीकारे· एवं च· अतिप्रसंगभंगाय तत्सहितताभ्यां तदंगीकारे च·

१५७ 157 सामानेतिस्त्रीत्वपुंस्त्वेत्यादि· पर्यवसितार्थानंगीकारे आहापीति त्वदुपजीव्येति कुवलयानंदोपजी
व्यालंकारसर्वस्वेत्यर्थः अत एव तदाज्ञानुवर्त्तिनेति प्रागुक्ते अविनाभावात्· नियतसंबंधात्· तट्टीके
ति अलंकारसर्वस्वटीकाविमर्शिनीत्यर्थः· तदुक्तं तत्रैवउपतिकिंचेति पदपीत्यर्थः तदनालीढत्वा
दवकेवलत्वं· दोषांतरमाहापिचेति· यातीति सप्तम्यंतं· अंचति प्राप्नोति आदिना प्राच्यादिपरिग्र
हः नायकस्त्वेति एकदेशघातत्वः दोषांतरमाहान्यच्चेति· एवं चेति यत एवं सतीत्यर्थः सचासिद्ध इति·
अप्रकृतव्यवहारस्य प्रकृतासंबंधित्वादिति भावः प्रकृतव्यवहाराभिन्नाप्रकृतव्यवहारस्याभेदसंस
र्गेण प्रकृतविशेष्ये समारोपे प्रकारतयाअभेदांशे विशेष्ये तथा व्यवहारांशे आरोप इति गोरवा
दाहवरीयानिति· उपसंहरति तस्मादिति· रमणीय इत्यत्रास्यान्वयः स्वेति अप्रकृतव्यवहारविशे १५७
ष्यः प्रकृत इत्यर्थः तदिति प्रकृतव्यवहारविशेष्यप्रकृते इत्यर्थः तत्र प्रकृते· स च आरोपश्च· वा

क्यार्थरूपकमेवाहत्वसारेति· तयोः प्रकृताप्रकृतवाक्यार्थयोः वैशिष्ट्यस्यैव वाक्यार्थत्वादाह
वैशिष्ट्यमिति· अवांतरवाक्यार्थयोर्भिन्नत्वादाहमहेति· तस्येति प्रकृतस्य विशेषणपादद्वय
तिपाद्यत्वादित्यर्थः तदपि द्विधा तत्साम्यमपि· धर्मैरिति कार्यातिरिक्तधर्मपुरस्कारेणेत्यर्थः कार्याति
रिक्तधर्मप्रतिपादकविशेषणसाम्येनाप्रकृतार्थोपस्थापनं कार्यरूपधर्मप्रतिपादकतत्साम्येन
वेति द्वैविध्यमिति भावः एवं च चातुर्विध्यं सिद्धं· तत्र चतुर्णां मध्ये· पुनरिति गूढार्थस्य स्फुटतरबोधा
येति भावः उत्संगे करौ मध्ये ची पयः जलं दुग्धं च· पायं पायं पीत्वा· शायिताहे इति लुट् उत्तमपुरु
षैकवचनं· र ग शब्दस्यार्थावंतः तिर्यग्वर्तिनेति वक्रीकृतेत्यर्थः अतिसुकृतेति· अतिपुण्यसारस्व
पानित्यर्थः रसयतोऽनुभवतः हरमणीयकर्णभूषण· सर्वत्रस्वं तव जन्मजपतीत्यर्थः नवकां
तया नवोढया· त्रस्यग्रेति इदानीमेव त्वं इति तअधरो येनेत्यर्थः अंधेन चक्षुर्हीनेनाज्ञानिना च·

पातः पतनं नरकपातश्च· विषयदेशेषु नायिकादिषु च· इत्थमितिक्रियाविशेषणं· व्यवहाराभेदे
नेति गंगाहृदांतःस्थित इति भावः कार्यत्ति कार्यरूपधर्मकृतस्य इसाधारण्येनेत्यर्थ· देवेति रा
जानं प्रति कव्यक्तिः भविता सि अपितु न दुराचारसंबंधित्वात् तदेवाह यस्येति ननाकोडोमु
जांतरं· आग्राः टिङ्राः अंगम्या पपा अमराव — । मपीत्यर्थः ऽ क्षितां रतिकध्वंक्षि मादेत्यर्थः
विवलिताः वक्रे। कृताः न्यकृताः अधः कृताः केके न नर कृति अपितु सर्वा । पी सर्थः अत्र कं
टकचितत्वं कार्यान्यधर्मः रोमांचव्याप्तत्वं कंटकयुतत्वं च तस्यार्थः कवयोरिति ग्रहणं कार्यरूपो ध
र्मस्तस्यैव प्रतिपाद्यत्वात्· आदिना पार्श्वद्वयग्रहणादिसंग्रहः एवं सर्वोदाहरणेष्वपि यथापर्यवे
ध्यं· तत्र तयोर्मध्ये· तत्र· तत्र तद्व्यवहारप्रतीतौ· अन्यथा तत्समारोपस्याकारणत्वे· विशेषणेति
तेषामन्यसाधारण्यादिति भावः कादाचित्कस्य संभवादाह नियतेति· श्लेषेऽति व्याप्त्यापत्ते

रिति॰ तत्र विशेष्यस्याश्लिष्टत्वेपि विशेषणसाम्यस्याक्षतेरिति भावः विशेषणमात्रेति॰ मात्रपदेन
विशेष्यसाम्याव्यावृत्तिर्न विशेष्यसाम्यव्यावृत्तिर्धर्मान्तरविकासादेरिति भावः न श्लेषेइति॰ तत्र वि
शेष्यस्यापिश्लिष्टत्वादिति भावः समासोक्तेरिवेति॰ सर्वस्वग्रंथस्थितिंदूतात्स्र कृते॰ प्रकृतलताप्र
तीतावपि क्रियारूपतद्व्यवहारस्य कस्यचित्प्रतीतेर्नात्र समासोक्तिरस्यपि बोध्यं एतेन यदपी
त्याचपि पर्वसर्वस्वग्रंथः परास्तइति दिक्॰ एवं च उक्तव्यवस्थांगीकारे च उक्तमेव सदृष्टांतमाह
ययेति॰ तत्रहि अंधेनेस्यत्रहि॰ धर्मकार्येति धर्मकार्ययोः समारोपमित्यर्थः अयंतदीयउपसंहा
रग्रंथः उपसंहरतितस्मादिति॰ प्रकृतार्थेति स्तुवेषत्वरूपेत्यर्थः हृत्संतरेणव्यंजनया॰ योजनायाः
उपमानानीति समासरूपायाः तद्व्यवहारेति लतोव्यवहारेत्यर्थः उपमेति यथासंख्यमन्वयः पूर्वो
क्तरीत्येति हृत्संतरेणेत्याद्युक्तरीत्येत्यर्थः नन्वेवं कथं विशेषणसाम्यमर्थभेदादतः आह समा

१५९ 159 सेति· हरिणेक्षणां स्त्री आक्षिप्तत्वेनाशब्दत्वादाहैकदेशेति अत्र· उक्तपद्ये एव मन्त्रेपि तेनैव· अ
लंकारसर्वस्वकारेणैव· तुल्ययुक्त्या आह दंतप्रभा इति· तथोक्तेन दासमासोक्तिरित्युक्तं· स्वयं अलं
कारसर्वस्वकृता· तदिति उपमासंकरयोरित्यर्थः हालाहलेति राजाने प्रतिकव्युक्तिः हराजनेत्येवेतिरो
षः मकेति मत्स्यविशेषेत्यर्थः तेनापि उद्दण्डेनापि राजतिरस्काकरसाम्यस्याशब्दत्वादाहैकेति· ननु हा
लाहले सत्यं तदा वृद्धपक्षत्वेपि तत्वीमुनो हरेस्तत्र समासोक्तिरेवृताह श्यास्त्रामतआहावश्य ति·
उपमाभेदेनेत्यर्थः भेदांतरेति· समासोक्तिरित्यादिः क्वचित्संभवोस्तीत्याह यत्रेति· स्वतंत्रेति तथा
चोक्तांतर्भाव एवेति भावः अंबरं वस्त्रं आकाशश्च· तारकाः नक्षत्राणि अक्षिकनीनिकाश्च· एवेनो
पम्यगर्भविशेषणोत्थापितां तामाह एवंदत्तानंदेति अत्रापि व्यवहारस्य कस्यचिन्निबंधनाभावा १५९
त्कथं समासोक्तिरिति चिंत्यमिदं· एतादृशस्थले व्यंग्यरूपकमुपमा वेति तु युक्तं सर्वः प्राग्वत्· ए

चउभयांतर्भाविणस्तृतीयभेदानंगीकारेचु· उपमेतियथासंख्यमन्वयः तदितिसंकरालंकारेस्यर्थः

चस्तुर्थे· विशेषणेमपूर्व्यंसकेती स्यर्थः तथाविधमेव· एकदेशविवर्त्तिव· चरणोगस्त्रियामित्यु

क्तेर्नपुंसकत्वंतुरुत्कवैलक्षण्यु· एकदेशविवर्त्तीतित्रांततडित्कटाक्षेसत्कृत्येनेस्यर्थः उपगूहनेति·

आलिंगनेस्यर्थः तथाविधमेव· एक सारूप्यात्साहृश्यात्पुरिति· उत्तरराघवकेसीतालागानतरेके वा

चिह्नंगतस्यश्रीरामस्योक्तिरियं· दिन्नतिरुहातरुणांवनवलने· वनहृत्नांते· तत्सारूप्यात्वनसा

हृश्यात्· ग्रामादेवनसाहृश्यमाहकुटुंविविधिति· कुटुंविगतोयोधनसंतानादिसमृद्ध्यसमृध्यावि

पर्यासस्तेग्रामसेस्यर्थः तत्समाश्रयस्यताहृशाकुटुंविसमाश्रयस्य· जीवातोरितिचिंत्यमिदमविशे

षणसाम्यगम्यसाहृश्यगम्यलेपितत्वानपापात्· नेस्यत्रस्त्रोतोहृक्षादिविपर्यासरइति· नप्रतीयत

इस्यत्रेशयथातिरिक्तंप्रमाणमन्विष्यतामितिचिंत्यमिदं· विपर्यासइतिप्रतीयतेइत्यस्यानुषंगः

१६० 160 निक्षिप्यतामितितथाचबहुव्याकुलीस्यादितिभावः समाधानमस्येति। अप्रस्तुतप्रशंसैवात्रालं
कारः अप्रस्तुतस्य प्रशंसेतिन तदर्थः किंत्वप्रस्तुतेन प्रस्तुतस्य प्रशंसेति। एवं च वाच्येन व्यंग्येन वा
ऽप्रस्तुतेन वाच्यं व्यंग्यं वा प्रस्तुतं यत्र प्रशस्यते सादृश्याद्यन्यतमप्रकारेण साऽप्रस्तुतप्रशंसेति न
तु वाच्येनैव व्यंग्यमेवेतीतिभावः चिन्त्यमिदं युक्त्यसहत्वात्। तथाहि। प्रशंसनमत्र किमुत्कर्षाधा
नप्रतीतिमात्रं वा नाद्यः प्रतीयमानार्थानध्यारोपविषये तु अप्रस्तुतप्रशंसोदाहरणेषु अव्याप्तेः नहि
ताटस्थ्येनास्थितोऽप्यर्थ उत्कर्षक इत्युक्तं नान्त्यः प्रकृतेऽभावात्। न ह्यत्राप्रस्तुतेन प्रस्तुतस्य प्रतीतिः
वाच्यत्वात्। न चान्यतरत्वेनोभयोः संग्रहः समासोक्तेरेवान्यतरत्वघटितलक्षणकरणे बाधकाभावा
त्। अतिशयोक्त्यादावतिप्रसक्तत्वाच्च किं च सादिनास्वस्वकारादिविरोधोद्भावनमप्यसंगतमेव तच्छि
क्षकत्वात्। ईदृशाप्रस्तुतप्रशंसाया अपि तैरनंगीकारेण तदापि तद्विरोधस्य सत्त्वाच्चात्राचामात्राय १६०

स्यप्रागुक्तत्वाच्चेतिदिक्· सेयं चतुर्विधा समासोक्तिः यस्मिन्· आत्मज्ञानस्वरूपे आनंदरूपे च प्रसस्य
संज्ञके चिद्रूपे च· परते: उत्कृष्टे च· अदंडादे च: सत्त्वादिगुणवर्धने च: देवेषु वैयाकरणेषु च· स
त्संज्ञकं सद्रूपं च· ब्रह्म शब्दरूपमर्थरूपं चेत्यर्थः वर्त्तयंति निष्पादयंति· एकार्थभावबोधकते
ति· एकार्थीभावापन्नार्थबोधकतारूपमित्यर्थः प्रकृतेः प्रातिपदिकात् इतः अविद्यायाश्च परं अ
ग्रियं भिन्नं च प्रसयंतत्संज्ञकं ज्ञानरूपं च कृत्ता आगमान् तत्संज्ञकान् उपनिषदन् वेसाद्यर्थः स
जपक्षे तु अर्थ ऊह्यः मत्स्यो बिम्बाप्तः रज प्रियाः चंद्रप्रियाः दिवारी सा स्वरूपेति स्वरूपहेतु
फलानां त्रयाणामुत्प्रेक्षायामित्यर्थः एवमग्रेपि· इति समासोक्तिः ॥ परिकरं लक्ष
यति विशेषणेति· तच्च साभिप्रायत्वं च· अत एव स्यस्यार्थमाह तत्रेति हे खलंकारेइत्यर्थः ध्वनौ
वतिव्याप्तिवारणाय प्रकृतार्थोपपादकेति परिकरांकुरे ऽतिव्याप्तिवारणाय विशेषणेति· मा

१६१ लितं निमीलितं । मस्तंगलितं । गरुडसंवंध्युपलैरक्तमणिमिश्च । वीचिभिः क्षालितो कालियारव्य
161 सर्वव्यान्नुकल्मपादोषघातत्वं वोधनं हे स्वर्गगेत्वं मारुरूपसर्पदृष्टात्मन इत्यर्थः प्रार्थने लोडित्या
शयेनाहाशंसनमिति । क्षालितो कालियाननत्रवाक्यार्थः परिणामेन । तदलंकारेण तथा चमयू
रव्यं सकादित्वात्समासो वाध्यः तादात्म्यापत्या व्यालरूपविषयिणी तिशेषः आगमेतिपुराणे
सर्थः धानाव । तत्करणाय । नामांतरेति । वी विक्षालितवासुदेवचरणे इत्यादेरित्यर्थः सात्राक्तिः
तयोः पादयोः स्वशब्देनशक्तिः पूर्वमेव । कृत्स्नावतारास्मथममेव अर्वाक्कृत्स्नजन्मानंतरं ए
वमंत्रेपि । उपसंहरंतिएवं हीति । प्रकारांतरेण सिद्धायास्तस्याविशेषणेन याघणेही त्यर्थः । पदे १६१
तिविष्णुंप्रतिभक्तोक्तिः । स्वसुरएवलादये एवनावकं मा अरिशब्देनचक्रं अपुष्टार्थेति अपु
ष्टार्थत्वेत्यर्थः एवमंत्रेपिकष्टत्वादीतियथाकष्टत्वाद्यभावो दोषाभावमात्रेनत्वलंकारत्वमित्यर्थः

अत्र· परिकरलक्षणे· चो हेतौ· अत्रपरिकरे· इयतः तत· विशेषणानेकत्वंअपीति नायिकाद्दत्तांतं
नायकंप्रतिकस्यचिदुक्तिः आभावेनेतितावतैवसाफल्येनश्लेषादेस्तदपवादत्वादितिभावः विशे
षाभावादितितदापत्तेरित्यर्थः जायमानतदर्थतद्विन्यासस्यावच्छेदकत्वंतत्रेतीति शेषः परिकरे
ति परिकरस्यालंकारत्वोपपत्तिरित्यर्थः उद्दृष्टालंकारसंपत्त्या सहृदयवैमुख्यरूपदूषकता
वीजाभावादितिभावः साभिप्रायस्यविन्यासेविच्छित्तिविशेषसद्भावादितिक्वचित्पाठः क्षिती
तियमकोदाहरणमिदं· मत्रास्तवनयुक्तेन गोवर्धनेन अरक्षकेणेंद्रेणेत्यर्थः अहिर्वृत्रासुरे सर्वे
इति विश्वः यनेकादीतितद्रूपशब्दचित्रेत्यर्थः सर्वत्र· श्लेषादौतदन्यत्रत्र च· तेन स्तवकत्वादि
ति अत्रेदंचिंत्यं संदोषाभाववैशिष्ट्येन मंतर्भावयता एकविशेषणे चमत्कारविशेषस्यानंगीका
रात्तदुदाहरणासंगतिः यदित्वनुभवबलात्तद्दोषाभावकृतचमत्कारादप्यधिकचमत्का

रोऽस्तिवायनंगीकारस्तत्प्रयोजकस्तूच्यतेतर्हिसमंप्रकृतेपि· किंचअपितुपोषायेतिवदताभवतापिश्लेषय
मकादिषुविशेषणस्यचमत्कारिताभ्युपेतैवचमत्कारातिशयजनकतारूपायाएवपुष्टः काव्येस्वीकारा
त्· यदितुविवक्षितार्थबोधएवपोषःविवक्षितार्थबाधप्रयोजकानुपादानत्वंचपुष्टत्वंतथाप्यापत्कालेऽक्रि
यमाणमग्निकाशौचादियथानदोषायनापिलोकनिंदायैक्रियमाणंचाधिकस्तुतयेऽधिकफला
यचभवतितथायमकादिषुपुष्टत्वमक्रियमाणंनदोषाय· क्रियमाणंत्वधिकचमत्कारायेति
वक्तुंशक्यंनचकवेःस्तुतयेभवतुनचमत्कारायेतिवाच्यंनित्येफलस्यापिस्वीकारेणतदतिशय
स्यतेनजननवदुपपत्तेः इहतुफलंचमत्कारएव· अपिलावण्यस्यत्रतुपुष्टत्वमक्रियमाणंदोषा
यक्रियमाणंतुविवक्षितार्थबाधरूपयोपायेववाधिकत्वमकारणय· यथाऽऽनापदिअक्रियमाणं 
मृच्छौचादिदोषायक्रियमाणंतुनाधिकफलायेत्यतोयमकेपर्यंतानुधावनंवस्तुतःसंध्याद्यक

रणास्यदोषत्वेपितदभावो नदोषाभावमात्रमपि तु फलापापि एवंयमकाद्यतिरिक्तेपि साभिप्राये
कविशेषणोपादाने दोषत्वाभावश्चमत्कारश्चेत्यलंकारत्वं किं च यथा तत्र दोषाभावस्यांगवैकल्ये
पि सिद्धोसांगतत्करणकलातिशयायैव एवं दोषाभावस्यविशेषणानुपादानेपि संभवेन साभिप्रा
येकविशेषणनिबंधनेपि चमत्कारो दुरपह्नव इति बोध्यं तदेतदपि चैकपदार्थहेतुकमिति साहि
वात्रथ न केवलयानंदस्फुटमिति दिक्· इत्यत्र मृक्तिकात्वेणा चाभावनिषेधविधौ· पर्युदस्तेपि·
दोषाभावत्वेनयाप्रतिपादितोपि· सामर्थ्याविनिं च· सामर्थ्यगमकं च· क्वचित्तथैव पाठः दोषणप
धेति अदोषं काव्यमित्यत्र पुष्टितेत्रितद्रूपो यो दोषाभावइत्यर्थः उपसंहरतितस्मादिति· वि
विक्तेति परिकरातिरिक्ते सामानाधिकरण्याभावादिति भावः एकस्मिन्परिकरे· यथेति विद्या
यां गुणत्व दोषाभावत्वयोः समावेशोपि तयोरसांकर्येपि वेत्यर्थः उभयेति अलंकारदोषाभावरू

१६३ 163 पत्वेनेत्यर्थः विपक्षे बाधकमप्याहान्यथेति· एवं सत्त्वं पितस्य तत्त्वानंगीकार इत्यर्थः अत एवा
पिः प्रयुक्तः अनेकविशेषणानां साभिप्रायत्वे उदाहरति द्विजितिचंद्रं प्रत्युक्तिरियं· परिकरस्य
भेदमाह प्रपंचेति· कोलेति वराहेत्यर्थः पाच्यतास्पदेतिवाच्यायमानेत्यर्थः अत एव स्पष्टी
पदस्यार्थकः तद्गमकाभावान्नस्यगूढत्वमिति भावः इति परिकरः श्लेषं लक्षयति अ
थेति· तत्र आद्यभेदयोर्मध्ये· अत्र· एषां भेदानां मध्ये· आद्ये प्रकृतमात्राश्रिते· द्वितीये· अ
प्रकृतमात्राश्रिते· तृतीयभेदः उभयाश्रिते· तथात्वेतु इति विशेष्यस्यापि श्लिष्टत्वे हीत्यर्थः
अत्र विशेष्यस्य श्लिष्टत्वेपि श्लेषांगीकारे शब्दशक्तिमूलध्वन्युच्छेदापत्तेरित्याशयं वउलार्थः
तृतीये विशेषमाह विशेषणेति· विशेषणस्यैव श्लिष्टतायामित्यर्थः भेदानुपसंहरति· १६३
तदित्थमिति· अनुगतं लक्षणमाह तदिति· संभृत्यर्थमिति· संभूतिरुत्पत्तिस्सम्यमैश्वर्यंच·

विष्णुनाभिंप्राप्तंविष्णुनाअभिप्रपन्नंप्राप्तंच· सताहृशोब्रह्मापियस्यकमलस्यनालंनालदं
डः यस्मादलंसमर्थौनिच· धन्यैर्भ्रमरैः धनिकपंक्तिभिश्च· पद्माख्यकमलसंज्ञकंकमलासं
ज्ञकंच· अयं· प्रकृतमात्रश्रितः एवमग्रेपि· आद्यंभगवन्नाभिसंबंधि· कारकलितेस्मादिकरोह
स्तेकिरणाश्च· चक्रंसुदर्शनंकालचक्रंच· अंबरमाकाशोवस्त्रंच· तमोराहुरंधकारश्च· जाड्य
मज्ञानंमूर्खत्वंच· हरिःसूर्यःविष्णुश्च· अयंप्रकृताप्रकृतोभयाश्रितः जाड्यातिनिजसेवीत्यस्यति
आदिःसमर्थः इत्यग्रेश्लेषोबोधःश्लिष्टकेयंतृतीयमुदाहरतिअर्थैत्ति· अर्जुनस्यगुरुरित्यत्रगु
रुपदंश्लिष्टं· पर्यायपरिवृत्तिसचवित्रिक्षकादिपदोपादनस्यापिसंभवादितिबोध्यं· एवंचगुरुरुप
देष्टाबृहस्पतिश्च उपसंहरतिएवमिति· अप्रकृतविषयमुदाहवरीति· हरिविष्णुः सूर्यः· करो
हस्तः कीरणश्च· अधिकंअतिशयेनकेशनीत्यधिकंअव्ययीभावः जलेइत्यर्थश्च· संगादिति

१६४ पंचम्यंतमतुलरागे सत्राप्यन्वेति· कमलभाः कमलकांतिः लक्ष्मीकांतिश्च· विगलितप्रतिभाःनि
167 स्सारा· अन्यत्र हरिकरादौ· अत्रैव उक्तपद्य एव· अलमिति· अलमत्यंतहीतिनिश्चयेन मानी अ
भिमानी असंतं हिमसंहत्या परिदीर्णानि गात्राणि मेन स च· फाल्गुनोऽर्जुनो मासश्च· असंतमाको
क्षितः कृत्स्नस्य मार्गो येन असंतमाकांक्षितः कृत्स्नवर्त्माऽग्निर्यस्मिन्स च· भीष्मो गांगेयः माघो मा
सः संकीर्ण इति तुल्यपदोक्तेरिति भावः पूर्वं भीष्मसोढेत्यत्वं तत्तुल्यत्वस्य विधेयत्वं अधुनात
द्वैपरीत्येनाह यदीति· श्लेषेति· गांगेयवद्रूपानकस्यापि प्रतीतेरिति भावः अखंडित एव श्लेष इति· श
ब्दशक्तिमूलध्वनिना न खंडित इत्यर्थः क तर्हि समासोक्तिरत आह यत्रेति अपिः संभावनायां· अ
त्रश्लेषविषये· अत एवाहायं चेति· श्लेष इत्यर्थः विविक्तविषयस्यापि वक्ष्यमाणत्वादाहप्राये १६४
णेति· अभीति· व्याप्नोतीत्यर्थः उताहो· अथवा· येनेति प्राप्त इति भावे क्तः येनेति कर्त्तरि तृतीयान

अद्वयस्यप्रकृतदार्ढ्यबोधकत्वं·तथाचयस्त्वत्पदस्यप्राप्तौयआरभ्यमाणःसतस्यबाधकइत्यर्थः
तदप्राप्तियोग्येऽचारितार्थ्यंहिबाधकताबीजं·एवंव्यवच्छेद्यंस्पष्टार्थमाहनचेतिनहीत्यर्थः·ताव
तआदौ·अलमत्यन्तंपातारक्षिता·पाताललोकश्च·आशानांमनोरथानांदिशांच·अमराणां
देवानांमरुद्गणानांचभूमिः·स्वर्गःचमासंबंधिपवनाश्रयश्च·अभेदेतिप्रथमोपस्थितार्थइतिभा
वः·तस्मात्श्लेषस्यसर्वबाधकत्वंसिद्धंतत्राक्षिपतिकथंतर्हीति·दीनांस्वल्पांसंपादेनविभक्तः·न
दीनांगंगादीनांसंपदंविभ्रच्च·तत्रैवप्राचोक्तमदीनामित्यस्यैव·प्रत्ययपदस्याग्रेऽभयत्रानुषंगः·प्रति
भानेति·तथाचप्रातिभासिकत्वंतेषामितिभावः·तदेवोपपादयतिनहीति·उद्भटाचार्योक्तिंखंडय
तिएतच्चेतितत्रेसत्स्योच्यतेइतिशेषः·एवंअग्रेसर्वत्रबोध्यं·सर्वदाउमाधवः·सर्वप्रदःमाधवश्च·गं
गांअगंगांच·वस्तुतःसादृश्यस्थलेथाहप्रत्ययेति·ननुनत्वमतीतिरपिकुतोनेतिआहनहीति·

अत एवेत्यस्यार्थमाह गुणेति २

१६५ नन्वलंकारांतरमस्त्वत आह नापीति· नन्वेकश्रुत्यार्थद्वयोपादाने ष्ष· पालंकारः कुतोऽनात आह केति·
165 उपसंहरति एवं चेति· अलंकारांतराभावे चेत्यर्थः क्रियादेरिवेति तद्रूपसमानधर्मवदित्यर्थः बाधकाभा
वादिति बाधकताबीजस्य निरवकाशत्वस्याभावादित्यर्थः श्लेषस्येति शेषः उत्प्रेक्षादावाहैवमेवेति· प्रस्तु
तवैपरीत्येन लुप्तोपमायां सर्वत्र तदसंभवादाह पूर्णोपमेति· तथा च तद्विषये इदमुच्यते न तु सर्वत्रेति भावः त्रि
विधेति प्रकृतत्वादिने भिभावः तया पूर्णोपमया· अन्यत्राप्येवमित्याह तथेति· समरे संग्रामे तेन वा अर्चितोप्य
मरैर्देवैरर्चितः न मात्रुपमाय स्यता दृशाः राः धनं येषां तैरर्चितः अनुपमधनार्चितश्चेत्यर्थः नैपारिकेति
तिमिरादृष्यनेत्ररोगकृते सर्थः अप्रतिष्ठानादिति· सालतया ऽप्रतीतेरित्यर्थः नन्वाभासत्वे श्लेषवद्विरोध
स्याप्यलंकारत्वं न स्यादत आह विरोधस्यत्विति· अपि वास्तिवतत्त्वसमुच्चायकः नन्वेवं तर्हि समराचीत्यादौ १६५
कोऽलंकारो ऽत आह तस्मादिति· उक्तहेतोरित्यर्थः एवमादौ समराचीत्यादौ· एवं साधकाद्रात्तोऽनन्या

याविषयत्वमुक्त्वा सामान्यचिंतापक्षे असंभवाद्विशेषचिंतापक्षेऽतिव्याप्तेश्चानन्यायविष
य इत्याह किंचेति· तत्तद्रूपवादत्वं परं तु तदग्रिमयोः पक्षयोः को भिमतोऽत आह संकीर्णत्वमि
ति· तृतीयपक्षाशयेनाहान्येत्विति· हियतः अत एव तेषामेव तदाख्यत्वादेवः तीस्वीयाख्या·
नभोविभागे· नभः प्रदेशे· एकधर्मेतिराजनरूपेत्यर्थः नभसीवेति अत्रोपमया वर्ण्यपुष्टिः उ
क्तार्थे प्राचीनसंमतिमाह तत एवेति ईदृशाव्यवस्थांगीकारादेवेत्यर्थः नन्वेतावता प्रकृते किं
सिद्धमत आह एवं चेति उक्तव्यवस्थांगीकारे चेत्यर्थः कथंकारं कथंकृत्वा व्यतिरेके दृष्टांतः वाध्य
प्राय एवेत्यथाहरिति· सर्वदो माधव इत्यादावलंकारांतरसंभावनारहिते तावकाशसम्श्लेष
स्यालंकारांतरेण वाध्यत्वमेवेत्यर्थः प्रतिभामात्रसत्ताख्यायइति· अपि विशेषेण समुच्चा
यकः अविकलेतिव्याख्यातमिदं प्राक्· तत्र तन्मतीतोमसोऽत्यन्त इति महानउच्चैःश्री

प्रोल्लसंतीधारायस्यसः प्रोल्लसन्नहो रोयत्रंसच कालागुरुवन्मलीमसः श्यामः कालागुरु
नाद्रूपामश्च मेघसमूहस्तनभारश्च भट्टेश्चेतिउदाहृतमित्यस्यानुषंगः भट्टेति अत्र यच्छब्दः प्रा
करणिकराजपरः तत्संक्षेपस्यप्रकृतस्यराज्ञः करः पाणिर्निरंतरंदानार्थंगृहीतांवुसकरोभ
नोऽभूत् भद्रात्मनः कल्याणरूपस्य दुरितिअनाभिभवनीयशरीरस्यवंशः कुलंतत्रोन्नतिराधि
क्यंयस्य इतः शिलीमुखानांनाराचानांसंग्रहोऽभ्यासंदार्ढ्यंयेन अनुपेतिअवाधितज्ञान
स्यअवारितगतेर्वाअदृष्टहितकर्त्तुर्वा परेतिशत्रुनिवारकस्य गजपक्षेभद्रजातीयस्य अत्यु
च्चत्वाद्दुःखाधिरोहशरीरस्यविशालावंशस्यपृष्ठदंडस्योन्नतिर्यस्य इतस्समरसंग्रहस्य
अनुद्धतधीरगमनस्यपरस्योत्कृष्टस्यवारणस्यगजस्यकरः शुंडादंडः मदजलसेकसुभगी 
भूदित्यर्थः अत्रराजावाच्यः हस्तीप्रतीयमानः ननुप्रकरणेनाभिधायानियमनाद्दप्रकृता

र्थस्यव्यंग्यत्वमेवेतिकथंश्लेषोत्तआहपदत्रेति· मूलस्यमूलकस्य· अलंकारस्येति· इदमुपल
क्षणंवस्तुध्वनेरशनिरित्यादौयतिविरुद्धरूपेऽ प्रस्तुतेऽ शनिशब्देनाभिधयाप्रतीयमानेपि
तन्मूलकस्यविरुद्धावपि त्वदनुवर्त्तनार्थमेकंकार्यंकुरुत इतिवस्तुध्वनेरशनिशब्दशक्तिमू
लस्यसंभवात· एतेनशब्दशक्तिमूलवस्तुध्वनेरुच्छेद इत्यपास्तम् अतएवविवक्षितार्थमा
हगत्विति· अभिधेयत्वेतिवाच्यत्वावश्यकत्वेनेत्यर्थः अभिधायाअवश्यंभावेनेतिकेचित्सा
ढः स्फटितीतिएवंचप्रकरणादीनांप्राथमिकवोधत्वमेवप्रतिबध्यतावच्छेदकमितिभावः नृ
पतितद्वाख्येति· नृपतिनृपतिशाख्येत्यर्थः यथासंख्येनास्यराजकरयोरन्वयः आवुदयमारू
ढः कांतिमानरक्तमंडलः राजाहरतिसर्वस्वमृदुभिर्न्नूतनैः करैरित्यादाविति भावः अन्योन्यसं
निधानेति· परसदार्थसंबंध्यर्थवाचकशब्दसमभिव्याहाररूपशब्दांतरसंनिधीत्यर्थः तद्धि

१६७
167

षयेतिप्रकृतार्थविषयेत्यर्थः नैतावतेत्यस्यतथापीत्यादिः एतावतापूर्वापरभावमात्रेणतस्यअप्र
कृतार्थस्यपश्चादितिअप्रकृतार्थइत्यनुषज्यते काममितिअप्रकृतस्यद्वितीयस्यशीघ्रमप्रस्
याद्भूतत्वंतदसंभवेशंकांनिरस्यतिअस्तिचेतिचोत्यर्थे अन्यत्रापिउदाहरणांतरेपि अयमती
ति माघेरैवतकवर्णनं अयंरैवतकगिरिः कठिणाः अत्यंतमहतीः महाविलंबमानमेघश्यामाः
निरंतरंप्राणिनामगम्यस्वरूपाः परिणतास्तिर्यक्कृदंतप्रहारिणोदिक्करिकादिग्गजायास्तास्त
टीर्विभर्त्तीत्यर्थः तिर्यक्कृदंतप्रहारीयोगजः परिणतस्तुसइतिहलायुधः द्वंद्वेश्लेषपक्षेतु अयं
राजाअतिप्रवयसोजीर्णाः महाविलंबमानस्तनसंवद्धाः सततंकदापिप्राणिनांसंगमायोग्यस्व
रूपाः तद्गमनेप्राणिनांमरणमेवेतिभावः परिणतेदिक्कवर्त्तुलाकारंदशनक्षतंकारिकानखक्षतंच १६७
यासांतास्तटीस्तत्त्वेनाध्यवसिताद्वृद्धस्त्रीर्विभर्त्तीत्यर्थः दिक्कदष्टंवर्त्तुलाकारंकरिकानखरेखि

केतिपाठ्वः ननु तत्रश्लेषएवनातआहतत्रेतिअयमतीसत्रेत्यर्थः उपसंहरतिएवंचेति तेषां
प्राचीनानां दोषांतरमाहद्वितीयार्थेति तेरेव प्राचीनैरेव अकृतार्थया अचरितार्थया सा
पूर्वविद्यमानो आम्ब्वितित्रिक्षणावस्थायित्वादितिभावः ज्ञानमेवेति एवंचाश्रयस्येवाभावा
त्प्रतिबंधकत्वंदुर्वचमितिभावः लाघवादाहतदपेक्ष्ययेति अन्यत्रगतोस्त्लमर्कइत्यादौ व्यं
जनानंगीकर्तृमते गौरवांगीकारस्यावश्यकत्वादाहजैमिनीयेतिबाधितार्थेतिजैमिनीयसं
बंधिविषामितीत्यर्थः यथाकथंचितितत्रव्युत्पत्त्यंतरांगीकारादितिभावः तस्यमहामतिजि
ह्वायांजैमिनीयसंबंधिविषांधत्ते इतिबाधितार्थस्य तत्त्वत्रेतितत्रतुस्तनस्यांजैमिनीयंत्रशास्त्र
अलमस्तंनधत्तेइत्यर्थप्रतीतिरितिभावः ननुवक्तृबोद्धव्यादिवैशिष्ट्यात्तथेत्यतः आहवक्त्रि
तिमात्रपदेनत्राकमप्रतिभानिरासः तथाचावश्यकव्यंजनयैवतत्प्रतीतिरितिभावः अतएव

१६८ वाहतत्रकिमुच्यतेअप्रकृतार्थस्यशक्त्याप्रतिपादनमिति· अत्रेदंचिंत्यंतत्रस्फुटितीत्युक्त्या
106 प्राथमिकबोधत्वमेवप्रतिबध्यतावच्छेदकमितिबोधितः मित्युक्तमेव· एवंचान्योन्यसंनिधा
नबलादिस्यनेनोक्तार्थकेनेदंबोधितं· प्रकृतार्थनियामकद्वयसत्वात्तदर्थमनुपस्थितिः
द्वितीयेपिशब्दांतरसंनिधिंरूपनियामकमात्रसत्वेनतस्याप्युपस्थितिः किंतुपश्चादिति· सु
रभिमांसंभुंक्तेइत्यादिःपुत्रादिप्रयुक्तान्त्वाश्लीलबोधःत्राणलकादिप्रयुक्तादेवचतद्वैधबु
तिव्यवस्थापिवक्तृतात्पर्यग्रहतदभावाभ्यांस्फूपपादा· यद्वावक्तृबोद्धृव्यादिवैशिष्ट्यस्यफल
बलेननियंत्रितत्वात्तुल्लासोपिहेतुत्वकल्पनान्नदोषः एतावन्विशेषःयत्रवक्तृवैशिष्ट्यादि
ज्ञानंविलंबेनप्रकरणज्ञानंचशीघ्रंतत्रवक्तृवैशिष्ट्यादीनांनियंत्रितत्वाम्नुल्लकत्वंयत्रतुयुग १६८
पदेवोभयंतत्रनियंत्रणप्रतिबंधकतोत्तेजकनैवतेषां· व्यंजनावादिनापितेषांव्यंग्यप्रतिभा

हेतुत्वमवश्यमंगीकार्यमेव· तद्द्वरं व्यंजनामनंगीकृत्य तेषां शक्त्युल्लासादिहेतुत्वकल्पनमेव· ए
वं योगरूढपदानां यत्र योगार्थमात्रघटितार्थान्तरबोधकता तत्र तेषां रूढिप्रतिबंधकतापि स्वी
कार्या उत्तेजकता वा एतेन वयं तु ब्रूमः इत्याद्युक्तिरप्यपास्ता· किंच शब्दशक्तिमूलध्वनिस्थले संबं
धविशेषरूपव्यंजनाया बोधजनकत्वकल्पनापेक्षया क्लृप्तशक्तेस्तत्त्वकल्पनमेवोचितं लाघ
वात्· एवं चाश्लिष्टसाधारणविशेषणायां समासोक्तावेव गुणीभूतव्यंग्यत्वं श्लिष्टविशेषणाया
मप्यारोपांशमादाय वा तत्त्वमिति दीक्षिताशयः वस्तुतस्तु द्वितीयार्थस्य व्यंग्यत्वेपि न तमादाय ध्व
नित्वमुचितं· उपमानादिविधया तस्यापि प्रकृतोपस्कारकत्वेन गुणत्वात्· अन्यथा समासोक्ता
वपि गुणीभूतव्यंग्यत्वोक्तिरसंगता स्यादित्यलंकारव्यंग्यत्वमादायैव ध्वनित्वं युक्तमिति बोध्यं
एतेन यदप्युच्यते ऽयमतीत्याद्युपास्तमिति बोध्यं· अपि नासाधारणविशेषणासमुच्चयः स्वेन श

रसगंगाधरटीकायविकरालंकारतक

१६९ क्तिनिरासः अतएवत्वमक्तौ वतदंगीकारादेव· तिमिश्चेतिउक्तमिश्रस्यसानुषंगः ननुप्रागुक्तरीत्यातत्र श्लेषस्यैवाभावेनकथंवाध्यतइत्युक्तिरतआहवाधोहीति· तत्ररामासोक्तौ· नन्वेवंश्लिष्टेपतित्रा त्वप्रयोगकिमत· आहश्लिष्टेति·

९२६

काव्य २५००

नं॰ २४२५
रसगङ्गाधर टीका
गुरुमर्म प्रकाशिका
(अपूर्ण)
९२८ पत्राणि
अलङ्कारशास्त्रीय
कर्ता - नागेश: